तद् वा एनमेतदग्रे .... तस्मादग्निः । अग्निर्हि वै .... । स उ एवास्य अग्निता ।।२ ।।

स ऐक्षत-प्रजापतिः ।....... । कल्वालीकृता हैव तर्हि पृथिव्यास नौषोधय आसुः न वनस्पतयः तदेवास्य मनस्यास ।।३ ।।

अथैनग्निर्व्यात्तेनोपपर्यावर्वर्त । तस्य भीतस्य स्वो महिमाऽपचक्राम । वाग्वा अस्य स्वो महिमा ।..... । तत्र विवेद घृताहुतिं वैव पय आहुतिं वा-उभयं ह त्वेव तत् पय एव ।।४।।

सा है नं नाभिराधयाश्चकार । केशमिश्रेव हास ।.... घृताहुतिं वा वैव पय आहुतिं वा उभयं ह त्वेव तत् पय एव ।।५।।

सा हैमं नाभिराधयांश्चकार ...... । ततोऽयं प्रबभूव योऽयं पवते । तत् एवाग्निः पराङ् पर्य्यावर्वर्त ।।६।।

etc etc till the eighteenth mantra where the brāhmaṇa ends. The reader may refer to the Sat. Br. 2.2.2. for full text. In other words, the brāhmaṇa says,

Prajāpati was alone before creation commenced. He wanted to initiate the creation process. He toiled for the same and generated agni from his mouth. Because it was generated from this mouth, agni became eater of food. Because he was generated as first of the gods, he was called 'अग्नि' (अग्रिरेव अग्निरित्युच्यते). Because he went forth as first, he is called 'Agni' (अग्रे गच्छतीति अग्निः).

Agni required food. Prajāpati realised that there was nothing expect himself for Agni to eat. The earth at that time was marshy and there was neither plants nor trees. This weighed in Prajāpati's mind.

Prajāpati then saw Agni running towards him and trying to devour him. He was terrified. His own greatness departed from him. Vāk was his greatness. It is this that departed from him. He wanted an offering on himself and rubbed his hands. Because he rubbed his hands his palms are hairless. By the rubbing he obtained milk and butter offering. Actually both were milk offerings.

The above offering did not satisfy Prajāpati, because it had hairs mixed with it. He threw it on the earth saying 'drink the heat' (ओषं धय). From it the plants grew up. They are hence called ओषधयः. He rubbed his hands again and produced a second offering. It was either butter or milk offering. Actually they were both milk only. This then satisfied Prajāpati. He hesitated, 'shall I offer it up or not' he thought. His greatness (mahimā) told him 'Offer it up'. He offered it up with 'स्वाहा'. This offering gave rise to the sun and then the wind. Agni then turned away from Prajāpat. Because Prajāpati's greatness had spoken to him (आह), the offerings are made with 'स्वाहा'.

Having performed the offering Prajāpati reproduced himself and saved himself from Agni as well as from death. Whosoever knowing this offers Agnihotra reproduces himself by offspring. He also saves himself from Agni and death just like Prajāpati saved himself.

When the person who has been performing Agnihotra dies and put on fire, a divine Ātman is born of him. The fire consumes his body only. Just like he is

born from his mother and father, so is he born from fire. But for one who does not perform Agnihotra, such a thing does not take place.

Therefore Agnihotra should be offered. Having offered the milk to Agni, Prajāpati threw away the rest. It became vikankata tree. It is through the offerings Agni, Sūrya and Vāyu were born.

The Devas wanted to follow Prajāpati in the creation process. The collected themselves on a piece of ground (i.e. on the earth) surrounded by ocean and sang the Gāyatra sāma without हिङ्कार.

The Devas went to the east. They came across the cow (gotatva) Looking at them the cow uttered हिङ्कार. The Devas understood that it was theहिङ्कार of Sāman. They found in the cow the means of subsistence. They also saw the yajña in the cow. Gotatva is food. Yajña also produces food. Therefore both cow and yajña are to be protected. Whosoever protects the cows is blessed with a number of them and is bent upon performing yajña .

When Agni met the cow he wanted to enter into union with her. He united with her and his seed became milk. While the cow is raw (uncooked), the milk in her is cooked. (warm) because it is Agni's seed. Whether the cow is black or red, the milk is white and it is warm when first milked because it is Agni's seed.

Then a quarrel arose among Agni,Vāyu and Ātman as to who should receive the offering first. Each one was competing for the first āhuti. They went to Prajāpati for mediation. Prajāpati decided that Agni will receive the first offering because he causes his own seed to be produced again. Then Sūrya will get. Whatever remains here and there, Vāyu will get. In accordance with this decision of Prajāpati, even today the same order is followed. Agni gets in the evening Sūrya in the morning and the remains are given to Vāyu in the antarikṣa

By the offerings given in the above order Agni conquered Pṛthvīloka, Vāyu the Antarikṣaloka and Sūrya the Dyuloka. Whoever knowing this, performs Agnihotra succeeds in attaining what the Devas managed and also shares the same position with them. Therefore Agnihotra should certainly be performed."

The Brāhmaṇa ends here.

The details given in the above brāhmaṇ contain some basic concepts of the Aryans regarding the functioning of the earth-atmosphere-sun system with reference to life and its sustenance on earth. The Aryans living in Northwest India were well aware of the following facts.

During the premonsoon season the earth gets heated slowly and the vegetation on the earth particularly the grass dries up for want of water and some times forest fires develop in the South-east direction and advance towards the region of their settlement. Though the initial premonsoon showers cause some grass to spring up again it is only the heavy downpour of the monsoon that quenches the heat and the fires if any completely and revives all forms of life on earth. The southward movement of the Sun thereafter also helps in the rapid decrease of heat in their region.

The Vedic sages could very well imagine the situation when there was no rainfall on earth. The fires would consume everything and who knows, the entire life on earth would have been totally annihilated once for all. This is what is meant by the statement in the Brāhmana that Prajāpati (who represents the creative processes) saw Agni running towards him and trying to devour him. The premonsoon thunder showers take place as a result of processes in the antarikṣa and dyuloka (according to the Vedic sages) and when these showers fall on earth grass and plants grow. Whereas the earth is with hairs (i.e. grass and plants) the antarikṣa and dyuloka are hairless. This is what is conveyed by the statement in the brāhmaṇa इदं 'चालोमकमिदंच'. The same idea was extended to the ādhyātmika level and the palms of Prajāpati became hairless after he rubbed them and produced the offering.

When the monsoon rains occur the heat of the sun completely disappears and this corresponds to the second offering which Prajāpati produced. The Vedic seers imagined that but for the rainfall, the whole earth will be consumed by fire. When something burns huge waves of smoke move out of the fire and here the smoke was imagined to carry away the fine particles of the earth. In other words, if burning goes on and if the earth will lose much of its contents to the atmosphere. This is expressed by the statement in the brāhmaṇa that Prajāpati was terrified and his greatness (mahimā) departed from him. Vak is his mahimā). Here 'Vak' is used in the sense of matter and not in the sense of his speech. Just like a log of wood disappears mostly when it is completely burnt, the Vedic seers imagined that the earth may have to suffer the same fate if the things on earth burn continuously and no rainfall occurs to quench the fire. Because the smoke carries material particles and forms a maṇḍala around the fire it is called mahimā. We can also say that the greatest asset of earth is its matter content and therefore it is called Prajāpati's mahimā.

The Vedic seers were fully aware of the role of the earth-atmosphere-sun system in the production of rainfall. In the कारीरिष्टि प्रकरण of the Taittirīyasamhitā it is said,

"अग्निर्वा इतो वृष्टिमुदीरयति । मरुतस्तां नयन्ति । यदा खलु वा असावादित्यो न्यङ्रश्मिभिः पर्यावर्तते अथ वर्षति ।" (तै.से.2.4.10)

"Agni causes the rain (loads the atmosphere with water vapour and causes its upward movement). The Maruts lead it over (northwards). When yonder the sun turns back with his rays (at its northern limit of movement), then it rains".

In the Ṛgveda we have the following ṛk,

"समानमेतदुदकमुच्चैत्यवचाहभिः । भूमिं पर्जन्या जिन्वन्ति दिवं जिन्वन्त्यग्नयः ।। (ऋ.वे 1.164.52)

"The waters go upwards and come downward in the same measure during periods (of the respective seasons). Agni takes the waters to the heavens and Parjanya brings them down as rain".

In Manusmṛti the following verse occurs.

"अग्नौ प्रास्ताहुतिः सम्यगादित्यमुपतिष्ठति । आदित्याज्जायते वृष्टिर्वृष्टेरन्नं ततःप्रजाः ।।" (म.स्मृ.3.76)

"An offering made properly to Agni reaches the sun. The sun produces the rain, the rain produces food, then the living beings come into existence."

In other words the coordinated functioning of earth-atmosphere-sun system is essential for the production of rainfall and the occurrence of life on earth. The second offering of Prajāpati achieved this and because rains fell, Agni and Soma were united and the production and sustenance of life on earth were made possible.

The Vedic seers believed that when a man who had performed Agnihotra dies, it is his body only that is burnt and not his Ātman. Agni which he had been worshipping during his life time enables him to be reborn. Here the reader will note that a connection for the belief in Punarjanma (rebirth) in Vedic religion is seen here. Since every human is essentially an annāda (eater of food), the birth of every human being was imagined to be the reproduction of the Agni part of the man (father). In other words, the family of the Agnihotri is perpetuated by continuous rebirths whereas there are less chances of the family chain being maintained in the case of a person who does not perform Agnihotra.

Another important concept that is brought out in the brāhmaṇa is the gotatva. 'गोतत्व' is a very important concept in Vedic religion and has very wide ramifications. We have gotatva associated with earth, sun, Parameṣṭiloka and these have wide applications. We shall later go into great detail into this principle. Here it is enough if we take that the gotatva represents the rains released from the clouds and also the water released from ice packs and glaciers. It is interesting to note the Gangotri glacier snout from which Ganga originates

is called 'गोमुख'. At the ādhidaivika level gotatva corresponds to the feeding of the sun by the Soma of the Parameṣti region which also descends to the atmosphere through the rays of the sun and finally to the earth and its vegetation through the rains. In fact it is because of the soma feed, that the earth maintains its shape and hardness in spite of the disruptive forces created by its agni. The Somakāṇda of Satapatha Brahmana has an ākhyāna on this descent of Soma from the heavens to the earth (see Sat.Br. 3.2.4)

The gotatva on the earth is represented by the cow. Just like gotatva is responsible for the release of water from the clouds which in turn sustains life on earth, the cow eats grass and drinks water and gives milk which forms essential and wholesome food for human beings. The medical texts speak highly of the beneficial effects of cow's milk for the human system. No wonder right from Vedic times the cow is being worshipped by Hindus with great reverence.

The hinkāra of the Sāman is oral expression of the union between agni and soma. The Sāman is a synonym for the mahimā part of any creation and it has five components viz हिङ्कार, प्रस्ताव, उद्गीथ, प्रतीहार and निधन. When sāman is sung, the creation process is covered by stages which indicate, beginning stage, rising stage, peak stage, decreasing stage and the end stage. The start which हिङ्कार represents means the start of agni-soma interaction which ultimately ends in constructive creation.

When it is said,that the Devas moved eastwards and found the cow there,it only means that they saw the monsoon clouds which appear in the east and bring in rain to their region.We know that it is the easterlies that bring rain to Punjab and adjoining region.The Hinkāra represents the sound of the thunder clouds.

The Vedic seers believed in unity of things at all the three levels and therefore thought just like water released from a dark cloud or a white cloud or glacier or ice pack is of the same colour, so also milk whether given by a white cow or brown cow or black cow, always remains white. The appearance of lightning in a rain bearing cloud led the Vedic sages to imagine that Agni gets into water and throws his seed. There is an ākhyāna on this in the Sambhāra brāhmaṇa (Agnyādhāna brāhmaṇa) which we have already dealt with there it is said that hiraṇya (gold) is Agni's seed thrown in water. Since 'gotatva' represents water released from clouds in which Agni's seed is embedded, at the ādhibhautika level the Vedic seers imagined the milk of the cow contains Agni's seed and therefore it is warm at the time of milking. It is common experience that drops from thunder clouds are many times warm because of release of latent heat.

The difference of opinion among Agni,Vāyu and Sūrya as to who should receive the first offering and Prajāpati's decision on the same only represents their order of importance in rainfall production as imagined by the Vedic sages.

The Vedic sages believed that during the night the sun gets into the womb of Agni and is reborn in the morning. So Agni gets primary importance. Also from the ṛta state of Agni, Satya sūrya is born. Since Vāyu only carries the rain from one place to another he gets only the third place. Manu's statement viz अग्नौ प्रास्ताहुति: सम्यगादित्यमुपतिष्टते । etc.quoted earlier brings out the importance of Agni and Sūrya in the rainfall process. The statement in the कारीरीष्टि also goes to show the primary importance given to Agni.

Now we pass on to the details pertaining to the actual performance of Agnihotra.

2. The Agnihotra Ritual

The Brāhmaṇas deal with two basic aspects of the ritual viz the procedural aspects which go under the name विधिs and significance of the ritual as well as the benefits which accrue to the yajamāna performing the ritual in the proper way known as अर्थवाद. Arthavāda sometimes questions the procedure in vogue among certain groups of priests and the author of the Brāhmaṇa tries to establish by some reasoning alternate or modified procedures to be adopted by his followers. A careful study of many of these discussions is very revealing. It would appear that there should have been some gaps of knowledge between the original planners of rituals and the subsequent groups of priests who inherited their knowledge. It is quite likely that the missing links in the procedures were filled up by later priests according to their capacity. It is not improbable that several additions were made by some groups which were opposed by others.In fact a convincing explanation is required, why the compositions of ṛks abrupty ended somewhere. If we accept, that many of the ṛks contain mostly statements of creative process in Nature, the discoveries should have gone on continuously. It is quite possible that the composers of ṛks were the victims of natural calamity like advancement of glaciers, earthquakes, avalanches, floods, land slides etc. and the group which survived started with whatever knowledge they have inherited from their ancestors and carried on their ritual performances as planned by the seers according to their own understanding of the working of Nature. Wherever gaps of knowledge existed they filled their own version many times according to their whims and naturally there was difference of opinion between various groups. Some times these additions look very artificial as they have no

relevance to the logic built up earlier. We shall comment on many of these as and when we deal with them.With these remarks we straight away pass on to the Agnihotra ritual.

The whole universe owes its existence to Agnihotra which is defined as 'अग्नौ सोमस्य हवनं अग्निहोत्रम् ।' (The offering of Soma into Agni is Agnihotra). Without the presence of soma, the formation of form out of Agni is impossible. The sun was formed as a result of soma feeding Agni. It is the continuous feeding of soma that enables the sun to maintain his form and brightness (सोमेनादित्या बलिन:). It is because of this fact it is said 'सूर्यो ह वा अग्निहोत्रम्'।. The origin of earth and sustenance of life of all forms on it is due to the role of soma which reaches the earth along with rainfall. The birth of the child is due to the deposition of semen (रेतस्) into the womb (शोणिताग्नि). Man sustains himself by feeding the जाठराग्नि with food which is nothing but soma (सोमो वै अन्नमग्निरन्नाद:). In other words Agnihotra goes on in Nature continuously and every object of creation is dependent on it for its sustenance.

The question then naturally arises, why Agnihotra ritual should be performed daily by the individual and why it should be done just before sunrise and immediately after sun set. In the very early stages the Vedic sages should have been interested to know why the sun disappears in the western horizon and reappears in the eastern horizon after a time interval which changes in the course of the year. At that time they believed that the earth was flat. They imagined that perhaps during night the sun becomes part of the Agni of the earth (Pārthivāgni) and resides in the womb of the Pārthivāgni just as a child resides in the womb of the mother. The performer of Agnihotra imagines while the offering made immediately after sun set that he is giving it while the Sun is in the process of becoming part of Pārthivāgni and similarly while giving the offering before sun rise he imagines that the sun is still part of Pārthivāgni and is in the process of seperating himself from it. In fact it was thought that the offering in the morning causes the sun to come out just like a child comes out of the mother's womb. The evening offering on the other hand goes to feed the sun while he is part of Pārthivāgni in the night. In other words the Agnihotra was supposed to be on the sun (represented by the Āhavanīya fire) located on earth. During the day time the sun detaches himself from the Pārthivāgni and moves in dyuloka.

From the ādhyātmika view it was believed that the Ātman of the individual is closely linked to the sun and the latter's influence on Ātman is maximum when he is near us or is linked to us. They thought that when the sun is near the horizon maximum linkage takes place and that is why offerings are made in the

evening after sun set and in the morning before sun rise. During the night the sun is enveloped by Pārthivāgni and at the same time the Ātman is shut off from sun's direct influence through his rays and is dragged towards the earth and therefore the man goes to sleep and enjoys peace. The Vedic sages were of the view that it is the sun who activates the man during day time and when he sets, man's activity automatically ceases and is revived only when the sun rises again.

It is relevant at this juncture to point out that the Vedic sages speculaed quite a lot about the movement of the sun. Madhusūdan Ojha had taken great trouble to show that the Vedic seers did know that the earth goes round the sun. He justifies his view by various quotation from Vedas, Brāhmaṇas and Āraṇyakas. A very careful examination of his arguements would reveal that they are not very convincing from the scientist's point of view. We shall have occassion to deal with all these aspects in a separate chapter.* But in all his discussion he assumes that the earth goes round the sun and arrives at very valid conclussions pertaining to the logic of Vedic thought.In our third volume we shall give full details of Ojhai's arguements for proving that the Vedic sears did know that the earth goes round the Sun.

A more convincing explanation for the performance of Agnihotra daily is also available in the Brahmaṇa. We have already seen that the sun is maintained by the feeding of soma of the Parameṣti region. What oozes out of the sun in the form of his rays is responsible for the production of life of all forms and their maintenance on earth. This oozed out portion is called "उच्छिष्ट" and it is this Ucciṣtha which produces (through rainfall) food on earth and man sustains on it. The deva prāṇas which are present at various levels between the sun and the earth have a share in the Ucciṣtha and it is only what is left out by them that man enjoys. In fact the whole universe sustains itself on yajña where all the above take part and feed on the food (soma) provided by Nature. Man is entitled only to a portion of this food and can enjoy it only if the Devas had their portion. In other words only if the Deva prāṇas are fed properly they can ensure the food for the man by causing rain first and then producing food. To put it in modern language, Nature is so designed that man is entitled to enjoy only a part of it. Environment should never be disturbed to produce food for man. Man should enjoy the rainfall and through it he should produce his own food.

The Agnihotra ritual is done only to ensure that Devas had their share of food and what remains only is consumed by yajamāna. If we have to ensure our

* In our third volume we shall give full details of Ojha's arguments for proving that the Vedic seers did know that the earth goes round the sun.

food we have to give food to the Devas. Which is the same as thing as saying, if we have to ensure our food we have to protect Nature. In the words of brāhmaṇa,

"स यदग्नौ जुहोति तद्देवेषु जुहोति, तस्माद्देवा: सन्ति । अथ यदुपमार्ष्टि तत् पितृषु चौषधीषु च जुहोति । तस्मात् पितरश्चौषधयश्च सन्ति । अथ यद् हुत्वा प्राश्नाति तन्मनुष्येषु जुहोति । तस्मान्मनुष्या: सन्ति ॥"

(श.ब्रा.2.3.1.19.)

which means,

"What he offers in the Agni he offers to the Devas. The Devas sustain themselves on it. What he wipes of he offers to pitṛs and plants. Thereby the pitṛs and plants sustain themselves. What he eats after offering constitutes food for men and thereby men sustain themselves."

The same thing is also conveyed by another statement in the Brāhmaṇa.

हुतोच्छिष्टस्य ह्येवाग्निहोत्रजुह्वदशीत । (श.ब्रा.2.3.1.11)

That is,

"The Agnihotra performer eats only the remains of what he offers to gods."

It is because of this fact yājñikas say that whereas all other yajñas have an end, Agnihotra goes on and has no end. Even big yajñas end after twelve years. Agnihotra is never ending yajña and has to be performed by the man as long as he requires food for his sustenance.

In olden days the priests performing Agnihotra used to remove ashes from the Āhavanīyakuṇḍa even while the sun is still there, i.e. before sunset. The Viśvedeva prāñas were imagined to reside there to enjoy the offerings made in the evening. If the ash is removed after sunset,the Viśvedeva prāṇas are also driven away and the offerings will be made in the Kuṇda devoid of deva prāñas and the purpose of the offering is defeated. Agnihotra should be done after sunset in the evening and before sunrise the morning. By giving the āhuti after sunset the Viśvedeva prāṇas which have entered the Agni are fed. If the āhuti is given after sunrise, it does not reach them because as soon as sun rises, they leave the Kuṇda. This is opinion of sage Āsuri.

The reason why milk is offered is that milk forms the essence of both vegetable and animal kingdom. The cow eats the plants and grass which go under the name मूलि (ties to the earth). The cow is classified as अमूल because she is free to move about. The milk she produces has its source in both and therefore ideally suited for offering to Agni. This is what the brāhmaṇa says

"द्वयं वा इदं जीवनम् – मूलि चैवामूलं च। तदुभयं देवानां सन्मनुष्या उपजीवन्ति । पशवोऽमूला: ओषधयो मूलिन्य:। ते पशवोऽमूला ओषधीमूलिनीर्जग्ध्वाऽप: पीत्वा तत एष रस: संभवति ।।" (श.ब्रा 2.3.1.10)

The milk that is to be offered should be put on the Gārhapatyāgni and heated and removed before it rises to the brim, since it will be burnt and will contain unproductive seed if allowed to rise to the brim. Some water is added to the milk before offering. The reason as given in the brāhmaṇa is that milk represents the essence of both मूलि and अमूल. The मूलि (grass and plants) come into existence because of rains and therefore water has a role to play in the formation of milk. Water also supplements the juice and appeases the milk when it is about to rise to the brim when heated on fire.

The Vedic sages wanted to present many details in their rituals which have relevance in normal human activities. For example while giving the offerings to Agni the first offering should be given without placing the ladle containing the milk near Āhavanīyāgni. In other words he should give the āhuti while standing without keeping the milk containing near Āhavanīyāgni. On the other hand if he sits while giving the āhuti keeping the milk contained before him near the āhavanīyāgni, it is equivalent to bringing food to the guest and keep something before him without actually serving him. However the second offering is done, after 'उपसादन' i.e. placing it near Āhavanīyāgni and sitting before the same. The two offerings are for vāk and Manas and they are done differently to distinguish one from the other. This is what Yājñavalkya says (Śat.Br. 2.3.1.17). This explanation is rather interesting. It probably means that the yajamāna tries to create a dēvātmā which influences him and enriches his Ātman. The deva prāṇa is already present and it requires only manas and vāk to start functioning as Dēvātmā.

The Yajamāna makes two offerings twice he wipes out the spout of the spoon, twice he sips the milk and four times he puts milk into Agnihotra ladle. Thus there are ten actions. Virāt chandas is ten lettered and Virat is yajṇa. That is the universe is revealed to us through yajña.

Chandas is an important aspect of creation Every created thing has a finitised shape. This finitisation takes place because of the right choice of chandas. We shall deal with all aspects of Chandas in a separate chapter.

Yājṇavalkya goes on giving a number of other reasons for making two offerings. These are of no scientific interest. The reader may refer to the brāhamaṇa for details. However one point of interest to us is the fact that the yajamāna offers a little for the first libation, some what more for the second and

still more he leaves in the ladle. This is said to be done because gods are fewer than men and cattle are more numerous than men. In other words in Nature, cattle should always outnumber men so as to provide ample food for them and any disturbance, like men outnumbering cattle will only end up in great hardship to human society.

After dealing with the procedures for paying homage to the three Agnis (उपस्थानविधि) Yājṇavalkya further dilates on the merits of Agnihotrakarma. The Vedic sages when they realised that death cannot be escaped,and they could only pray for a long life, they speculated about what would happen to the soul after death. They knew very well that Agni plays a prominent role in life. In every man Agni is the eater of food (annāda) and life exists as long as this Agni remains active. When prāṇa leaves the man,it is the agni part that leaves the body. They believed that Agni enables them to be reborn in yonder world. In other words the same Agni which was propitaited and mainntained as Gārhapatya and Āhavanīya by the yajamāna has now become his father. They therfore thought Agnihotra should not be stopped prematurely. If it is stopped Agni will fail him in the yonder world.

There is another reason why the Vedic seers thought that Agni reproduces the yajamāna in the yonder world.We have already seen that the sun which enrers the Pāṛthivāgni was reproduced by the latter in the morning just like a child comes out of the womb. Applying this to the ādhyātmika level the Vedic sages thought that Agni in the man reproduces him after his death. Actually they should have meant that the family of the Agnihotrī does not suffer a break.

The Vedic Ṛṣis considered the sun as the most effective God who takes away the lives of people by the weapon of time he controls. Again taking analogy of the sun who escapes unhurt from the Pārthivāgni which envelops him during the night, the Vedic sages imagined that they can go beyond death by performing Agnihotra. This is what Yājñavalkya says.

"तद् वा एष एव मृत्युः - य एष तपति । तद् यदेष एव मृत्युः तस्माद् या एतस्मादर्वाच्या: प्रजास्ता म्रियन्ते । अथ या पराच्यास्ता देवाः । तस्मात्तेऽमृताः । तस्येमाः प्रजा रश्मिभिः प्राणेष्वभिहिताः। यथाऽश्वोऽश्वाभिधान्या वाभीशुभिर्वा - एवमस्येमाः सर्वाः प्रजा रश्मिभिः प्राणेष्वभिहिताः तस्मादुरश्मयः प्राणानभ्यवतायन्ते ।।७।।

स यस्य कामयते तस्य प्राणमादायोदेति स म्रियते ।

स यो हैतं मृत्युमनतिमुच्य - अथामुं लोकमेति - यथा हैवास्मिंल्लोके न संयतमाद्रियते - यदा यदैव कामयते - अथ मारयति एवमु हैवास्मिंल्लोके पुनः पुनरेव प्रमारयति ।।८।।

स यत् सायमस्तमिते द्वे आहुती जुहोति - तदेताभ्यां पूर्वाभ्यां पद्भ्यामेतस्मिन् मृत्यौ प्रतितिष्ठति । अथ यत् प्रातरनुदिते द्वे आहुती जुहोति - तदेताभ्यामपराभ्यां पद्भ्यामेतस्मिन् मृत्यौ प्रतितिष्ठति । स एनमेष उद्यन्नेवादायोदेति । तदेतं मृत्युमतिमुच्यते । सैषाग्निहोत्रे मृत्योरतिमुक्तिः अति ह वै पुनर्मृत्युं मुच्यते - य एतामग्निहोत्रे मृत्योरतिमुक्तिं वेद ।।९ ।।" (श.ब्रा.2.3.3.7,8,9)

The sun who shines is mṛtyu. Because he is mṛtyu the prajās under him are mortal. But the devaprajās who are above the sun are immortal. The prajās below the sun are tied to his rays just like the horse is controlled by the bridle. Therefore the sun's rays pervade the prāṇa of his prajās below.

The sun takes away the lives of whomsoever he wants and rises. The men die and go to the other world without getting freed from mṛtyu. Again and again the sun causes their death and has control on their lives.

On the other hand when the man offers two oblations after sunset he plants himself firmly in mṛtyu ie the sun with the fore part of his feet. When he offers two oblations in the morning he plants himself on mṛtyu (sun) with hind part of his feet. When the sun rises he takes him on his rays and moves up in the sky. Thus the yajamāna escapes death. This then is the release from mṛtyu for the yajamāna who performs Agnihotra.

Yājñavalkya further says (श.ब्रा.2.3.3.11) that he goes even beyond the day and night cycle ie time.

In effect the Agnihotrī wins over time and therefore the question of death does not arise for him. The Vedic sages should have thought if they can manage to be carried to the other side of the sun, then the time cycle controlled by the sun on the earth's side does not affect them. Again the comparison with the sun is valid. Just as the sun gets out of the Pārthivāgni during the day time, the Vedic sages imagined that Agni worshipped by them will take them beyond the time wheel and therefore beyond death. In fact they compared Agnihotra to a ship which takes them heavenward after crossing the antarikṣa samudra. The door of Agnihotra ship is on the northern side. The Āhavaniya and Gārhapatya are its two sides. The steersman is the yajamāna who ascends it from north and steers it heavenward.

There is another way of viewing Agnihotrakarma. Since this karma is meant for ensuring the full potentialities of the bhṛgu (soma) - Angiras (Agni) tatva for creation activity, it can be termed as a kind off nirguṇopāsana or upāsanā of Anirukta Brahman or Nirviśesa Brahman which can ultimately lead the upāsaka to the attainment of Sāyujya state with Brahman. We shall go more into this when we deal with Cayanayāga.

The yajmāna recites thirty seven mantras during the performance of Agnihotra.

In practise, when the yajmāna wants to become Āhitāgni he has to perform Agnyādhāna first and then he performs Agnihotra daily both in the morning and evening. Then he performs दर्शपूर्णमासेष्टि. Madhusudhan Ojha in the chapter on Agnihotra in his book यज्ञसरस्वती, describes the procedure for performing Agnyādhāna and then procedure for performance of Agnihotra follows. The use of mantras in the above two rituals are distributed as shown below. Here it is to be noted that Ojha presents this after he has discussed दर्शपूर्णमासेष्टि as given in वाजसनेयी शतपथब्राह्मणम्.

1. अग्न्याधानमन्त्राः	-	8
2. होमे	-	7
3. बृहदुपस्थाने	-	30 *
Total	-	45

* Note if : क्षुल्लकोपस्थानम् (ie संग्रहोपस्थानम्) is done the mantras used are 8 only :

Ojha gives the meanings of these mantras in the order in which they occur and connects them with some details of procedure also so that the whole account becomes extremely useful and instructive for the readers. We therefore propose to give all the details together with the meanings of the mantras as given by him.

।। अग्निहोत्राधिकारः ।।

तत्र

। प्रथमतः अग्न्याधानम् ।

अमावास्यायामग्न्याधेयं क्रियते – तत्र चतुर्भिर्ऋत्विग्भिः प्राशितुं योग्यमोदनं पक्त्वा बहिरुद्वास्य तस्यौदनस्य मध्ये घृतसेचनाय निम्नं स्थानं कृत्वा सर्पिषा तदापूर्य्य तस्मिन् सर्पिषि आश्वत्थीः तिस्रः समिधोऽभ्यज्य 'शमीगर्भमेतदाप्नुम' इति वदन्तः एकैकामेकैकयार्चा अग्नावभ्यादधति । तत्र ब्रूते । हे ऋत्विजः यूयम्

"समिधाग्निं दुवस्यत, घृतैर्बोधयतातिथिम् । अस्मिन् हव्या जुहोतन" (यजु.सं.१.३.२.)

काष्ठद्वारा तावदग्निं परिचरत । ततो होष्यमाणैः पूर्णाहुतिसम्बन्धिभिर्घृतैरातिथ्यकर्मणार्हणीयमेनं प्रज्वालयत । प्रज्वालिते च तस्मिन्नग्नौ नानाविधानि हवींषि आजुहुत इत्याह ।।१ ।।

हे ऋत्विजः, यूयम्,

"सुसमिद्धाय शोचिषे घृतं तीव्रं जुहोतन । अग्नये जातवेदसे" ।। २.३.२।।

सम्यक्प्रज्वलिताय शोचिष्मते जातप्रज्ञानाय अग्नये ग्रहणोद्वासनाधिश्रयणावेक्षणादिभिः संस्कृतं घृतं जुहुतेत्याह ।।

(अधिश्रयण - heating) अग्निं प्रत्याह -

"तं त्वा समिद्भिरङ्गिरो घृतेन वर्द्धयामसि । बृहच्छोचा यविष्ट्य" ।। ३.३.३. ।।

हे अङ्गिरः निर्दिष्टगुणवन्तं त्वां यज्ञसंबन्धिकाष्ठैः संस्कृतेनाज्येन च प्रवृद्धं कुर्मः । हे युवतम अग्नेः,स त्वमधिकं शोचा - दीप्यस्वेत्याह । 'अङ्गिरा उ ह्यग्निः' इति श्रुतिः(श.ब्रा)

अथाग्निमीक्षमाणः केवलं जपति -

"उपत्वाग्ने हविष्मतीर्घृताचीर्यन्तु हर्य्यत । जुषस्व समिधो मम" ।। ४.३.४।।

हे अग्ने हविर्युक्ता घृताक्ता एताः समिधः त्वां प्रत्युपगच्छन्तु । हे हर्यत, इच्छुक, अग्ने, त्वं ताः समिधः स्वीकुरु इत्याह ।।४।।

अथ आपो हिरण्यमूषाखूत्करः शर्करा इति पंच सम्भारान् सम्पाद्य स्फ्येनोल्लिखितायां शुद्धायां भूमौ तानवस्थाप्य तेषु शुष्ककाष्ठैर्ज्वलतमग्निं भूर्भुवःस्वरिति पंचाक्षराण्युच्चारयन्नादध्यात्, तदिदमाहवनीयाधानम् ।

"भूर्भुवः स्वः द्यौरिव भूम्ना पृथिवीव वरिम्णा । तस्यास्ते पृथिवि देवयजनि पृष्ठेऽग्निमन्नादमन्नाद्यायादधे" ।। ५.३.५. ।।

भूर्भुवः स्वरित्येतास्तिस्रो व्याहृतयः पृथिव्यादिलोकत्रयनामानि। आभिः स्थापयन् लोकत्रयमनेन स्मरति । इध्मपूर्वार्द्धं गृहीत्वा ब्रूते । देवा इज्यन्ते यस्यां तथाविधे हे पृथिवि, तस्या देवयजनयोग्यायास्तवोपरि अन्नादं हुतभोक्तारं गार्हपत्यादिरूपमग्निं स्थापयामि भोक्तुं योग्याय अन्नाय अन्नभक्षणाय वा । यो ह्यग्निर्भूम्ना द्योरिव वर्तते यथा द्यौर्नक्षत्रादिबहुत्वेन युक्ता तथा ज्वालाबहुत्वेन युक्तः ।। यश्च वरिम्णा पृथिवीव स्थितः, यथा पृथिवी सर्वप्राण्याश्रयत्वरूपश्रेष्ठत्वोपेता तथा सर्ववस्तुशोधकत्वरूपश्रेष्ठत्वोपेतः । तादृशमग्निं स्थापयामीत्याह । अथ सर्पराज्ञी कद्रूः पृथिव्यभिमानिनी । तया दृष्टं तृचं सार्पराज्ञी तयाहवनीयमुपतिष्ठते । ततो दक्षिणाग्निमादधाति-

"आयं गौः पृश्निरक्रमीदसददन्मातरं पुरः,पितरं च प्रयन्त्स्वः" (१.३.६.)

"अन्तश्चरति रोचनाऽस्य प्राणादपानती,व्यख्यन् ।। महिषो दिवम्" (२.३.७)

"त्रिंशद्धाम विराजति वाक् पतङ्गाय धीयते, प्रतिवस्तोरहद्युभिः।" (३.३.८)

यज्ञनिष्पत्तये तत्तद्यजमानगृहेषु गन्ता लोहितशुक्लादिबहुविधज्वालोपेतत्वाच्चित्रवर्णश्चायं दृश्यमानोऽग्निराहवनीयगार्हपत्यदाक्षिणाग्निस्थानेषु सर्वतः पादविक्षेपं कृतवान् । तथाहि प्राच्यां दिशि पृथिवीमाहवनीयरूपेण प्राप्तवान् आदित्यरूपेण च स्वर्गे सञ्चरन् द्युलोकमपि प्राप्तवानित्याहा द्यौः पिता पृथिवी माता-इति च श्रूयते बहुधा ।।९।। एवमादित्यरूपेणाग्निं स्तुत्वा वायुरूपेण स्तौति । अस्याग्नेः रोचना काचिच्छक्तिर्वायावाख्या द्यावापृथिव्योर्मद्ये चरति । सा च सर्वशरीरेषु प्राणव्यापरादनन्तरमपानव्यापारं कुर्वती

सति हि जाठराग्नौ जीवनहेतोरौष्ण्यस्य शरीरे सद्भावात् प्राणापानौ प्रवर्तेते तस्मादग्निः प्राणापानरूपः । सोऽयमेव महानग्निः वाय्वादित्याभ्यां स्वशक्तिभूताभ्यामिदं जगदनुगृह्य अनुष्ठातृभ्यो भोगस्थानं द्युलोकं विशेषेण प्रकाशितवान् प्रकाशयति चेत्याह । ''अन्तरिक्षेऽयं तिर्यङ् वायुः पवते'' इति श्रुतिः । अग्निर्वा महिषः स इदं जातो महान् – इति श्रुतिः । अहोरात्रस्य त्रिंशन्मुहूर्ता धामानि भवन्ति । तेषु या वाक् विराजति सा अग्न्यर्थमुच्चार्यते किं च प्रत्यहं या वाक् या च द्युभिः यागपरायणाद्युत्सवभूतैरहोभिः स्तुति लक्षणा वाक् सा सर्वाप्यग्न्यर्थमेव नान्यस्यै देवतायै इत्याह । पतन् गच्छति पतङ्गः । यतो ह्यरण्योः पतन् गार्हपत्यभावं गच्छति, ततः पतन्नाहवनीयतामित्यतोऽग्निः पतङ्गः । अहेति निपातो विनिग्रहार्थः ।।३.८।।

।। इति अग्न्याधानमन्त्रा व्याख्याताः ।।

अथाग्निहोत्रहोममन्त्राः ।

तत्र–प्रदीप्तां समिधमभिलक्ष्य –

''अग्निर्ज्योतिर्ज्योतिरग्निः स्वाहा'' इति सायं जुहुयात् ।।१.३.९।।

सूर्यो ज्योतिर्ज्योतिः सूर्यः स्वाहा इति प्रातर्जुहुयात् ।।२.३.९।।

यस्तु ब्रह्मवर्चसकामः सः –

''अग्निर्वर्चो ज्योतिर्वर्चः स्वाहा'' इति सायं जुहुयात् ।।१.३.९।।

''सूर्यो वर्चो ज्योतिर्वर्चः स्वाहाः'' इति प्रातर्जुहुयात् ।।४.३.९।।

''ज्योतिः सूर्यः सूर्याज्योतिः स्वाहा'' इति वा प्रातर्जुहुयात् (२.३.९)

योऽयमग्निर्देवः स एव दृश्यमानज्योतिः स्वरूपम् । यच्चेदं दृश्यमानज्योतिः तदेवाग्निर्देवः । तस्मै ज्योतीरूपायाग्नये हविः प्रदीयते । इत्याद्याह । ''अग्निमादित्यः सायं प्रविशति, तस्मादग्निर्दूरान्नक्तं ददृशे । उभे हि तेजसी सम्पद्येते, उद्यन्तं वादित्यमग्निरनु समारोहति तस्माद्धूम एवाग्नेर्दिवा ददृशे'' इति तैत्तिरीय श्रुतिः ।।१२।।

अथवा –

''सजूर्देवेन सवित्रा, सजूरात्र्येन्द्रवत्या । जुषाणो अग्निर्वेतु स्वाहा''
इति सायं जुहुयात् । ९.३.१०।।

''सजूर्देवेन सवित्रा, सजूरुषसेन्द्रवत्या जुषाणः सूर्यो वेतु स्वाहा''
इति प्रातर्जुहुयात् ।।२.३.१०।।

सवित्रा देवेन प्रेरकेण परमेश्वरेण समानप्रीतिः, तथा इन्द्रदेवोपेतया रात्रिदेवतया समानप्रीतिरग्निरस्मास्तु प्रीतियुक्तः सन् आहुतिं भक्षयतु तस्मै हविर्दीयते । यथायमग्निः सायं तथा सूर्यः प्रातर्हविर्भक्षयत्वित्याह ।।२।।

।। इति होममन्त्राः ।।

।। अथ उपस्थान मन्त्राः।।

तत्र तावद् बृहदुपस्थानं देवदृष्टम् ।

These mantras are thirty in number. They are distributed as follows.

Āhavanīyaopasthāna	-	9	Mantras
Gavāmupasthāna	-	3	
Gārhapatyopasthāna	-	7	
Gavāmupasthāna	-	2	
Brahmaṇaspatya Japa	-	9	

We shall now present the mantras with Ojha's commentary on them.

सायमाहुत्यां हुतायां यजमान उत्थाय आहवनीयगार्हपत्यावग्नी उपतिष्ठते । तत्र तावदाहवनीयोपस्थानमंत्राः-

उपप्रयन्तो अध्वरं, मन्त्रं वोचेमाग्नये, आरे अस्मे च शृण्वते ।।२.३.११।।

यज्ञमुपगच्छन्तो वयं तस्याग्नेरुद्देशेन मन्त्रं वोचेम-यो हि दूरे अस्मत्समीपे च शृणोतीत्याह ।।१।।

'अग्निर्मूर्धा दिवः ककुत्पतिः पृथिव्या अयम् । अपां रेतांसि जिन्वति' ।।२।३।१२।।

द्युलोकस्योपरिवृत्या शिरः समानः आदित्यरूपेण सर्वोपरि स्थित्या गोस्कन्धसमानः श्रेष्ठो व्रीहिपाकप्रकाशैः पृथिवीस्थानं परिपालकोऽयमग्निः द्युलोकाद्वृष्टिरूपेण पतन्तीनामपां साराणि व्रीहियवादिरूपेण परिणतानि वर्द्धयति-यद्वा अपां कारणानि पुष्णाति आहुतिपरिणामेन वृष्टिं जनयतीत्याह ।।२।।

'उभा वामिन्द्राग्नी आहुवध्या – उभा राधसः सह मादयध्यै । उभा दाताराविषां रयीणां उभावाजस्य सातये हुवे वाम्' ।।३।३।१३।।

हे इन्द्राग्नी, हे आहवनीयगार्हपत्यौ, युवामुभावपि

आह्वातुमिच्छामि । तथा हविर्लक्षणधनात् युवामुभावपि युगपन्मादयितुं हर्षयितुं वेच्छामि। यत उभौ युवामन्नानां धनानां च दातारौ स्थः अत उभौ युवामन्नस्य दानाय आह्वयामीत्याह ।।३।।

अथा आग्नेयास्तिस्रः-

'अयं ते योनिर्ऋत्वियो यतो जातो अरोचथाः । तं जानन्नग्न आरोहाथा नो वर्द्धया रयिम्' ।।४।३।१०।।

हे आहवनीय, अयं गार्हपत्यस्तवोत्पत्तिस्थानमस्ति । योहि सायं प्रातः काले उत्पादनयोग्यत्वादिदानीं ऋतुकालः । यस्माच्च ऋतुकालोपेताद् गार्हपत्यादुत्पन्नस्त्वं कर्मकाले दीप्तोऽभूः । हे अग्ने, तं गार्हपत्यं जानन् पुनरुद्धरणाय कर्मान्ते प्रविश । अनन्तरमस्मदर्थं धनं वर्धय, यतः पुनर्यागं कुर्यामित्याह ।।४।।

अयमिह प्रथमो धायि धातृभिर्होता यजिष्ठो अध्वरेष्वीड्यः । यमप्नवानो भृगवो विरुरुचुर्वनेषु चित्रं विभ्वं विशे विशे ।।५।।

अयमाहवनीयः इह कर्मानुष्ठाने मुख्य इति आधानकर्तृभिराहितोऽभूत् । यतो देवानामाह्वाता अतिशयेन यष्टा सोमयागादिषु ऋत्विग्भिः स्तुतश्चायं भवति । यश्च विविधकर्मोपयोगित्वेनाश्चर्यकारिणां विभुत्वशक्तियुतमपत्यवन्तो भृगुवंशोत्पन्ना मुनयः प्रत्येकयजमानार्थे ग्रामाद्बहिर्यजनाख्यारण्यप्रदेशेषु दीपयन्ति स्म इत्याह ।।५।।

'अस्य प्रत्नाममुद्युतं शुक्रं दुदुह्रे अह्रयः । पयःसहस्रसामृषिम्' ।।६।।

अस्यैवाग्नेःपुरातनीं दीप्तिमनुसृत्य लज्जारहिता दोग्धारः क्षीरदध्याज्यहविःप्रदानादनेकानेक-कर्मसमापिकामृषिं गां शुद्धं पयो दुदुहिरे इत्याह ।। यद्वा - मालिन्याभावेन निर्लज्जाविशुद्धा गावः अस्यैवाग्नेश्चिरन्तनीमात्मानुषक्तां द्युतिं शुक्ररूपमन्नमनुपयो दुदुहिरे । यत्पयः सहस्रशः कर्माणि चातुर्मास्यपशुसोमादीनि सनोति अर्षति चेत्याह । अग्निना शुक्ररूपेण सिक्तं तेज एव गावो दुग्धरूपेण क्षरन्ति । सोऽयमर्थः स्पष्टीकृतो अग्नि होत्रब्राह्मणे -

'तासु हाग्निरभिदध्यौ मिथुन्येऽनया स्यामिति-तां संबभूव-तस्यां रेतः प्रासिञ्चत् । तत् पयोऽभवत्'इति । तासु गोषु ।।६।।

अथ यजुर्मन्त्राः-

'तनूपा अग्नेऽसि तन्वं मे पाहि । आयुर्दा अग्नेऽस्यायुर्मे देहि । वर्चोदा अग्नेऽसि वर्चो मे देहि । अग्ने यन्मे तन्वा ऊनं तन्मे आपृण ।।७।।

जठरे सत्यग्नौ अन्नानि जीर्यन्ते रसासृगादिरूपैः परिणमन्ते चेत्यग्नेः शरीरपालकत्वं सुप्रतिपन्नम् । यावत् कालश्च वपुष्युदरौष्ण्यमुपलभ्यते तावन्न म्रियते इति मृत्युपरिहारेणाग्नेरायुर्दायकत्वं सुप्रतिपन्नम् । यद्दर्शनादेवायं ब्राह्मणस्तपसाग्निरिव ज्वलति इति बुद्धिर्भवति । तदिदं वैदिकानुष्ठानप्रयुक्तं तेजो वर्चः । तच्च वैदिकानुष्ठानमग्निसाध्यमित्यग्नेरेव वर्चोदायकत्वं सुप्रतिपन्नम् । अत एवैतान्यग्नेरिच्छति । हे अग्ने शरीरं पाहि आयुर्देहि वर्चो देहीति । किंच हे अग्ने, मम शरीरस्य यदेवाङ्गं चक्षुरादिकं दृष्टिपाटवादिरहितं तत्सर्वं सर्वतः पूरयेत्याह ।।७।।

इन्धानास्त्वा शतं हिमा,द्युमन्त समिधीमहि । वयस्वन्तो, वयस्कृतं सहस्वन्तः सहस्कृतं, अग्ने सपत्नदम्भनमदब्धासो अदाभ्यम् । चित्रावसो स्वस्ति ते पारमशीय ।।८।।

हे अग्ने, त्वदनुग्रहेण दीप्यमाना वयम् । दीप्तिमन्तं त्वां अन्नवन्तो वयमन्नप्रदातारं त्वां, बलवन्तो वयं बलप्रदातारं त्वां शतवर्षपर्यन्तं प्रज्वालयामः । हे चित्रावसो, हे रात्रे, निरुपद्रवं यथा स्यात्तथा तवान्तं प्राप्नुयामेत्याह । चौरादिवदत्र देवयजने रक्षसां प्रवृत्तिनिवृत्तये 'अग्निप्रतापेनेयं रात्रिः सुखेन मेसमाप्नोतु' इत्याशंसति 'रात्रिर्वै चित्रावसु सा हीयं संगृह्येव चित्राणि वसति' इति श्रुतिः (श.ब्रा)२.३.४.२२) । वसन्ति हि रात्रौ विविधानि चन्द्रनक्षत्रान्धकाररूपाणीति चित्रावसुः सा भवति ।।८।। एतावत् पर्यन्तमुत्थित एवोपतिष्ठेत् । अतः परमुपविश्योपतिष्ठेत् ।

'सं त्वमग्ने सूर्यस्य वर्चसाऽगथाः समृषीणां स्तुतेन । सं प्रियेण धाम्ना । समहमायुषा सं वर्चसा, सं प्रजया सं रायस्पोषेण ग्मिषीय ।।९।।'

हे अग्ने त्वामिदानीं रात्रौ सूर्यस्य तेजसा समगथाः सङ्गतोऽसि । बहव एवोपस्थानादिमन्त्रा अग्निं स्तुवन्तीति तेषां मन्त्राणां स्तोत्रेणापि त्वं संगतोऽसि । एवं प्रियाभिराहुतिश्चासि सङ्गतः । तदित्थं यथा त्वमेतैस्तिसृभिः सङ्गतः, एवमहमपि त्वत्प्रसादात् पूर्णायुषा विद्यैश्वर्यादि प्रयुक्त तेजसा पुत्रादिप्रजया धनसम्पत्या च सग्मिषीयसङ्गतो भूयासमित्याह । 'तद्यदस्तं यन्नादित्य आहवनीयं प्रविशति तेनैतदाह । तद्यदुपतिष्ठते तेनैतदाह । आहुतयो वा अस्य प्रियं धाम ।।' इति श्रुतयः (श.ब्रा.२.३.४.२४।।९।।)

अतः परं यजुर्द्वयेन गां गच्छति ।। हे गाव, यूयं

'अन्ध स्थान्धो वो भक्षीय-मह स्थ महो वो भक्षीय उर्ज स्थोर्जं वो भक्षीय रायस्पोष स्थ रायस्पोषं वो भक्षीय ।।१०।।

क्षीराज्यादिरूपस्यान्नस्य जनकत्वादुपचारेण अन्नरूपाः स्थ । अतो भवत्प्रसादादहं युष्मत् संबन्धि क्षीराज्यादिरूपमन्नं सेवेय । तथा यूयं पूज्यरूपाः स्थ । अतः पूज्यानां युष्माकं प्रसादादहमपि पूज्यत्वं सेवेय । यद्वा - ''यथा गौर्वै प्रतिधुक् तस्यै शृतं तस्यै शरस्तस्यै दधि तस्यैमस्तु तस्या आतश्चनं तस्यै नवनीतं घृतं तस्या आमिक्षा तस्यै वाजिनम् ।।'' इति श्रुत्युक्तानि दशवीर्याणि महः - तद्रूपाः स्थ । अतो युष्माकं तद्वीर्यमहं सेवेय । तथा गोक्षीरादेर्बलहेतुत्वादुपचारेणा यूयं बलरूपाः स्थ । अतो युष्माकं प्रसादाद्बलं सेवेय । एवं क्षीराज्यादिविक्रयेण धनवर्द्धनादुपचारेण धनपुष्टिरूपाः स्थ । अतो युष्माकं प्रसादाद्धनपुष्टिमहं सेवेय इत्याह । प्रतिधुक् तत्कालयदुग्धम् ।

शृतमुष्णदुग्धं, शरो दुग्धमण्डःमस्तु दधिरसः । आतश्चनं दधिपिण्डः । आमिक्षा स्फुटितं दुग्धं । वाजिनमामिक्षाजलम् ।।१०।।

'रेवतीरमध्वमस्मिन् योनावस्मिन् गोष्ठेऽस्मिंल्लाकेऽस्मिन् क्षये इहैव स्त मा पगात' ।।११।।

'पशवो वै रेवन्तः' इति श्रुतिः (श.ब्रा.२.३.४.२६)। हे रेवत्यः, धनवत्यो गावः, अत्र भविष्यति युष्माकमनेकः सञ्चारप्रदेशः। यदीच्छथ, अस्मिन् अग्निहोत्रहविर्दोहनस्थाने विहरत। अस्मिन् यजमानसंबन्धि गोवाटे विहरत । यजमानदृष्टिविषये बहिः संचारप्रदेशेविहरत । रात्रौ वा यजमान गृहे विहरत । तदेवं विहरणप्रदेशानुपलम्भप्रयुक्तावरोधक्लेशो युष्माकं न संभविष्यतीत्यतो यूयमिहैव यजमानसन्निधौ तिष्ठत, नान्यत्र गच्छतेत्याह ।।११।।

अथ गामालभमानो ब्रूते-

संहितासि विश्वरूप्यूर्जामाविश गौपत्येन ।।१२।।

हे गौः, शुक्लकृष्णादि बहुरूपा त्वं क्षीराज्यादिहविर्दानाय यज्ञकर्मभिः संयुक्तासि सा त्वं क्षीराज्यादिरसेन गोस्वामित्वेन च मां सर्वतः प्रविश, त्वत्प्रसादान्मे बहुविधो रसो गोस्वामित्वं च सम्पद्यतामित्याह ।।१२।।

।। अथ गार्हपत्योपस्थानमन्त्राः ।।

अतः परं गार्हपत्याग्निं गत्वोपतिष्ठते-

उप त्वाग्ने दिवे दिवे दोषावस्तर्धिया वयम् । नमो भरन्त एमसि ।।१।

राजन्तमध्वराणां गोपामृतस्य दीदिवम् । वर्धमानं दमे ।।२।।

स नः पितेव सूनवेऽग्ने सूपायनो भव । सचस्वा नः स्वस्तये ।।३।।

हे अग्ने, अग्निर्हि रात्रिं प्रविवेशेति श्रोतेतिहासः। हे दोषावस्तः रात्रौ वसनशील, गार्हपत्य वयं यजमानाः श्रद्धायुक्तया बुद्ध्या नमस्कारमावहन्तः प्रतिदिनं त्वामुपैमः त्वां प्रत्यागच्छामः इत्याह । किञ्च दीप्यमानं यज्ञानां गोप्तारं सत्यलक्षणव्रतस्य दीपयितारं मदीये निजे गृहे चातुर्मास्यसोमपश्वादिभिवृद्धिं गच्छन्तं त्वामुपैम इत्याह । हे अग्ने, गार्हपत्य, स ईदृशगुणयुक्तस्त्वमस्माकं सुखेनोपैतुं शक्यो भव । यथा पिता पुत्राय निर्भयमुपगम्यते । किञ्च अस्माकं क्षेमाय कर्मणा समवेतो भव । यथा पिता पुत्रस्य कल्याणे व्यापृतो भवति दुःखादित्राणाय च तैर्निश्शङ्कमाश्रीयते तथैव त्वमस्मदर्थे भवेत्याह ।।१४।।

अग्ने त्वं नो अन्तम उत त्राता शिवो भवा वरूथ्यः ।।१।।

वसुरग्निर्वसुश्रवा अच्छा नक्षि द्युमत्तमं रयिं दाः ।।२। १५।।

तं त्वा शोचिष्ठ दीदिवः सूम्नाय नूनमीमहे सखिभ्यः ।।३।।

स नो बोधि श्रुधी हवमुरुष्याणो अघायतः समस्मात् ।।४। १६।।

हे अग्ने, गार्हपत्य, त्वमस्माकं समीपवर्ती भव - अपि च पालयिता, शान्तः गृहाय हितो भव । हे अग्ने त्वं जनानां वासयिता धनेन च कीर्तिमानसि । स त्वमच्छानक्षि अभिव्याप्नुहि । यद्वा हे अच्छ । निर्मलाग्ने, अस्मद्धोमस्थानं गच्छ । किं च अतिदीप्तियुक्तं धनं देहि । हे दीप्तिमत्तम हे सर्वस्य दीपयितः, तं पूर्वोक्तगुणयुक्तं त्वां सखिभ्योऽर्थाय सूम्नाय सुखाय निश्चयेन याचामहे । यद्वा सुखार्थं अस्मत्सखीनामुपकाराय च त्वामीमहे । स त्वमस्मान् बुध्यस्व, तथास्मदीयमाह्वानं शृणु, सर्वस्मादेव शत्रोरस्मानुरुष्य, परिरक्षेत्याह ।

अथ गां गच्छति-

इड एह्यदित एहि । काम्या एत मयि वः कामधरणं भूयात् ।।१७।।

हे इडे आगच्छ । हे अदिते आगच्छ होमस्थानम् । अतिदेशोऽयम् । हे गौः, इडा यथा मनुं तथा त्वमस्मानेहि । अदितिर्यथा आदित्यान् तथा त्वमस्मानेहीत्याह । इडा मनोर्दुहिता अदितिर्देवमाता । अथ गामालभमानो ब्रूते - हे काम्याः, सर्वैः कामयितव्याः । गावः यूयमागच्छत । युष्माकं कामधरणमपेक्षितफलधारकत्वं मयि भूयात् । युष्मत्प्रसादादहमभीष्टफलधारयिता भूयासमित्याह ।। यद्वा, मयि युष्माकमनुरागस्थितिर्भूयादित्याह । तथा च श्रुतिः

'अहं वः प्रियो भूयासमिति' (श.ब्रा.२.३.४.३४) १७।।

अथ व्रतोपायनवदपरेणाहवनीयं प्राङ्तिष्ठन् नवर्चं जपति-

सोमानं स्वरणं कृणुहि ब्रह्मणस्पते, कक्षीवन्तं व औशिजः ।।१।।

यो रेवान् यो अमीवहा, वसुवित् पुष्टि – वर्द्धनः, स नः सिषक्तु यस्तुरः ।।२।।

मा नः शंसो अररुषो, धूर्त्तिः प्रणङ्मर्त्यस्य, रक्षाणो ब्रह्मणस्पते ।।३।। (ऋ.वे१.१८.१,२,३)

हे ब्रह्मणस्पते, वेदस्य पालक, उशिजो गर्भजातं दीर्घतमस औरसं कक्षीवन्तमृषिं, सोमानामभिषेतारं शब्दयितारं कुरु । अतिदेशोऽयम् । कक्षीवन्तमिव मां सोमयागकर्तारिं स्तोतारं कुर्वित्याह ।।१।। यो ब्रह्मणस्पतिर्धनवान् यश्च रोगस्य हन्ता । धनज्ञाता पोषकः । यश्च तुरो वेगशीलोऽविलम्बितकारी । स ब्रह्मणस्पतिरस्मान् सेवताम् इत्याह । यद्वा धनवान् व्याधिहन्ता धनोपार्जकः पोषकः शीघ्रकारी च पुत्रोऽस्मान् सेवतामित्याह ।।२।। हे ब्रह्मणस्पते, अस्मान् रक्ष । येन केनचिदपि हविर्दानमकृतवतः मनुष्यस्य द्रोहो हिंसा चास्मान् न व्याप्नुयात् नाशयेद्वा इत्याह ।।३।। रसौ स ररिवान् तस्यायं प्रतिषेधः । शंसोऽनिष्टचिन्तनं धूर्तिहिंसा ।।२०।।

'महि त्रीणामवोऽस्तु द्युक्षं मित्रस्यार्यम्णः दुराधर्षं वरुणस्य ।१।

नहि तेषाममा चन, नाध्वसु वारणेषु ईशेरिपुरघशंसः ।।२।।

ते हि पुत्रासो अदितेः प्रजीवसे मर्त्याय । ज्योतिर्यच्छन्त्यजस्रम् ।।३।।

मित्रस्यार्यम्णो वरुणस्येति त्रयाणां देवानां सम्बन्धि महद्रक्षणं भवतु, यत् प्रकाशाश्रयं तिरस्कर्तुमशक्यश्च इत्याह ।।१।। वारणप्रधानेषु चोर व्याघ्रादि भयाढ्येषु मार्गेषु गच्छतां नापि वा गृहेष्वपि सतां तेषां मित्रवरुणार्यमपालितानामस्माकं गृहेऽरण्ये वा नास्ति शत्रुबाध इत्याह ।।२।। यतस्ते मित्रार्यमवरुणाः अखण्डितशक्तेर्देवमातुः पुत्रा मनुष्याय यजमानाय जीवितुं निरन्तरमनुपक्षीणं तेजः प्रयच्छन्ति ततो नः पूर्वोक्तशत्रुबाध इत्याह ।।३।। अयं तृचः पथि जप्त उपद्रवनाशको भवति ।।२३।।

'कदाचन स्तरीरसि, नेन्द्र सश्चसि दाशुषे

उपोपन्नेषु मघवन् भूय इन्नु ते दानं देवस्य पृच्यते ।।२४।। (ऋ.वे. ९.४९.७)

हे इन्द्र, परमैश्वर्ययुक्त त्वं कदापि हिंसको, नासि। किन्तु हविर्दत्तवन्तं यजमानं सेयसे । हे मघवन् ! धनयन् ! प्रकाशमानस्य तव बहुतरमेव दानं क्षिप्रमेव दाश्वांसमुपोपृच्यते । न कादाचिद् यजमानं प्रति क्रुध्यसि, सेवसे च तं, त्वदीयं भूयो धनं दाश्वांसमुपगच्छति ।। इत्याह । इदेवार्थः । नु क्षिप्रार्थः ।।२४।।

'तत्सवितुर्वरेण्यं भर्गो देवस्य धीमहि । धियो यो नःप्रचोदयात् ।।२५।।

तस्य सवितुः सर्वप्रेरकस्य देवस्याराध्यं वीर्यं ध्यायामः योऽस्माकं बुद्धिः कर्माणि वा प्रेरयतीत्याह ।

'वरुणाद्ध वा अभिषिषिचानाद् भर्गोऽपचक्राम-वीर्यं वै भर्गः' - इति श्रुतिः (श.ब्रा.५.४.५.१) मण्डलं पुरषो रश्मय इत्यपि त्रयं भर्गः शब्दाभिधेयम् ।।२५)

परि ते दूडभो रथोऽस्मानश्नोतु विश्वतः। येन रक्षसि दाशुषः ।।

हे अग्ने, दुर्दभः केनापि सहसा हिंसितुमशक्यस्तव रथो अस्मान् सर्वतःपर्याप्नोतु । येन रथेन त्वं दाशुषो यजमानान् पालयसि । 'यजमाना वै दाश्वांसः' इति श्रुतिः। (श.ब्रा.२.३.४.३८) ।।२६।।

।। इति बृहदुपस्थानं समाप्तम् ।।

अथ क्षुल्लकोपस्थानम् ।। (आसुरिदृष्टम्)

(Condensed version of Upasthāna is called क्षुल्लक.)

भूर्भुवः स्वः सुप्रजाः प्रजाभिः स्यां, सुवीरो वीरैः सुपोषः पोषैः' ।।१ ।।

'नर्य्य प्रजां मे पाहि । शंस्य पशून्मे पाहि, अथर्व पितुं मे पाहि' ।।२ ।।

हे अग्ने गार्हपत्य, आहवनीय वा, त्वं व्याहृतित्रयात्मकः लोकत्रयात्मको वासि । अतस्त्वत्प्रसादादहं प्रजाभिर्बन्धुभृत्यादिरूपाभिः कृत्वा सुप्रजा भवेयम् । तथा पुत्रैः सत्पुत्रवान् भवेयम् । एवं पोषकसामग्रीभिर्हिरण्यादिद्रव्यैः सुपुष्टो भवेयमित्याह ।।१ ।।

अथ यजमानो यदि ग्रामान्तरं गन्तुमिच्छति तदानीं सर्वानग्नीनुपतिष्ठेत तदिदं प्रवत्स्यदुपस्थानमुच्यते, तथाहि हे नर्य्य नरेभ्यो हित, गार्हपत्य, मम प्रजां रक्षेत्याह । हे शंस्य, अनुष्ठातृभिः प्रशंसनीय, आहवनीय, मम पशून् रक्षेत्याह । हे अथर्य्य सततं गार्हपत्यात् स्वस्थानं प्रति गमनशील, दक्षिणाग्ने ममान्नं रक्षेत्याह ।।२ ।।

वरणीयश्च स ऋत्विग् ब्राह्मण एवं स्यान्न क्षत्रियो वैश्यो वा। ऋत्विजां यज्ञोच्छिष्टेडाप्राशित्र-भक्षणास्यावश्यकत्वात्। क्षत्रियवैश्ययोस्तु तत्प्रतिषेधात्। श्रूयते हि "अग्निहोत्रोच्छिष्टं नाब्राह्मणः पिबेद् ; अग्नौ ह्यधिश्रयन्ति । न राजन्यो वैश्यो वा सांनाय्यं पिबेद् ; असोमपीथी ह्येषः" – इति ।। तस्माद् ब्राह्मणा एव ऋत्विक् स्यान्नत्वन्यः। तत्रापि–ऋत्विगार्षेयोऽनूचानः साधुचरणो वाग्मी अन्यूनाङ्गोऽनतिरिक्ताङ्गो द्वयसमश्चानतिकृष्णोनतिश्वेतः – इति लाट्यायनोक्त एव यज्ञं सम्पादयितुमधिकारी भवति । "एष है ब्राह्मण ऋषिरार्षेयो यः शुश्रुवान्" इति तैत्तिरीयश्रुतेः (कां ६ प्र० ६) "यो वै ज्ञातोऽनूचानः स ऋषिः" इति शतपथश्रुतेः। "ऋषयो मन्त्रद्रष्टारः" इति निरुक्त स्मृतेश्च साक्षात्कृतविद्य ऋषिः। ऋषेरपत्यमार्षेयः। लाट्यायनीयवृत्तिकृदग्निस्वामी त्वाह – "ऋषिर्दर्शनात्" । "स्तोमान्ददर्श"त्यौपमन्यवः। "तद्यदेनांस्तपस्यमानान् ब्रह्म स्वयम्भु अभ्यानर्षत् तदृषीणामृषित्वमिति विज्ञायते" । आ दशमात् पुरुषादव्यवच्छिन्नमार्षं यस्य आर्षेयः। विद्यासम्प्रदानं कृतवान् सोऽनूचानः। यो हि संस्कृतां वाचमुच्चारयति, बहुतरं वचनमनर्थकं यो न भाषते, मतिद्वैधे उत्पन्ने यः संशयच्छेत्ता, यो हि पृष्टः सन् न्यायेन प्रतिवचनं ददाति, सर्वथा यः प्रतिवचनसमर्थः स्यात् स वाग्मी। समुद्रोपज्ञलक्षणशास्त्रप्रतिपन्नप्रमाणवन्ति यस्य गात्राणि भवेयुः, स एषोऽन्यूनाङ्गानतिरिक्ताङ्गः कुणिपङ्गुबधिरादिभिन्नो, द्व्यङ्गुष्ठादिभिन्नश्चेति वा । द्वयोरपि वामदक्षिणाभागयोः समप्रमाणो द्वयसमः। अथवा – "अधश्चोर्द्ध्वश्च नाभेस्तु समो यस्मात्प्रमाणतः। पादाङ्गुष्ठाङ्गविष्टब्धः स वै द्विसम उच्यते" इति ।

अतिकृष्णो दग्धाङ्गारसदृशः अतिश्वेतस्तु पाण्डुवदाभासः प्रकृतिविलक्षणः। अग्निस्वामी त्वाह – "बालः कृष्णो वृद्धः श्वेतः। षोडश वर्षात् प्रागतिबालः, अशीतेरर्ध्वमतिवृद्धः" इति । अथ "व्याधितस्यातुरस्य यक्ष्मगृहीतस्यानुद्देश्याभिशस्तस्य[1] क्षिप्तयोनेश्चार्त्विज्यमकार्य्य" मित्याश्वलायनः प्राह।।

"त्रीणि यस्यावदातानि विद्या योनिश्च कर्म्म च। स ब्राह्मणः स आर्त्विज्ये वरणीयो न चेतरः।"

इति याज्ञिकसिद्धान्ताद् विद्याकर्मवत्कुलतोपि ब्राह्मणाः परीक्षणीया भवन्ति । तथा च तेषां परीक्षणीयार्थाः षोढा निर्दिश्यन्ते –वर्णः, गोत्रं, प्रवरः, वेदः, शिखा, सूत्रं चेति । तत्राद्यास्त्रयः प्रथमजन्मसिद्धाः। उत्तरास्त्रयो व्रतबन्धाख्यद्वितीयजन्मसिद्धाः । यथाऽहं वर्णतो ब्राह्मणः; तस्य मे शाण्डिल्यं गोत्रम् ; शाण्डिल्यासितदेवलेति प्रवरास्त्रयः। सामवेदः, कौथुमीशाखा, गोभिलसूत्रं चेति । वेदशाखासूत्राणां परिचयार्थं वेदशिखासूत्राणि विशेषलक्षणलक्षितानि ध्रियन्ते । वेदःकुशमुष्टिरङ्गुलीयकरूपेण हस्ते ध्रियते। शाखालक्षणभूता शिखा क्रियते। सूत्रपरिचयार्थं यज्ञोपवीतसूत्रम् । एतेषु ये विशेषास्तेऽन्यत्र निरूपिताः । भवन्ति चात्र श्लोकाः–

---

1. अनेहेशयाभिशस्तः = उद्देश्यमन्तरा संजातापवादः, न तु केनचित् कस्मैचित्प्रयोजनाय कृतामिथ्यापवादः ।

त्रीणि यस्यावदातानि विद्या कर्म्म च जन्म च । स ब्राह्मणो भवेदृत्विक् स पारयति पारगः ।।१ ।।
वर्णगोत्रप्रवरणैर्लक्ष्येते जन्मकर्म्मणी । वेदः शाखा च सूत्रं च कुले विद्यां प्रचक्षते ।।२ ।।
वेदः शिखा च सूत्रं च कुलकर्म्माभिचक्षते । एवं कुले प्रतीतं तु व्यक्तिदोषे परीक्षयेत् ।।३ ।।
कुलशुद्धं व्यक्तिशुद्धं तमार्त्विज्ये नियोजयेत् । य एवोभयथा शुद्धः स प्रभुर्दैविके युगे ।।४ ।।

एषां च ऋत्विजां सर्वकर्म्मसाधारण्येनैकसंख्यानियमो नास्ति । कार्यानुरोधेन यथोपयोगं न्यूनाधिकानां वरणस्यार्थसिद्धत्वात् । अत एव तैत्तिरीयब्राह्मणे (२ । ३ । ६) अग्निहोत्रस्यैक ऋत्विक् । दर्शपूर्णमासयोश्चत्वारः । चातुर्मास्यानां पञ्च । पशुबन्धस्य षट् । सौम्यस्याध्वरस्य सप्त । संवत्सरस्य सत्रसोमस्य सर्वे भवन्ति । ते च दश इति कर्मभेदेनैषां न्यूनाधिकसंख्या श्रूयते । तत्र कर्मसौकर्यमधिकृत्यैव सा सा संख्या पठ्यते । न तु न्यूनातिरेके सति यज्ञादृष्टेऽपि कश्चन विशेषोऽस्ति । त इमे दशहोतारः, चतुर्होतारः, पञ्चहोतारः, षड्ढोतारः, सप्तहोतारः - इत्येते पञ्चापि चतुर्होतार इत्येकेन संज्ञाशब्देन व्यपदिश्यन्ते; चिरन्तनव्यवहारादिति बोध्यम् ।

प्राधान्येन तावद्विद्याभेदाच्चत्वार एव ऋत्विजः क्रियन्ते। होता, अध्वर्युः उद्गाता, ब्रह्मा चेति । ननु त्रयी विद्या श्रूयते च चतुष्टयी । तत्र ऋचा हौत्रं क्रियते, यजुषाऽध्वर्यवम्, साम्नौद्गात्रम्, अथ केन ब्रह्मत्वं क्रियत इति चेत् त्रय्या विद्यया इति विद्यात् । वाक् च मनश्चेति द्वे यज्ञवर्तन्यौ भवतः । तत्र वाचा होत्रादयस्त्रयो यज्ञं वर्तयन्ति । ऋचा होता, साम्नोद्गाता, यजुषा त्वध्वर्युरिति । तेनार्धं सम्पद्यते । अथार्धं मनसा संपाद्यं ब्रह्मैको वर्तयति - ऋचा च साम्ना च यजुषा च। तस्माद्यस्तिस्रो विद्या जानाति स ब्रह्मा भवति । स विद्योत्कर्षात्तेषामेकैकविद्यानां होत्रादीनामादेशकः श्रेष्ठः प्रतितिष्ठति । "एष ब्रह्मा य ऋत्विय इन्द्रोनाम श्रुतो गृणे" इति श्रुतावृत्विजामिन्द्रत्वेन ब्रह्मणः स्तुतेः । तदित्थं होता ऋग्वेदी, उद्गाता सामवेदी, अध्वयुर्यजुर्वेदी, ब्रह्मा तु त्रिवेदीति सिद्धम् । तत्र होता ऋचा कर्तव्यं शंसति । अध्वर्युर्यजुषा यजति जुहोति च । उद्गाता साम्ना गायति । ब्रह्मा तु सर्वेषां कर्मणां प्रत्यवेक्षणं करोति । सर्वेषां च कर्म्मापचारे स प्रायेण प्रायश्चितं करोति। इत्येवमेषां प्राधान्येन कर्माणि ।

ननु यो यजति स जुहोति । तथा चाध्वर्योरिव होतृशब्देन व्यपदेशोऽवकल्पत इति चेत्सत्यम् । जुहोति स होतेति नेह व्युत्पत्तिरिष्यते; अपि तु यो यजनीयान् देवानाह्वयति स होतेति होतुर्व्युत्पत्तिर्द्रष्टव्या । तदाहुः- "यदन्यो जुहोति । अथ योऽनुचाह यजति च कस्मात् तं होतेत्याचक्षते इति । यद्भाव स तत्र यथा भाजनं देवता अमुमावह अमुमावहे त्यावाहयति तदेव होतुर्होतृत्वम्" इत्यैतरेयश्रुतेः (१ । २ । २) ।

अथ ज्योतिष्टोमादीनां कर्मणामतिविस्तृतार्थतया पुरुषबहुत्वसापेक्षत्वात् तेषां होत्रादीनां चतुर्णां स्वस्वकर्मसु सहकारिणस्तदनुयायिनस्त्रयस्त्रयः पुरुषा नियुज्यन्ते । ते च तत्तत्समानवेदा व्यवस्थितकर्माणश्चेष्यन्ते । यथा - होतुस्त्रयः पुरुषाः- मैत्रावरुणः, अच्छावाकः, ग्रावस्तोता चेति । अध्वर्योस्त्रयः - प्रतिप्रस्थाता, नेष्टा, उन्नेता चेति । उद्गातुस्त्रयः-प्रस्तोता, प्रतिहर्ता, सुब्रह्मण्यश्चेति । ब्रह्मणश्चैवं त्रयः- ब्राह्मणाच्छंसी, अग्नीध्रः पोता चेति । अग्निध्र एवायमग्नीध्रः, आग्नीध्रः, अग्नीदिति चोच्यते । एवं-ग्रावस्तोतैव ग्रावस्तुत् । एवं मैत्रावरुणस्य प्रशास्ता इति संज्ञान्तरम् । त एते होत्रादीनां त्रयस्त्रयः पुरुषा होत्रका अभिधीयन्ते । "होत्रादयस्तु चत्वारो मध्यतः कारिणो मताः ।"

एषु चतुर्षु वर्गेषु ये प्रथमा होत्रध्वर्यूद्गातृब्रह्माणस्ते पूर्णां दक्षिणामर्हन्ति । ये द्वितीया मैत्रावरुणादयस्ते प्रथमदक्षिणापेक्षया अर्धं दक्षिणां लभन्ते । तस्मादर्धिनः । तृतीयास्त्वच्छावाकादयः प्रथमदक्षिणापेक्षया तृतीयंशं दक्षिणां लभन्ते । तस्मात्तृतीयिनः । चतुर्थास्तु ग्रावस्तुदादयः – प्रथमदक्षिणापेक्षया चतुर्थमंशं लभन्ते । इत्यतस्ते पादिन उच्यन्ते ।

१	होता	अध्वर्युः	उद्गाता	ब्रह्मा	इति प्रथमाः	(१)	४)
२	प्रशास्ता	प्रतिप्रस्थाता	प्रस्तोता	ब्राह्मणाच्छंसी	इति अर्धिनः	(।।)	२)
३	अच्छावाकः	नेष्टा	प्रतिहर्त्ता	अग्नीध्रः	इति तृतीयिनः	(।..।)	२।..।)
४	ग्रावस्तोता	उन्नेता	सुब्रह्मण्यः	पोता	इति पादिनः	(।)	१)
१६	ऋग्वेदिनः	यजुर्वेदिनः	सामवेदिनः	त्रिवेदिनः	ऋत्विजः	दक्षिणा प्रत्येकस्य	दक्षिणा चतुष्टयस्य

तानेतानुक्त क्रमेण स स पुरुषः संस्क रोति । तद्यथा – अध्वर्युर्गृहपतिं दीक्षयित्वा ब्रह्माणं दीक्षयति । तत उद्गातरम् , ततो होतारम् ।

ततः प्रतिप्रस्थाता गृहपतिं दीक्षयित्वाऽर्धिनो दीक्षयति । ब्राह्मणाच्छंसिनम्, प्रस्तोतारम्, मैत्रावरुणम् ।

ततो नेष्टा गृहपतिं दीक्षयित्वा तृतीयिनो दीक्षयति – अग्नीध्रम् , प्रतिहर्तारम् , अच्छावाकम् ।

अथोन्नेता गृहपतिं दीक्षयित्वा पादिनो दीक्षयति – पोतारम् , सुब्रह्मण्यम् , ग्रावस्तुतम् ।

ततस्तमन्यो ब्रह्मणो दीक्षयति । तेनैतक्षतुर्वर्गचतुष्टयेऽध्वर्यु वर्गस्थाश्चत्वारः पुरुषाः दीक्षायितार उच्यन्ते।

होताऽध्वर्युरुद्गाता ब्रह्मा वा सर्व एवार्षेयानुचानादिपूर्वोक्तगुणविशिष्टा एव योग्या इष्यन्ते । ते च प्रत्येकं त्रिभिस्त्रिभिः स्वैः स्वैः पुरुषैरुपेताः स्वयमप्याहिताग्नयः प्रथमयज्ञेनाग्निष्टोमेनेष्ट्वा गृहपतिसंज्ञकेन सप्तदशेन सहिता द्वादशाहादिसत्रार्थं दीक्षित्वा स्वस्वसंबन्धिनोऽग्नीनेकत्र स्थापयित्वा गृहपतिप्रधाना अग्निष्टोमादिभिरेकाहैर्द्विरात्रादिभिरहीनैश्च यागैर्यथायथं सत्राणि संपादयेयुः ।

त इत्थं षोडश ऋत्विजः सिद्धाः । ननु सौम्यस्याध्वरत्य यज्ञक्रतोः सप्तदशर्त्विज इति हि श्रूयते, न षोडशैवेति चेत् । सत्यम् । तत्र हि "यजमानसप्तदशा ऋत्विजो भवन्तीति" उक्तेः सप्तदशोऽयं यजमानो द्रष्टव्यः । तस्यापि ऋतुयाजकत्वेन ऋत्विक्त्वाविशेषात् । ऋत्विक्च्छब्दोहि ऋतुयाजके व्युत्पन्नो न दक्षिणाक्रीते । तेन यजमानेऽपि स शब्दो न विरुद्धयते । यजमानपत्नी तु यजमानान्नातिरिच्यते । केचित्वाहूः- सदस्य सप्तदशा ऋत्विजो भवन्तीति । तदसत् । सदस्यवस्थितस्य जातवरणस्यापि दक्षिणाभाजोऽपि सदस्यस्य ऋत्वियत्वानभ्युपगमात् । न हि सदस्यः किञ्चिदपि कर्म कर्तुमधिक्रियते । तादृशविध्यदर्शनात् । क्रियां विना च ऋत्विक्शब्दस्याप्रयोगात् । ननु "सदस्यं सप्तदशं कौशीतकिनः समामनन्ति, स कर्मणामुपद्रष्टा भवति" इत्येवमाश्वलायनेन कौशीतकश्रुत्यनुरोधाद् ब्रह्मणो द्रष्टृत्वेऽस्योपद्रष्टृत्वं स्मर्यते । तथा च ब्रह्मणा इवास्यापि दर्शनकर्मविनियोगादृत्विक्त्वमुपपद्यते उपस्थानप्रसर्पणादिकर्मयोगाच्चेति चेन्न । ईदृशदर्शनस्यान्तर्वेदिकर्म्मत्वाभावाद्, विधेयाननुगमाच्च । ब्रह्मणस्तु दर्शनातिरिक्तं प्रायश्चित्तीयहोमादि-कमनुज्ञादानादि विधेयानुगतमप्यस्ति कर्म्मेति नाव्याप्तिः । उपस्थानादिकानां तु ऋत्विक्त्यप्रयोजकत्वं नास्तीत्यदोषः । किञ्च "संपत्सु न शून्यं सदःकुर्यात्" इति वदता लाट्यायनेन सवनसंस्थासु सर्पणेषु, सर्पत्सु

च ऋत्विग्यजमानेषु सदस्येवावस्थानं सदस्यस्योपदिश्य ऋत्विग्भ्यः पृथग्धर्मत्वमाख्यायते । तस्मादयं सदस्य ऋत्विग्भ्योऽन्योऽष्टादशः पुरुषो द्रष्टव्यः । तस्य पृथग्वरणाम्नानाच्च । परे त्वाहुः- षोडशानामेवर्त्विजामनृत्विजाऽपि यजमानेन गृहपतिना सदस्येन वा सप्तदशसंख्यापूरणं न विरुद्ध्यते इत्यतो नर्त्विजां सप्तदशत्वमापद्यते इति । युक्तं चैतत् । अन्यथा रहस्यब्राह्मणे ऋत्विजां सप्तदशत्वप्रतिषेधश्रुतिर्व्याकुप्येत । तत्र हि – "तस्मा एतस्मै सप्तदशाय प्रजापतये एतत् सप्तदशमन्नं समस्कुर्वन् – य एष सौम्योऽध्वरः । अथ या अस्य ताः षोडशकलाः एते ते षोडशर्त्विजः । तस्मान्न सप्तदशमृत्विजं कुर्वीत, नेदतिरेचयानोति" इत्यादिना सप्तदशत्वस्यातिरिक्तत्वरूपेण विनिन्द्य प्रत्यक्षं प्रतिषेधः श्रूयते । अत एव सोमप्रवाकोऽप्यन्य एव ऋत्विग्भ्यः । तस्य वरणपूर्वककर्मानधिकारात्, अवृतानामृत्वियक्त्वायोगात् । तथा हि-सोमेन यक्ष्यमाणो यजमानो यदि सन्निधावुपस्थितम् कश्चनार्त्विज्यगुणविशिष्टं ब्राह्मणं नोपलभ्यते, तदा तं तमृत्विजं वरीतुं यं कञ्चन पुरुषं प्रेषयति स सोमप्रवाको नाम । मदीयो यजमानः सोमेन यजते स त्वां प्रत्यार्त्विज्यमर्थयते – इत्येवं सोमयागवृत्तान्तमृत्विजे प्रवक्तीति सोमप्रवाकः । स च सति सम्भवे ऋत्विग्भ्योऽन्य एव स्यादित्युक्तम् । अनादेशे तूद्गातैव स्यादिति नियम्यते । अथ ये चमसाध्वर्यवो[2] दश भवन्ति, तेऽप्यन्य एव ऋत्विग्भ्य इत्याहुः । केचित्तु तेपामृत्विक्षु सन्निवेशमाहुः । एवं परिकर्मिणामप्यवृतत्वादनृत्विक्त्वमेव । "शमितार उपेत न यज्ञम् ।" 'शामितारमुपनयीत यज्ञम् ।" इत्यादिषु श्रुताः शमितारस्तु ऋत्विग्भ्यो नातिरिच्यन्ते । "पराङावर्ततेऽध्वर्युः पशोः संज्ञप्यमानात्" इति श्रुत्याऽध्वर्योः परावृत्तिश्रवणादध्वर्युपुरुषेषु प्रतिप्रस्थात्रादिष्वेव स्थलविशेषे शमितृशब्दप्रयोगात् । तेषामयं संज्ञाभेदः पशुसंज्ञपनयोगादुपपद्यते । एवमुपगोऽपि नोक्तेभ्योऽन्यः । उपगातृत्वयोगादुक्तानामेवर्त्विजां संज्ञाभेदेन व्यवहारात् । अतएव "नाध्वर्युरुपगायेत्" इति प्रतिषेधोऽर्थवान् भवति । एवमुपवक्तापि नान्यः, हविःकृदपि नान्यः, आग्नीध्रस्यैव कर्मभेदे संज्ञाभेदात् । स हि सोमे सवनीयनिर्वापप्रभृतिपुरोडाशाद्यासादनान्तं हविःसंपादनं करोति । सोमाङ्गभूते च प्रवर्ग्याख्ये कर्मणि रौहिणसंज्ञकपुरोडाशाधिश्रपणादि कर्म करोति । ऐष्टिकादावप्यध्वर्युकर्तव्ये हविःसंपादने सहायतां करोति । तेनायं हविष्कृदुच्यते । तदित्थमृत्विजः षोडशैव संसिद्धाः । तेषां कानिचित्कर्माण्युदाहरामः । "ऋचां त्वः पोषमास्ते पुपुष्वान् गायत्रं त्वो गायति शयकरोषु । ब्रह्मात्वा वदति जातविद्यां यज्ञस्य मात्रां विमिमीत उत्वः ।" इति ।

अपि च-

(१)

होता – प्रातरनुवाकमनुब्रूते

प्रशास्ता – प्रेष्यति

अच्छावाकः – यजति

ग्रावस्तुत् – ग्रावस्तोत्रीयमन्वाह ।

(३)

उद्गाता – उद्गायति

प्रस्तोता – प्रस्तौति

प्रतिहर्ता – प्रतिहरति

सुब्रह्मण्यः – सुब्रह्मण्यामाह्वयति ।

2. चमासाध्वर्यव इति । शुक्रामन्थिग्रहयागे "अध्वर्युर्जुहोति, तदनु प्रतिप्रस्थाता, तदनुचसाध्वर्यवः ।" इति श्रुति व्याचक्षाणाः सायण आह – "यद्यप्यत्र सौमिका एव ऋत्विजश्चमससंवंधाच्चमसाध्वर्यव इति व्यपदिश्यन्ते इति प्रतीयते । तथापि मध्यतः कारिणां चमसाध्वर्यवो, होत्रकणां चमसाध्वर्यव इति षष्ठ्या भेदप्रतीतेरन्य एव चमसाध्वर्यवः । न चवै 'शमिते' त्यत्रापि यौगिक्याः सज्ञाया अनाश्रयणादन्य एव स्यादिति शंक्यम् । वैषम्यात् । तत्र हि वरणां नास्ति । अत्र च पुनः चमसाध्वर्यून् वृणीते इति वरणमास्ति । षष्ठी च भेदस्य ज्ञापिकेति वैषम्यम्" इति ।

(३)
अध्वर्युः - पुरो विभजति
प्रतिप्रस्थाता - मन्थिनं जुहोति
नेष्टा - पत्नीमुदानयति
उन्नेता - चमसानुन्नयति ।

(४)
ब्रह्मा - प्रत्यवेक्षते
ब्राह्मणाच्छंसी - ....
आग्नीध्रः - अग्निमिन्धे
पोता............।

अन्यानि च बहूनि कर्म्माण्येषामेकैकस्य श्रूयन्ते तानि तत्र तत्र प्रयोगे वक्ष्यामः ।

इति ऋत्विक्सम्पत्तिः ।

अथ परिकर्मिसम्पत्तिः ।

अथ यो यजमानक्रीतः परार्थं बहिर्वेदिकर्म्म करोति सोऽनृत्विक् । तद्यथा-सदस्यः, सोमप्रवाकः, परिकर्मिणश्च । तत्र सदस्यः सदस्यवस्थितो विध्युपद्रष्टा कर्म्मसाक्षी सदः शोभयति । सति सन्देहे स कर्म्मणो मीमांसां करोति । 'सदस्य एवमेव धिष्णयानुपतिष्ठन् ब्रह्माणमनुप्रविशेद् , ब्राह्मणाच्छंसिनं वा । तेनास्य समुपहवः स्याद् , भक्षश्च समानः । बीभत्सेयातां चेन्नाना चमसौ स्याताम् । तस्य दधिभक्षान्नं कर्म्म' इति वदता लाट्यायनेन तस्य कर्मकाले ब्रह्माणमनु, ब्राह्मणाच्छंसिनमनु वा संनिवेशो विधीयते । सदस्यः, सभासत् , सभास्तारः, सभ्यः सामाजिक इत्येकार्थाः । तेषामिह प्रकरणवशात् कर्म्मसाक्षिणि वृत्तिः। सोमप्रवाको व्याख्यातः ऋत्विग्यजमानभिन्नपुरुषाणां कर्तव्यतया विहितान्यङ्गसंस्कारकर्माणि परिकर्मशब्देनोच्यन्ते । तत्र नियुक्ताः पुरुषाः परिकर्मिणः । इति परिकर्मिसम्पत्तिः ।

तदित्थम्-प्रधानाः, ऋत्विजोऽनृत्विजश्चेति यज्ञनिर्वाहका ब्राह्मणा व्याख्याताः ।

इति याजकब्राह्मणाधिकारः

अथ यज्ञियवृक्षाधिकारः

यज्ञियवृक्षाः

पलाशः खदिरः प्लक्षो बटोऽश्वत्थ उदुम्बरः ।। कृमुको वरणो बिल्वः शमीगर्भो विकङ्कतः।। १
काष्मर्य्यः सरलः सालो देवदारुश्च चन्दनः ।। इमे यज्ञद्रुमा यज्ञे तत्काष्ठैः पात्रनिर्म्मितिः ।। २
रसवीर्य्यविपाकेभ्यो मूलात् पुष्पात् फलाद्दलात् ।। आकाराद्देशकालादेर्वनौषध्यर्थमुन्नयेत् ।। ३
एतेषामभिधा रूढा यौगिका दैशिका अपि ।। निर्दिश्यन्ते क्रमात्तद्वद्गुणाः पश्चाङ्गसंगताः ।। ४

पलाशः१

पलाशः, किंशुकः करकः, सुपर्णी, वातपोतः, इत्येकार्थाः । गुणयोगानुरोधात्तु याज्ञिकः ब्रह्मवृक्षः, ब्रह्मपादपः, ब्रह्मोपनेता, पूतद्रः, समिद्वरः, काष्ठद्रः, पर्णः, त्रिपर्णः, त्रिपत्रकः, वक्रपुष्पः, रक्तपुष्पः, बीजस्नेहः, कृमिघ्नः, क्षारश्रेष्ठ इति चोच्यते ।

अस्य देशभाषासु नामानि यथा -									
संस्कृत	हिन्दी	बँगला	महा-राष्ट्री	गुज राती	कर्णाटी	तैलङ्गी	तामिली	उत्कली	आंगली
पलाशः	पलास ढाक टेसू केसू धारा कांकरिया	पलास	पळस	खांख-रो	मुत्तलु	मातु-काचेट्टू	पुरशन्	पराशु	व्युटिया

पलाशस्य गुणाः ।

कषायतिक्तकटुकः स्निग्धोष्णो दीपनः सरः ।। भग्नसंधानकृद् वृष्यः पलाशो गुणतो मतः ।। १
त्रिदोषहृत् कृमिघ्नोऽयं पलाशो यज्ञपादपः ।। ग्रहण्यर्शोगुल्मगुदरोगप्लोहाव्रणे हितः ।। २
रक्तै : पोतैः सितैर्नीलैः पुष्पैरेष चतुर्विधः ।। सर्वे समगुणा उक्ताः सितस्तु ज्ञानवर्धनः ।। ३
पुष्पं विपाकमधुरं ग्राहिशीतलमूषणम् ।। कषायतिक्तकटुकं वातलं चोष्णमिष्यते ।। ४
एतत्पुष्पं कफं पित्तं कुष्ठं दाहं तृषामपि ।। वातरक्तं रक्तदोषं मूत्रकृच्छ्रं च नाशयेत् ।। ५
फलं विपाककटुकं लघूष्णं रूक्षमिष्यते ।। शूलकुष्ठप्रमेहाशः कृमिगुल्मोदरं हरेत् ।। ६
पामकण्डूतिदद्रूत्वग्दोषघ्नं वृक्षबीजकम् ।। फलबीजं कटुस्निग्धोष्णं कृमिघ्नं कफापहम् ।। ७
तन्मूलस्वरसो हन्ति नेत्रच्छायान्ध्यपुष्पकम् ।। नूतनः पल्लवश्चास्य कृमिं वातं च नाशयेत् ।। ८
ग्राही तस्य तु निर्य्यासो हरेत् स्वेदातिनिर्गमम् ।। मुखरोगांश्च कासांश्च ग्रहणीं च विनाशयेत् ।। ९

खदिरः २

खदिरः, खद्यपत्री, प्रसरवः, कर्कटी, गायत्री - इत्येकार्थाः । गुणबोधकनामानि यथा - याज्ञिकः, यज्ञाङ्गः, मेध्यः, यूपद्रः, दन्तधावनः, पथिद्रुमः, रक्तसारः, तिक्तसारः, बहुसारः, क्षितिक्षमः, बालपत्रः, बालपुत्रः, बालतनयः, वक्रकण्टकः, कण्टकी, बहुशल्यः, सुशल्यः, जिह्मशल्यः, जिह्वाशल्यः, कुष्ठारिः, कुष्ठहृत् इति ।।

अस्य देशभाषासु नामानि यथा -							
संस्कृत	हिन्दी	बँगला	महाराष्ट्री	गुजराती	कर्णाटी	तैलङ्गी	
खदिरः	खैर कत्था पपड़िया खयर	खएर गाछ	खयर पांडरा खयर	खेरियो गोरड़	केपिनखैर विलीय-तत्रि	चंडचेट्टू खासु तेल्लचंड	

खदिरस्य गुणाः ।

शीतोष्णाः खदिरो दन्त्यः कषायकटुतिक्तकः ।। अरिमेदो विटूखदिरे कदरः खदिरे सिते ।। १
कदरो हन्ति कण्डूतिं कुष्ठं भूतग्रहं ज्वरम् ।। मुखरोगं पाण्डुरोगं रक्तदोषं कृमिं व्रणम् ।। २
श्वित्रं शोथं चामपित्तं प्रमेहं च विषं तथा ।। मेदोरोगं वातकफं नाशयेत् खदिरः सितः ।। ३
सारो ब्रण्यो रक्तदोषं मुखरोगं कफं हरेत् ।। निर्य्यासो मधुरो बल्यः खादिरः शुक्रवर्द्धनः ।। ४

प्लक्षः३

प्लक्षः, पकटी, कर्परी, प्लवकः, प्लवंगः, कपीतनः, पीतनः, कन्दरालुः, कमण्डलुतरुः – इत्येकार्थाः । गुणबोधकनामानि यथा–अश्वत्थी, पिंपरो, वटी, जटी, क्षीरी, शृङ्गी, वरोहशाखो, दृढप्ररोहः, महाबलः, गर्द्दभाण्डः, चारुदर्शनी, सुपार्श्वः इति ।।

अस्य देशभाषासु नामानि यथा –						
सं०	हिं०	बँ०	म०	गु०	क०	
पर्कटी	पाकर पाखर पिलखना	पाकुड	पिपरीवृक्ष	पिपर्य्य	वसुरि	

प्लक्षस्य गुणाः।

प्लक्षः कषायकटुकः शिशिरो योनिरोगहृत् ।। रक्तदोषं रक्तपित्तं दाहं शोफं व्रणं हरेत् ।। १
मूर्च्छाभ्रमप्रलापांश्च ह्रस्वपत्रो विशेषतः ।।

वटः ४

वटः, न्यग्रोधः, भाण्डीरः, नन्दी, ध्रुवः–इत्येकार्थाः । गुणबोधकनामानि यथा – वनस्पतिः, वृक्षनाथः, महाच्छायः, मण्डली, विटपी, रोहिणः, अवरोही, शिफारुहः, स्कन्धरुहः, स्कन्धजः, कर्मजः, पादरोहणः, बहुपात्, बहुपादः, बृहत्पादः, जटालः, जटिलः, जटी, क्षीरी, रक्तफलः, शुङ्गः, शुङ्गी, भृङ्गी, नीलः, यक्षतरुः, यक्षावासः, वैश्रवणावासः, वैश्रवणालयः, वैश्रवणोदयः, यमप्रियः इति ।।

अस्य देशभाषासु नामानि यथा –								
सं०	हिं०	बँ०	म०	गु०	क०	तै०	गु०	
वटः	बड़	वट	बड़	अल	आल	मर्रिचेट्टु मारि पेडिमरि	बड़	

वटस्य गुणाः ।

ग्राही वण्यः शोतरूक्षः कषाय मधुरो वटः ।। मूर्च्छा छर्दि तृषां मोहं दाहं शोफं व्रणं ज्वरम् ।। १
विसर्पं योनिदोषांश्च कफपित्तं च नाशयेत् ।।

अश्वत्थः ५

अश्वत्थः, पिप्पलः, कपोतनः-इत्येकार्थाः । गुणबोधकनामानि यथा-याज्ञिकः, पवित्रकः, शुचिद्रुमः, सेव्यः, मांगल्यः, श्रीमान्, सत्यः, देवात्मा, विप्रः, शुभदः, अच्युतावासः, बोधिवृक्षः, बोधिद्रुमः, चैत्यद्रुमः, महाद्रुमः, क्षीरद्रुमः, चलदत्रः, चलपत्रः, गुह्यपुष्पः, कुञ्जराशनः, गजभक्षः, धनुर्वृक्षः, श्यामलः, नागबन्धुः इति ।।

अस्य देशभाषासु नामानि यथा -							
सं०	हिं०	बँ०	म०	गु०	क०	तै०	फ़ारसी
अश्वत्थः	पीपल	अशोथ गाछ	पिंपल	पीपलो	अरली	राईचेट्टू	लरजां

अश्वत्थस्य गुणाः ।

अश्वत्थः शीतलो रूक्षो गुरुर्वर्ण्यश्च दुर्जरः ।। कषायतिक्त मधुरः स हि योनिविशोधनः ।। १
रक्तदोषं कफं पित्तं व्रणं दाहं च नाशयेत् । पक्वं तु तत्फलं हृद्यं शीतलं चारुचि हरेत् ।।
वान्ति शोषं विषं दाहं रक्तदोषं च पित्तहृत् ।। २

उदुम्बरः ६

उदुम्बरः, प्रतिष्ठितः, सुचक्षुः, जन्तुफलः - इत्येकार्थाः । गुणबोधकनामानि यथा - यज्ञीयः, यज्ञयोग्यः, यज्ञाङ्गः, यज्ञसारः, यज्ञफलः, पवित्रकः, ब्रह्मवृक्षः, सौम्यः, कालस्कन्धः, श्वेतवल्कः, शीतवल्कलः, शीतफलः, जवनेफलः, सदाफलः, जन्तुफलः, अपुष्पफलः, पुष्पशून्यः, पुष्पहीनः, पाणिमुखः, क्षीरवृक्षः, हेमदुग्धः, हेमदुग्धी, कृमिकण्टकः इति ।।

अस्य देशभाषासु नामानि यथा -						
सं०	हिं०	बँ०	म०	गु०	क०	तै०
उदुम्बरः	गूलर	यज्ञडुमुर	उम्बर	उम्बरी	अत्ति	वाडुचेट्टु

उदुम्बरस्य गुणाः ।

कषायमधुरः शीतो रूक्षो वर्ण्य उदुम्बरः ।। व्रणापहोऽस्थिसंधानगर्भसंधानकृद्गुरुः ।। १
कफपित्तमतीसारं योनिरोगं च हन्ति सः ।। कषायशीतलं वल्कं गर्भ्यं दुग्धं व्रणापहम् ।। २
आमं फलं कषायाम्लं मांसवृद्धिकरं जडम् ।। दोषलं रक्तरुक्कारि दीपनं रुच्यमिष्यते ।। ३
अतिशोतं फलं पक्वं कषायमधुरं जडम् ।। कृमिकृत्कफकृद् रुच्यं हन्ति पित्तं प्रमेहकम् ।। ४
रक्त रोगं क्षुधां मूर्च्छा दाहं शोषं श्रमं तृषाम् ।। कोमलं तत् तृषां रक्तदोषं पित्तं कपं हरेत् ।। ५
किञ्चित्तु कोमलं स्वादु कषायं शीतलं फलम् ।। हन्ति प्रहारजं क्लेशं वान्तिं पित्तमसृक्स्रुतिम् ।। ६

कृमुकः ७

कृमुकः, क्रमुकः, गुवाकः, खपुरः, पूगः, घोण्टा, गोपदलः, राजतालः, छटाफलः-इत्येकार्थाः । तत्र कृमुक इति ऋकारवान् शब्दो वेदे प्रयुज्यते, कार्मुकमिति भूरि प्रयोगात् । लोके तु क्रमुक इति रेफवान् । गुणनामानि यथा-दीर्घपादपः, वल्कतरुः, दृढवल्कः, सुरञ्जनः, पूगवृक्षः इति ।।

अस्य देशभाषासु नामानि यथा -						
सं०	हिं०	बँ०	म०	गु०	क०	तै०
पूगः	सुपारी कसैली	सुपारी	.	.	.	.

कृमुकस्य गुणाः ।

निर्यासः कार्मुकः क्षारो विपाकोष्णी हिमो गुरुः ।। पित्तली वातहृत् साम्लो मस्तिष्कमूत्ररोगहृत् ।। १
स्वादुतिक्तं कषायं तत् प्राणशुक्रबलर्द्धिकृत् ।। फलं स्वादुकषायं च त्रिदोषशमनं गुरु ।। २
संमोहनं रेचनं च मुखक्लेदमलापहम् ।। रूक्षं रुचिकरं पित्तकफकारि च दोपनम् ।। ३
आर्द्रं तु तदभिष्यन्दि चाग्निदृष्टिहरं गुरू ।। आमं तत्सारकं कण्ठशुद्धिकृत् श्लेष्मपित्तहृत् ।।
आमरक्तोदराध्मानहृदास्यमलहृत् तथा ।। ४

वरणः ८

वरणः, वरुणः, उरुमाणः, कुमारः, सेतुः, तमालः-इत्येकार्थाः । गुणनामानि यथा - साधुवृक्षः, सेतुवृक्षः, श्वेतद्रुः, शिकिमण्डलः, मारुतापहः, तिक्तशाकः, वर्हपुष्पः, अश्मरीघ्नः इति ।।

अस्य देशभाषासु नामानि यथा -						
सं०	हिं०	बँ०	म०	गु०	क०	तै०
वरुणः	वरना विलि	वरुण	वायवरणा भाटवरणा	वरणो	मदवसले	उरुमहि उलिमिरि जाजिचेट्टु

वरणस्य गुणाः ।

वरणो मधुरस्तिक्तः कषायकटुको लघुः ।। स्निग्धोष्णः पित्तलो भेदी चाग्निदीपन इष्यत ।। १
मूत्राघातं मूत्रकृच्छ्रं हृद्रोगं कृमिमश्मरीम् ।। गुल्मवातं शीतवातं शीर्षवातं च विद्रधिम् ।। २
वातशूलं वातरक्तं रक्तदोषं च नाशयेत् ।। तत्पुष्पं ग्राहि पित्तामवातासृग्दोषनाशनम् ।। ३
फलं विपाकमधुरं स्निग्धमुष्णं सरं गुरु ।। स्वादु त्रिदोषशमनं वरणस्य प्रचक्षते ।। ४

बिल्वः ९

बिल्वः, श्रीफलः, सैजूषः, मालूरः, शाण्डिल्यः, शल्यः, सोमदरीतकी, गोहरीतकी, कपीतनः,शलाटुः, महाकपित्थः, नीलमल्लिकः, कर्कटः, सुनितिकः – इत्येकार्थाः । गुणनामानि यथा – शिवेष्टः, शिवद्रुमः, मङ्गल्यः, अतिमङ्गलः, समोरसारः, पूतिवातः, पीतफलः, महाफलः, लक्ष्मीफलः, सदाफलः, गन्धफलः, सत्यफलः, सत्यधर्म्मः, हृद्यगन्धः, गन्धपत्रः, शैलपत्रः, त्रिशाखपत्रः, त्रिशिखः, त्रिदलः, पत्रश्रेष्ठः, कण्टकाढ्यः, सिदताननः, अधरारुहः इति ।।

अस्य देशभाषासु नामानि यथा –							
सं०	हिं०	बँ०	म०	गु०	क०	तै०	ता०
बिल्वः	बेल	वेल	वेलवृक्ष	विलोबिलु	वेललु	मारेडीपंदू बिल्व	बिल्व-पाझाम

बिल्वस्य गुणाः ।

कपानिलहरं तीक्ष्णं स्निग्धं संग्राहि दीपनम् । कटुतिक्तकषायेष्णं बालं बिल्वमुदाहृतम् ।।
तदेव विद्यात्संपक्कं मधुरानुरसं गुरु । विदाहि विष्टम्भकरं दोषकृत् पूति मारुतम् ।।

शमी १०

कामी, समुद्रा, सुभद्रा, लक्ष्मीः – इत्येकार्थाः । गुणनामानि यथा – शान्ता, सुखदा, भद्रा, शुभदा, मङ्गल्या, शिवा, शङ्करी, ईशानी शुभकरी, शिवाफला, ईशाना, मेघ्या, पवित्रा, सुरभिः,द्रष्टा, हविर्गन्धा, वह्निगर्भा, समीरा, तपनतनया, पापनाशिनी, पापशमनी, दुरितदमनी, कचमथनी, केशहन्त्री, कचरिपुफला, शक्तुफला, सक्तुफली, शङ्कुफली, सुपत्रा, तुङ्गाः इति ।

अस्य देशभाषासु नामानि यथा –							
सं०	हिं०	बँ०	म०	गु०	तै०	क०	उ०
शमी	छोंकर छिकुर सफ़ेद कोकर	शाई छुई वाव्ला	थोरशमी लघुशमी	खिजड़ो नान्ही खिजड़ी	शमी चेट्टू	वनी कावन्नि	शुमि

शम्या गुणाः ।

कषायतिक्तकटुका रूक्षा शीता च रेचनी ।। लघुः शमी रक्तपित्तं कासश्वासं कफं कृमिप् ।। १
अतीसारं कुष्ठमर्शः कम्पं हन्ति श्रमं भ्रमम् ।। शमीफलं गुरु स्वादु रूक्षमुष्णं च पित्तलम् ।। २
तीक्ष्णं मेध्यं च तत् किन्तु नखं केशं च नाशयेत् ।। शम्यासक्तं यस्य मूलं शमीगर्भः स पिप्पलः ।। ३

विकङ्कतः ११

विकङ्कतः, वैकङ्कतः, रावणः, मधुपर्णीः, गोपघोण्टा, पिण्डारः, किंकरी, पूतकिंकिणोः, हिमकः, इत्येकार्थाः । गुणानामानि यथा – यज्ञीयः, यज्ञवृक्षः, ब्रह्मपादपः, स्रुग्दारुः, स्रुवद्रुमः, स्रुवावृक्षः, सुधावः, पृथुबीजः, बहुफलः, मृदुफलः, ग्रन्थिलः, दन्तकाष्ठः, पादरोहिणः, व्याघ्रपात्, वृतिकरः, कण्टकी, कण्टकारी, कण्टपादः, कण्टपत्रः, स्वादुकण्टकः, इति ।

अस्य देशभाषासु नामानि यथा –							
सं०	हिं०	बँ०	म०	गु०	क०	तै०	उ०
विकङ्कतः	कंटाई किंकिणी वंज	वईचि गाछ	वेह कळ	विकली	हलु-माणिका मालेगु	कानवेगु	बईच कुडि

विकङ्कतस्य गुणाः ।

कषायोऽम्लश्च मधुरः पाकेऽतिमधुरो लघुः ।। विकङ्कतोऽयं नात्युष्णशीतो दीपनपाचनः ।। १

कफं पित्तं रक्तदोषान् नेत्रपुष्पं च कामलाम् ।। शोषं शोफं ब्रणं दाहं लूतामर्शश्च हन्ति सः ।।

विकङ्कतफलं पक्कं मधुरं सर्वदोषहृत् ।। २

काष्मर्य्यः १२

काष्मर्य्यः, कार्श्मरी, गम्भारी, श्रीपर्णी, भद्रपर्णी, स्निग्धपर्णी, मधुपर्णी, कुमुदा, मोदिनी, गृष्टिः, भद्रा, सुभद्रा, सर्वतोभद्रा, स्वरूपभद्रा, गोपभद्रा, मधुभद्रा, महाभद्रा, सदाभद्रा, रोहिणी, पीतरोहिणी, हीरा; इत्येकार्थाः । अत्र 'काष्मर्य्य' इति वैदिकी भाषा । गुणनामानि यथा – क्षीरिणी, विदारिणी, मधुरसा, मधुमन्ती, सुफला, पीतफला, कटूफला, कृष्णफला, कृष्णवृन्ता, कृष्णा, अश्वेता, वातहा, स्थूलत्वचा, दृढत्वचा; इति ।

अस्य देशभाषासु नामानि यथा –						
सं०	हिं०	बँ०	म०	गु०	क०	तै०
गम्भारी	कुम्भेर खम्भारी	गांभारी गांभार	शींबण गंभारी	शवन्य	सींवनी	साल्ला गुंवुटीचेट्टु

काष्मर्यस्य गुणाः ।

गम्भारी मधुरा तिक्ता कषाया कटुका गुरुः ।। दीपनी पाचनी मेघ्योष्णवीर्य्या भेदनी तथा ।। १

हृद्या हन्ति ज्वरं दाहं शोषं शोफं तृषां विषम् ।। आमशूलं प्रमेहार्शस्त्रिदोषं च भ्रमं कृतिम् ।। २

शीतलं मधुरं तिक्तं गुरुस्निग्धं च तत्फलम् ।। बृंहणं ग्राहि मेध्यं च वृष्यं केश्यं रसायनम् ।। ३

हन्ति मूत्रविबन्धश्च वातं पित्तं तृषां क्षयम् ।। दाहं च रक्ततोषं च सतिक्तमधुरं फलम् ।। ४
फलमम्लकषायं तु गुरुस्निग्धं विशुद्धिकृत् ।। मूत्रलं बुद्धिदं हन्ति वातपित्तं क्षयं तृषाम् ।। ५
रक्तक्षतं रक्तपित्तं रक्तदोषं च हन्ति तत् ।। आमवातं मूत्रकृच्छ्रं दाहं च प्रदरं हरेत् ।। ६
कषायतिक्तमधुरा फलमज्जाऽसृजो रुजम् ।। ग्राहिणी वातला बल्या वृष्या पित्तं कफं हरेत् ।। ७
कषायतिक्त मधरुं पुष्पं तस्यास्तु शीतलम् ।। विपाकमधुरं ग्राहि वातलं रक्तदोषहृत् ।। ८
गम्भारीमूलमत्युष्णं मानुषेषु हितं न तत् ।।

सरलः १३

सरलः, पीतद्रुः, पूतिकाष्ठपः, इत्येकार्थाः । गुणनामानि यथा – धूपवृक्षः पीतवृक्षः, पीतदारु :, भद्रदारुः स्निग्धदारुः, सुरभिदारुः, मरिचपत्रकः, मनोज्ञः, पीतः इति ।

देशभाषासु नामानि यथा –	
सं०	हिं०
सरलः	चोड

सरलस्य गुणाः ।

सरलः कटुतिक्तोष्णः कोष्ठशुद्धिकरो लघुः ।। त्वग्दोषशोफकण्डूतिनाशनः प्रतिपद्यते ।। १
स्निग्धोष्णः कर्णकण्ठाक्षितोगरक्षोहरः स्मृतः ।। कफानिलस्वेदयूककामलाक्षिव्रणापहः ।। २

सालः १४

सालः, सर्ज्जः, सर्ज्जरसः, कलः, सत्यसंवरः, उपमेतः, लतातशंखः, ललनः, वंशः, शूरः, कुशिकः, कौशिकः, धन्यः, इत्येकार्थाः । गुणनामानि यथा – सर्ज्जकार्य्यः, एलकार्य्यः, एलनिर्य्यासः, कश्वकर्णीः, अश्वकर्णः, अजकर्णः, बस्तकर्णः, दीघपर्मः, चीरपर्णः, दीर्घशाखः, लतातरुः, वल्लीवृक्षः, गन्धवृक्षः, जरणद्रुमः, शंकुवृक्षः, शंकुतरुः, दिव्यसारः, सुरेष्टकः, सिद्धकः, यज्ञधूपः, अग्निवल्लभः, तार्क्ष्यप्रसवः, कललजोद्भवः, जलदाशनः इति ।

अस्य देशभाषासु नामानि यथा –						
सं०	हिं०	बँ०	म०	क०	तै०	ता०
सालः	साल सखुवा सांखु	साल गाछ लतासाल	लघुराच्छेवा साजरा	सज्जरदामर	एपचट्ठ	कुंगिलियम्

सालस्य गुणाः ।

कषायतिक्त कटुकः स्निग्धोष्णः साल इष्यते ।। कर्णरोगं योनिरोगं बाधिर्य्यं विद्रधिं हरेत् ।। १

विषदोषं शिरो दोषं कुष्ठं मेहमुरःक्षतम् ।। उरोविस्पोटकण्डूतिकृमिस्वेद व्रणं हरेत् ।। २

वातरोगं रक्त रोगंपाण्डुरोगं शिरोरुजं ।। कफपित्तं हरेदस्य कषायमधुरं फलम् ।। ३

शीतं रूक्षं स्तम्भनं च मलावष्टम्भकृद् गुरु ।। लेखनं च तथाध्मानशूलवातकरं मतम् ।।

रक्तपित्ततृषादाहक्षतक्षयविनाशनम् ।। ४

देवदारुः १५

देवदारुः, भद्रदारुः, पीतदारुः, दारुः, दारुकम्, पारिभद्रकः, द्रुकिलिमम्, पूतिकाष्ठम्; इत्येकार्थाः । गुणनामानि यथा–शक्रपादपः, इन्द्रद्रुमः, सुरदारु, अमरदारु, शिवदारु, भद्रदारु, स्निग्धदारु, मस्तदारु, शाम्भवम्, भूतहारि, भद्रवत्, देवकाष्ठम् ; इति ।

देशभाषासु नामानि यथा –		
सं०	हिं०	बँ०
देवदारु	देवद्वार	देवदार

देवदारु गुणाः ।

देवदारु लघुस्निग्धं तिक्तोष्णं कटुपाकि च ।। रूक्षमं श्लेष्मानिलध्वंसि भूतदोषविनाशकृत् ।। १

विबन्धाध्मानशोथामतन्द्राहिक्काज्वरापहम् ।। प्रमेहपीनसश्लेष्मश्वास कासास्रनाशकृत् ।। २

कण्डूतिवातशमनं तल्लेपः कान्तिदायकः ।। आमदोषविबन्धाशःप्रमेहज्वरनाशनः ।

अलक्ष्मीं रूक्षतां हन्ति रक्षो विघ्नविनाशकृत् ।। ३

चन्दनः १६

चन्दनः श्रीखण्डम् , मलयजः, गन्धसारः, भद्रश्रीः, तिलपर्णमू , गीशीर्षम्ः, तैलपर्णिकः, पटीरः, पाटीरः, वर्णकः, भद्राश्रयः, रौहिणः, पीतसारः, इति । गुणनामानि यथा – श्वेतचन्दनम् , महार्हम् , मंगल्यम् , गन्धराजम् , सुगन्धम् , सर्पावासम् , शीतलम् , गन्धाढ्यम् , भोगिवल्लभम् , पावनम् , शीतगन्धः, चन्द्रद्युतिः, हितम् , हिमम् , सेव्यः, याम्यः, इति ।

देशभाषासु नामानि यथा		
सं०	हिं०	म्ले०
चन्दनम्	चन्दन	संदल

चन्दनस्य गुणाः ।

चन्दनं कटुतिक्तं च स्वादे किञ्चित् कषायवत् ।। मुखरुग्नाशनं वृष्यं शीतलं कान्तिवर्द्धनम् ।। १

कामवृद्धिकरं लेपे रूक्षं सौरभ्यदं लघु ।। शीर्षरोगं श्रमश्लेष्मविषदाहास्रनाशनम् ।। २

स्वादे तिक्तं कषे पीतं छेदे रक्तं तनौ सितम् ।। ग्रन्थिकोटरसंयुक्तं चन्दनं श्रेष्ठमुच्यते ।।
विना मलयमन्यत्र चन्दनं न प्ररोहति ।। ३

एतेषामेव वृक्षाणां समिदाहरणे पात्रनिर्म्माणेऽन्यत्र च याज्ञिके कर्मणि सर्वत्राधिकार इत्यतः सर्व एवैते यज्ञिया वृक्षा उच्यन्ते । समिधां स्वरूपे विशेषः स्मर्य्यते-

नाङ्गुष्ठादधिका ग्राह्या समित् स्थूलतया क्वचित् ।। न वियुक्ता त्वचा चैव न सकीटा न पाटिता ।। १

प्रादेशान्नाधिका नोना न तथा स्याद्विशाखिका ।। न सपर्णा न निर्वीर्य्या होमेषु च विजानता ।। २
इति ।।

निषिद्धवृक्षाः

अथ निषिद्धा वृक्षा अपि स्मर्य्यन्ते गोभिलादिभिः-

विभीतकः, कोविदारो, नीपतिल्वकबाधकाः ।। श्लेष्मन्तकोऽरलुर्निम्बो राजवृक्षश्च शाल्मली ।। १

दधित्थ इत्यमी वृक्षा निन्दिता यज्ञकर्म्मणि ।। अनिषिद्धा मध्यमाः स्युर्मुख्यालाभे ततो विधिः ।। २

इति यज्ञियवृक्षाधिकारः ।

यज्ञपात्राधिकारः ।

अथ प्रयोगसाधनानि दार्वादिमयानि पात्राणि यज्ञोपकरणानि । तानि नवधा मन्थनपात्राणि; स्रुक्पात्राणि, यज्ञायुधपात्राणि, स्थालीपात्राणि, चमसाः, ग्रहाः, उपयोजनपात्राणि, प्रातिस्विकानि, आसनानि चेति । तद्यथा-

मन्थनपात्राणि

अधरारणिः, उत्तरारणिः, देवयोनिः, प्रमन्थः, चात्रम्, ओविलो, नेत्रम् अधिमन्थनशकलः- इत्यग्निमन्थनयन्त्रावयवद्रव्याणि ।

शमीवृक्षेण संसक्तमूलो योऽश्वत्थवृक्षः स शमीगर्भ इत्युच्यते । तस्य शमी - गर्भस्याऽश्वत्थस्य प्रशस्तभूमिजातस्य या प्राङ्मुखो वोदङ्मुखो वोर्ध्वगा वा शाखा स्यात्, तां परिवास्य तन्मयीमधरारणिमुत्तरारणिं च कुर्य्यात् । शमीगर्भानुपलब्धौ त्वशमी गर्भस्याप्यश्वत्थस्य तादृश्या शाखया ते संपादयेत् । आर्द्रा, पाटिता,ससुषिरा, ग्रन्थिमस्तका, घूर्णाङ्गो चेत्येवं विधाऽरणिर्न हिताय भवति । जन्तुभक्षणेन मन्थनेन वा मन्थनयोग्ये जीर्णे अरण्यौ शकलीकृत्य तस्मिन्नग्नौ दाहयेत् । अन्ये च नवे अरणी गृह्णीयात् । अनयोश्चारण्योश्चतुर्विंशत्यंगुलं दैर्घ्यं क्रियते । षडंगुलः प्रसारः; चतुरंगुल उत्सेधः । तत्रैतस्मिन्नरण्यादिमाने छन्दोगानामंगुष्ठसम्बन्धिना, वाजसनेयादीनां त्वंगुलीसम्बन्धिना बृहत्पर्वग्रन्थिनाऽङ्गुलमापनं कार्य्यमिति संप्रदायः ।।

अथैतस्या अधरारणेः प्राणिगात्रदवयवाश्चतुर्दश कल्प्यन्ते । तद्यथा – शिरश्चक्षः श्रोत्रम्, वक्त्रम्, ग्रीवा चेति पञ्चांगुलमात्राणि । वक्षो द्व्यङ्गुलम्, हृदयमेकांगुलम्, उदरं त्र्यंगुलम्, कटिरेकाङ्गुला, वस्तिद्व्यङ्गुला, द्व्यङ्गुलं गुह्यम् , ऊरुश्चतुरङ्गुला, जङ्गा त्र्यंगुला, पादोऽङ्गुलमात्र इति चतुर्विंशत्यङ्गुलानि ।।

एषु यदेकादशं गुह्यं नाम सा देवयोनिः । अथवा चतुर्विंशत्यंगुलाया अरणेः समाश्चत्वारो भागाः कार्य्याः । तेष्वग्रारब्धभागेषु यस्तृतीयो भागस्तस्य मध्यं द्व्यङ्गुलं देवयोनिः । अथवा चतुरंगुलानि षडंगुलानि कल्प्यानि । तत्र शिरश्चक्षुः कर्णमास्यमित्येकम्, ग्रीवा वक्षो हृदयमिति द्वितीयम्, उदरं कटिरिति तृतीयम् ;वस्तिर्गुह्यमिति चतुर्थम्;ऊरुद्वयं पञ्चमम्; जङ्घा पादा इति षष्ठम्; तत्र चतुर्थं देवयोनिः । अथवा मूलतोऽष्टांगुलमग्रतस्तु द्वादशांगुलं च त्यक्त्वा यदन्तरा देशो भवति सा देवयोनिः । तत्रापि देवयोनौ मूलादंगुलमग्रात्सार्धंगुलं त्यक्त्वा यदन्तरा भवति तत्रैवायमग्निर्म्मन्थनादुत्पाद्यो, न त्वन्यत्र । देवयोनावुत्पादि-तस्यैवाग्नेः कल्याणावहत्वात् । तदन्यस्थानजस्य रोहभयाद्यनिष्टहेतुत्वाच्च एष च नियमः प्रथम एव मन्थने ज्ञयो नोत्तरेषु ।

अथोत्तरारणिनिष्पन्न एव प्रमन्थः कार्य्यः । अन्य वृक्षान्मन्थसंपादने योनिसाङ्कर्य्यदोषापत्तेः । उत्तरारण्या ईशानदिम्भागादष्टांगुलदीर्घं द्व्यंगुलविस्तारं द्व्यंगुलोत्सेधं प्रमन्थं छेदयेत् । अस्यां चोतरारणो चतुर्विंशत्यङ्गुलायतायां षडंगुलविस्तृतायां चतुरङ्गुलोत्सेधायां षट्सप्ततानि पञ्चचांगुलशतानि भवन्ति । प्रमन्थे त्वष्टांगुले द्व्यंगुलोत्सेधे द्व्यंगुलविस्तृते च द्वात्रिंशदंगुलानि भवन्ति । तथा चैकस्यामुतरारण्यामष्टादशप्रमन्थाः सम्पाद्यन्ते । मन्थनतो बहुभिर्दिनैर्य्यदा यदा प्रमन्थः क्षीणोऽनुपयुक्तः स्यात् तदा तदैतस्या एवोत्तरारणेरूर्ध्वादी-शानदिग्भागादारभ्य क्रमेण छित्वा छित्वा प्रमन्था उपनेयाः । तदेकस्या उत्तरारणेरष्टादशकृत्वः प्रमन्था लभ्यन्ते । एतावानेवोत्तरारणेरुपयोगः । प्रमन्थरूपेणैवेयमुत्तरारणिरधरारण्या संयुज्याग्निं जनयति, न तु चतुर्विंशत्यंगुलदण्डरूपेणेति बोध्यम् । उत्तरारणितस्तदनिष्पत्तौ त्वधरारणः प्रमन्थो ग्राह्यो न त्वन्यत इति केचिदाहुः । वस्तुतस्तु अधरारणितोऽपि नैव ग्राह्य इति सिद्धान्तः । तत्र केचित् प्रमन्थाग्रेण मथ्नन्ति, केचित्तु मूलेनेत्यविशेषः ।

अथ चात्रं खादिरं सारवद्दारवं वा द्वादशांगुलदीर्घं वर्तुलं कार्य्यम् । तच्चाग्रेऽर्द्धत्र्यंगुललौहकालयुक्तं बुध्ने तु प्रमन्थाग्रप्रवयनार्तगर्त्तयुक्तं, मूलेऽग्रं चैकांगुलवर्तुललोहपट्टिकया परिणद्धं भवति ।

ओविली च खादिरो, सारवद्दारवो वा, द्वादशांगुलदीर्घा, चतुरंगुलविपुला, अधोभागे समा, चात्राग्रस्थितकीलकीपरि स्थापनार्थं सुषिरलौहपट्टिकायुक्ता, उपरिभागे वर्तुला च कार्य्या ।

अथ मन्थानार्था रज्जुर्नेत्रम् । तञ्च गोवालैः शणमूत्रमिश्रितैस्त्रिवृदावर्तितं परिवृत्तमनंशुकं व्यामप्रमाणं कार्य्यम् ।

अधिमन्थनशकलस्तूत्तरारणेरधस्तात् स्थाप्यः तदित्थम् अधरारणिखातस्थेन प्रमन्थेन संसक्त बुध्नं चात्रमुपरिकीलं कीलसंसक्तयौविल्या कृतशीर्षकं नेत्ररश्मि संबद्धमग्निमन्थनयन्त्रं भवति ।

तद्वैकेऽनुदिते मथित्वा तमुदिते प्राञ्चमुद्धरन्ति । उदित एव तु मन्थेद्वाजसनेयानाम् । अहतं विशुद्धं वासः परिधाय, यथाविधि प्रावृत्य चायं यजमानो मन्थयितुं प्राङ्मुखो यन्त्रं विभ्रियात् । तत्र च परिसमूहनादिपञ्चभूसंस्कारान् कृत्वा आच्छाद्य मन्थनमारभेत् । तद्यथा–प्राग्रीवमुत्तरलोम कृष्णाजिनमास्तीर्य्य, तत्र प्रथममधरारणिमुत्तराग्रां संस्थाप्य तत्पूर्वत उत्तरारणिं च स्थापयित्वा, प्रमन्थमूलं चात्रबुध्ने गाढं प्रवेश्य,

चात्रबुध्नप्रोतस्य प्रमन्थस्याग्रं देवयोन्यां रन्ध्रं निधाय, चात्राग्रस्थितकोलकाग्रार्धस्योपरि तामाविलीं प्रत्यर्थतामुदगग्रां यजमानोऽन्यो वा प्राङ्मुखो दृढं धारयति । अथ पश्चिमाभिमुखोपविष्टा पत्नी वाऽध्वर्य्युर्वा प्रत्यङ्मुखश्चात्रं नेत्रण प्रदक्षिणं त्रिर्वेष्टयित्वा, तथा मन्थनं करोति यथाऽत्रोत्पादितोऽग्निः प्राच्यां पतति । ततो जातमग्निं मृण्मये पात्रे शुष्कगोमयपिण्डचूर्णोपरि निहिततूले सपुरीषं परिक्षिप्य, संधुक्ष्य, प्रज्वाल्य, पूर्वसंस्कृते देशे आदध्यादिति दिक् । स एषोऽग्निमथनप्रकारः । साऽग्न्युद्वार इत्याहुः ।।

स्रुचः ।।५ ।।

स्रुवः, ध्रुवा, जुहूः, उपभृत्, अग्निहोत्रहवणी इत्येतानि पञ्च स्रुक्संज्ञकानि पात्राणि ।

स्रुवः

खादिरोऽग्रभागेऽङ्गुष्ठपर्वमात्रवर्त्तलबिलयुक्त पुष्करोऽरत्निमात्रदीर्घा बाहुमात्रोः वा खातेन हस्ततल-वदाकृत्या पद्मपत्रवत् स्रुवः कार्य्यः अत्राहुः-

अरत्निमात्रो हंसास्यो वर्त्तुलोऽङ्गुष्ठपर्ववत् । अर्द्धपर्वप्रणाल्या च युक्तो नासाकृतिर्भवेत् । इति ।।

वैकङ्कत स्रुवोऽप्यस्यैव भेदः । आज्यादिद्रव्यमस्मात् स्रवति तस्मात् स्रुवः ।।१ ।।

ध्रुवा

वैकङ्कती जुहूसदृशी ध्रुवा क्रियते । सा हि होमाद्यर्थं स्रुवेण गृह्यमाणस्याज्यस्याऽधारभूता यागसमाप्ति यावदेकत्र वेद्यां स्थिरा भवति तस्माद् ध्रुवा ।।२ ।।

जुहूः

पालाशी चाग्निहोत्रहवणीसदृशकारा जुहूः क्रियते । हूयतेऽनया तस्माज्जुहूः । पुष्करस्रुगित्यस्या एव भेद इत्याहुः ।।३ ।।

उपभृत्

आश्वत्थी जुहूतुल्या चोपभृत् क्रियते । चतुर्विंशत्यंगुलदण्डा हंसमुखी पर्वखाता च । जुह्वाः समीपे ध्रियते तस्मादुपभृत् ।।४ ।।

अग्निहोत्रहवणी

वैकङ्कती त्वग्निहोत्रवणी प्रागेवोपदर्शिता ।।५ ।।

सर्वाश्चैताः स्रुचो मूलदण्डा हंसमुखप्रसेकास्त्वग्बिलाः पाणिमात्र पुष्करा बाहुमात्र्यः क्रियन्ते । अन्येऽप्येवं स्रुवभेदा भवन्ति-वर्त्तुलास्याः, शंकुमुखाः, पर्वखाताः, समानाश्चेति सामान्यो धर्म्मः ।

इति पञ्चस्रुक् पात्राणि

आयुधानि

स्फ्यम् कपालानि च ; शूर्पम्,अग्निहोत्रहवणी च; शय्या, कृष्णाजिनं च ;उलूखलं मुसलं च ; दृषद्, उत्पलं चेत्येतानि दशपात्राणि यज्ञायुधसंज्ञकानि भवन्ति ।दर्शपूर्णमासस्य युद्धरूपत्वात्, तत्र चैषां प्राधान्येनोपयोगात् ।।

स्फ्यः

खदिरकाष्ठनिर्मितो विकङ्कतकाष्ठनिर्मितो वा तीक्ष्णाग्रभागाः खड्गाकृतिररत्निदीर्घचतुरङ्गुलविस्तारः स्फ्यो भवति । स वज्र इत्यप्युच्यते ।।

कपालानि

मृण्मयानि द्विजहस्तघटितानि लौकिकाग्निपरिपक्वानि अश्वशफाकाराणि द्व्यङ्गुलाच्छ्रायाणि पुरोडाश-भर्जनार्थानि । कपालानि कस्मिंश्चित्पुरोडाशे कपालमेकमेव विधीयते, तत्र तदेकमेवाश्वशफाकार-मश्वशफपरिमाणं चोपधीयते । यत्र त्वनेककपालः पुरोडाशस्तत्र तस्मिन् कपालसमूहे तदश्वशफाकारत्वं शफपरिमाणत्वं च नेयम् । यथाऽष्टकपाले पुरोडाशे मध्ये तावदेकं समचतुरस्रं कपालमुपाधेयम् । तस्य पुरस्ताच्च पश्चाच्चैकमेकमितीत्थं द्वे समानाकारे शफाकारतासंपत्यर्थमर्द्धचन्द्रवद्रूपे उपधेये । मध्यमस्य दक्षिणतश्चैकमीदृशमेव । तदित्थं चत्वारि जातानि । अथ दक्षिणस्यैकं पुरस्तादाग्नेयकोणे, एकं च पश्चान्निर्ऋतिकोणे इत्थं द्वे शफाकारतासंपत्यर्थं त्रिकोणवद्रूपे उपधेये । अथ मध्यमस्योत्तरार्द्धे पश्चिमभागे पूर्वभागे चैकमेकमितीत्थं द्वे शफाकृतिसद्ध्यर्थं त्रिकोणरूपे उपधेये । तथा चैतान्यष्टौ कपालानि संहत्य संनिवेशितान्याकारेण परिमाणेन चाश्वैकशफसादृश्येन संपद्यन्ते एवं न्यूनाधिककपालेष्वपि कपालरचनाक्रमः सन्निवेशक्रमश्च शफाकारताशफपरिमाणतासंपत्यनुरोधेन कार्य्यौ । केचित्तु द्व्यङ्गुलसमचतुरस्राणि कपालानीत्याहुः ।।

शूर्पम्

वैणवमिषकं नलमयं वा शूर्पमचर्म्मबद्धं समचतुरस्रमरत्निमात्रं कार्य्यम् । तच्च पुरोडाशादिव्रीह्यादीनां निस्तुषकरणायोपयुज्यते ।।

स्रुक्

वैकङ्कतकाष्ठनिर्मिता मूलदण्डा त्वग्बिला पाणिमात्रपुष्कराग्रा दैर्घ्ये प्रादेशमात्रो,अरत्निमात्री, बाहुमात्री वाऽग्निहोत्रहवणी स्रुग् भवति । सा यदि हरत्योष्ठीक्रियते तदाष्टांगुला बिला कार्य्या । हंसमुखी वा वायसपुच्छका वा क्रियते चेत् तदा पञ्चांगुलबिला कार्य्या । तत्र हंसमुखसदृशप्रणालिका हंसमुखी; वायसपुच्छवत् प्रसृताग्रमुखी वायसपुच्छका; इत्याद्यूह्यम् ।।

शम्या

खदिरकाष्ठनिर्म्मिता विकङ्कतकाष्ठनिर्म्मिता, वारणकाष्ठनिर्म्मिता वा अग्रभागेऽष्टास्वङ्गुलिषु कुम्बाष्टकोपेता षट्त्रिंशदंगुलायामा शम्या कार्य्या । द्वात्रिंशदङ्गुला शम्या वाजसनेयिनाम् । प्रादेशमात्रा तीक्ष्णाग्रेति केचित् । वर्त्तुलग्रन्थिसदृशाकारः कुम्बः । इयं च तण्डुलादिपोषणकाले दृषदुपलादिसमाहननादौ च दृषदोऽधस्तात् स्थापनोपयुज्यते ।।

कृष्णाजिनम्

कृष्णसारमृगचर्म्मखण्डं सग्रीवशिरोभागं सचतुःपादभागं च कृष्णाजिनं कार्य्यम् । तच्च व्रीह्याद्यवघातकाले उलूखलस्याधः स्थापनायोपयुज्यते । ग्रीवादिनिरपेक्षं चेति केचित् ।।

उलूखलम्

पलाशं वारणं सारवद्वृक्षान्तरकृतं वा उपरितनार्द्धभागे बिलयुक्तं प्रथुबुध्नं बृहद्वक्रं मध्ये रास्नायुक्तं द्वादशांगुलोच्छ्रायमरत्निमात्रं जानुमात्रं यथेच्छप्रमाणं वोलूखलं कार्य्यम् । तच्च चरुपुरोडाशसम्बन्धि-व्रीह्यादीनां कण्डनायोपयुज्यते ॥

मुसलम्

खादिरं वारणं सारवद्वृक्षान्तरकृतं वोलूखलार्द्धत्रिगुणायामं प्रादेशमात्रं त्र्यरत्निमात्रं यथेच्छप्रमाणं वा मुसलं कार्य्यम् । तदप्युलूखलवत्कण्डनायोपयुज्यते ॥

दृषत्

अश्ममयी प्रादेशमात्रदीर्घा षडंगुलनिःसृता चाऽरत्निप्रमाणा इच्छाप्रमाणा वा दृषदुच्यते । सा च पेषणीयद्रव्याणां पोषणकाले आश्रयभूता भवति ॥

उपला

अश्ममयी षडंगुला प्रकल्पिताग्रभागा पेषणायोपला क्रियते । 'उपलो वर्त्तुलः प्रोक्तो वितस्तिपरिमाणकः' इत्यन्ये ॥ तदित्थं यथाख्यं यथाकारं यथाप्रमाणं वा प्राचां व्यवहारसिद्धमायुधमासीत् । तथेदमुक्तम् । वस्तुतस्तु नात्राऽदृष्टनियमः श्रूयते इति यथेच्छमन्यथा द्रव्यमन्यथाकारमन्यथाप्रमाणं चैतदुपयोगानुसारेण कर्त्तुं शक्यमिति दिक् ॥

इति दशायुधपात्राणि

स्थाल्यः १६

आज्यतस्थाली, चरुस्थाली, अन्वाहार्य्यस्थाली, पिष्टोद्वपनी, पिष्टपात्री, हविर्द्धानपात्री, भर्जनपात्री, पुरोडाशपात्री, इडापात्री, दारुपात्री,यजमानपात्री, पत्नीपात्री, पूर्णापात्रम् ,प्रणीतापात्रम् , प्रोक्षणोपात्रम् , फलीकरणपात्रम् , मदन्ती, द्रोणकलशः, इति स्थाल्यादिपात्राणि षोडश ॥

तेषु तावदियं स्थाली शततृष्णा भवति ॥

आज्यस्थाली

तत्र – साऽऽज्यस्थाली यस्यां पवित्रमन्तर्द्धाय सुक्षु पूरणार्थमाज्यं गृह्यते । सा च तैजसी वा मृण्मयी वा द्वादशांगुलविस्तीर्णा प्रादेशोच्चा विधीयते । यथाकामं वाज्यस्थाल्याः प्रमाणं भवति ।

चरुस्थाली

चरुस्थाली च तथैव भवति । अथवा मृण्मय्यौदुम्बरी वा दृढा नातिबृहन्मुखी तिर्य्यगूर्ध्वं च समिन्मात्रा कार्य्या । इह प्रकरणे स्थाल्यादिकं सर्वमेव मृण्मयं पात्रं कुलालचक्रघटितमासुरं देवकर्म्मायोग्यं विज्ञेयम् । हस्तघटितमेव तु दैविकं भवति ॥

अन्वाहार्यस्थाली

सा चान्वाहार्य्यस्थाली, यस्यां स्थाल्यां अन्वाहार्य्य ओदनः श्रप्यते । सा यथेच्छं कार्य्या ।

पिष्टोद्वपनी

सा पात्री पिष्टोद्वपनी, यस्यां गार्हपत्याधिश्रितायां पिष्टानि समुप्यन्ते ।।

पिष्टपात्री

पिष्टपात्री द्वादशांगुला चतुरस्रा विपुला च भवति । सैव हविर्द्धानपात्रीत्यप्युच्यते ।

भर्जनपात्री भर्जनार्थमपेक्षितं मृण्मयं पात्रम् ।।

पुरोडाशपात्री

पुरोडाशपात्री समचतुरस्रा वर्तुलेन खातेनोपेता । पुरोडाशपात्रमप्युच्यते तद्वहच्चेत्

इडापात्री

इडापात्री चारत्निमात्रा वैकङ्कती स्यादित्येके । आश्वत्थं पदपरिमितायामबिलयुक्तं चतुरंगुलपरिणाहं चतुरंगुलदण्डं पञ्चविंशतिपलं चेडापात्रमित्यन्ये । हुतहविःशेषादवदाय इडापात्रे स्थाप्यमानो हविर्भाग इडा । तदाधारत्वादिदमिडापात्रमित्युच्यते ।

दारुपात्रम्

दारुपात्रमिडापात्रतुल्यम् । तच्च केनचिच्चिह्नेनेडापात्रात् कृतभेदं संपाद्यते । पक्वान् पुरोडाशान् कपालेभ्य उद्वास्य मन्त्रेणाज्योपस्तरणं कृत्वा कृतोपस्तरणस्थाने तत्रैव दारुपात्रे पुरोडाशान् स्थापयित्वा हविरासादनकाले वेद्यामासादयन्ति । तत्पात्रस्थानामेव च पुरोडशानां यागकाले प्रधानहोमार्थं, ब्रह्मभागार्थं, यजमानभागार्थं, स्विष्टकृदर्थं, प्राशित्रार्थमिडापात्रे नीत्वा चतुर्धाकरणार्थं चावदानं क्रियते इति बोध्यम् ।

यजमानपात्री पत्नीपात्री च

अथ यजमानपात्री पत्नीपात्री च यजमान तत्पत्न्योः प्राशनार्थं यथारुचि प्रकल्पिते भवतः ।।

पूर्णपात्रम्

अथ यावताऽन्नेन भोक्तुः पूर्णा तृप्तिः संभाव्यते, तावद्भिर्व्रीहिभिर्य्यवैर्वा पूर्णं पात्रं पूर्णपात्रम् । व्रीह्याद्यन्नमुष्टीनां षट्पञ्चाशेन शतद्वयेन पूर्णं पूर्णपात्रमित्याहुः ।।

प्रणीतापात्रम्

प्रणीता प्रणयनम्, आश्वत्थं वारणं वा परादेशमात्रमष्टांगुलबिलं चतुरंगुलदण्डं पात्रम् । तेन प्रणीतानाम्न्य आपो नीयन्ते । ''प्रस्थमात्रोदकग्राही प्रणीता चमसो भवेदि''त्याहुः ।।

प्रोक्षणीपात्रम्

अथ प्रोक्षणीपात्रम् । पाणिमात्रं वैकङ्कतं हंसमुखप्रसेकं त्वग्बिलं चतुरंगुलं च कार्य्यम् ।।

फलीकरणपात्रम्

पुरोडाशचरुसम्बन्धिव्रीह्यादीनुलूखले मुसलेनावहत्य शूर्पेण निस्तुषीकरोति । तत्र ये तुषादयः पतन्ति ते फली करणशब्देन व्यपदिश्यन्ते । यागानन्तरं फलीकरणाख्यानां व्रीह्यादितुषाणां जुह्वा चतुर्गृहीतेनाज्येन सह दक्षिणाग्नौ होमो विधीयते । तस्मात् ते तुषादयः कस्मिंश्चिदश्वत्थमये पात्रे यागसमाप्तिपर्य्यन्तं संरक्ष्यन्ते । तत्पात्रं फलीकरणापात्रमित्युच्यते ।।

मदन्ती

अथ भर्जनपात्र्यधिश्रयणकाले यज्जलपात्रमधिश्रितं भवति । तत्रत्यं जलं मदन्तीत्युच्यते । मदन्तीनामिका आपो यस्मिन् पात्रे संताप्यन्ते तत्पात्रमपि लक्षणया मदन्तीत्युच्यते ।

द्रोणकलशः

अथ द्रोणकलशः पलशतग्राही पारिप्लवाकृतिः कार्य्यः । जुहूसदृशे महापुष्करे द्वे पात्रे द्रोणकलशावित्याहुः ।

इति स्थाल्यादिपात्राणि ।।

चमसाः १०

यजमानचमसः ब्रह्मचमसः, होतृचमसः, उद्गातृचमसः, आग्निध्रचमसः, प्रशास्तृचमसः पोतृचमसः, नेष्टृचमसः, अच्छावाकचमसः, ब्रतशंसेचमसः, इत्येतानि चमसपात्राणि दश ।।

सर्वे चैते चमसाः विकङ्कतमयाः पलाशमयाः वटमया अन्यकाष्ठमया वा श्लक्षणास्त्वग्बिलाः कार्य्याः । तेषां दण्डाश्चतुरङ्गुलाः; स्कन्धो द्वयङ्गुलः; विस्तारश्चतुरङ्गल इत्येके । द्व्यंगुलदण्डाश्चतुरङ्गुल-खाताश्चतुरङ्गुलविस्तृता दशाङ्गुलदीर्घाः षडङ्गुलोच्छ्रायाश्चमसाः कार्य्या इत्यपरे । तेषां दशविधानां दण्डेषु विशेषा भवन्ति । तद्यथायजमानस्य दण्डः पृथुविस्तीर्णाग्रः कार्य्यः । ब्रह्मणश्चतुरस्रोऽल्पदण्डः । होतुर्मण्डलः । उद्गातुस्त्र्यस्रिः । आग्नीध्रस्य मयूखकः ; तीक्ष्णाग्रो मयूखकः । प्रशास्तुरवतष्टः । अधोभाग वक्रोऽवतष्टः । पोतुरग्रे विशीखी । नेष्टुर्विगृहीतः । अच्छावाकस्य रास्नायुक्त उपरिवक्रः । ब्रह्मणाच्छंसिनोऽयमुपरिवक्रः इति ।

इति दश चमसाः ।।

ग्रहाः ४०

सोमस्य ग्रहाश्चत्वारिंशद्भवन्ति । ते यथा – उपांश्वन्तर्यामौ द्वौ; उपांशुसवन एकःएन्द्रवायवः मैत्रावरुणः, आश्विनः इति द्विदेवत्यास्त्रयः, शुक्रामन्थिनौ द्वौ; आग्रयणोक्थ्यध्रुवास्त्रयः; पूतभृत्, आधवनीय इति द्वौ; क्रतुग्रहा द्वादश; ऐन्द्राग्नः, वैश्वदेवः – इति द्वौ; मरुत्वतीयास्त्रयः; माहेन्द्र एकः, आदित्यः सावित्र-इति द्वौ; वैश्वदेवः, पात्नीवतः, हारियोजन- इत्येते त्रयः; अंशुरदाभ्यः इति द्वौ; दधिग्रहः, षोडशो – इति द्वौ । इत्थं चत्वारिंशत् । तत्रादितः षट्त्रिंशदग्निष्टोमीयाः । अंश्वादयस्तु चत्वारोऽत्यग्निष्टोमीयाः । अतेव च तथा विभागेन मन्त्रवर्णकं भवति –

"षट्त्रिंशांश्च चतुरः कल्पयन्तश्छन्दांसि च दधत आ द्वादशम् । यज्ञं विमाय कवयो मनीषा ऋक्-सामाभ्यां प्र रथं वर्त्तयन्ति" (ऋ.वे. १० । ११४ । ६)

अथवा सवनाऽनुसारेणैते द्रष्टव्याः । तत्र उपांशुः, उपांशुसवनः, अन्तर्यामः – इति त्रयः । एन्द्रवायवः, मैत्रावरुणः, आश्विन – इति त्रयः । शुक्रः मन्थो इति द्वौ । आग्रायणः, उक्थ्यः – ध्रुवः, इति त्रयः । पूतभृत्, आधवनीयः – इति द्वौ । ऋतुग्रहस्त्वेकः एन्द्राग्नः, वैश्वदेवः – इति द्वौ ।। इत्येते षोडश ग्रहाः प्रातः-सवनीयाः ।। शुक्रामन्थिनो, आग्रयणः, मरुत्वतीयाः, माहेन्द्रः- इत्येतेऽष्टौ मध्यन्दिनसवनग्रहाः । आदित्यः, दधिग्रहः, सावित्रः, वैश्वदेवः, पात्नीवतः, हार्योजनः इति षट् सायंसवनीयाः ।।

औदुम्बरं चतुःस्रक्ति दधिग्रहपात्रम् । रास्नाचिह्नितं पात्रमैन्द्रवायवम् । पिलकाचिह्नितं मैत्रावरुणम् । द्विकोणं पात्रमाश्विनम् । बैल्वं शुक्रपात्रम् । वैकङ्कतं श्लक्ष्णं मन्थिपात्रम् । औदुम्बरं चतुःस्रक्ति अंशुपात्रम् । औदुम्बरं श्लक्ष्णमदाभ्यम् । न्यग्राघकाष्टनिर्म्मितान्यतिग्राह्याणि । इतराणि तु पात्राणि नैयग्रोधान्यौदुम्बराणि वा कार्य्याणि । तानीमानि दधिग्रहादीनि प्रादेशमात्राण्युलूखलाकाराणि एकतो मुखानि वायव्यानि सप्तदशपात्राणि । ऋतुपात्रे तु द्वे उभयतोमुखे कार्य्ये ॥

सौत्रामण्यां सुराग्रहणार्थं पलाशन्यग्रोधाश्वत्थकाष्ठांनर्म्मितानि त्रीणि प्रादेशमात्राण्युलूखलाकाराण्यूर्ध्वमुखानि पात्राणि सुराग्रहा उच्यन्ते । तादृशान्येवान्यानि त्रीणि पात्राणि फलेग्रहेर्यज्ञियस्य पलाशदिवृक्षस्य काष्टैनिर्म्मितानि पयोग्रहा नाम ॥

अथोपयजिनपात्राणि २९

प्राशित्रहरणम् , श्रृतावदानम् , मेक्षणम् , दर्वी, आकर्षफलकम् , कङ्कतम् , धृष्टिः, उपवेषः, अभ्रिः, कूचम्, षडवत्तम् , परिधयः, श्रपणी, शूलम् पशूखा, अन्तर्द्धानकटः, वेदः, वेदपरिवासनम् , पवित्रम् , प्रोक्षणी, विधृतिः, प्रस्तरः, बर्हिः, जूना, यात्तम् , इध्मः, इध्मप्रव्रश्चनः, शाखा, विषाणम् ,आसन्दी - इत्येवमादीन्युपयोजनपात्राणि कर्मभेदाद् बहुधा भिद्यन्ते ॥

प्राशित्रहरणम्

प्राशित्रहरणम्, खादिरं वैकङ्कतं वा प्रादेशमात्रमादर्शाकारं, चमसाकारं, गोकर्णाकारं वा चतुरङ्गुलदण्डयुक्तं कार्य्यम् । हुतशेषहविर्भागो ब्रह्मणे देयः प्राशित्रम् । तदनेनाह्रियते तस्मात् प्राशित्रहरणम् ॥

शृतावदानम्

शृतावदानं वैकङ्कतं प्रादेशमात्रदीर्घं पृथुवक्त्रमङ्गुष्टपर्वमात्रं तीक्ष्णाग्रं कार्य्यम् । शृतमन्नमनेनावद्यते तस्मात् शृतावदानम् ।

मेक्षणम्

मेक्षणमिध्मजातीयमिध्मार्द्धप्रमाणं वैकङ्कतं प्रादेशमात्रं कार्य्यम् । आश्वत्थमरत्निप्रमाणमग्रभागे चतुरङ्गुलचतुरस्रफलकयुक्तं मूलतो दण्डयुक्तं मेक्षणमित्यन्ये । तच्च भर्जनपात्र्यां समुप्तस्य पिष्टस्य मदन्तीभिरद्भिः संमेलनकरणादावुपयुज्यते । चरुपाकोपयुक्तं तु तच्चरुमेक्षणमुच्यते ॥ उक्तं च-

'इध्मजातीयमिध्मार्द्धप्रमाणं मेक्षणं भवेत् । वृत्तं चाङ्गुष्ठपृथ्वग्रमवदानक्रियाक्षमम् ॥' इति ॥

दर्वी

मेक्षणसदृशो दर्वी भवति । साऽरत्निमात्रा वारणो तुर्य्यांशाधिकपुष्करा हस्ताकारा द्व्यङ्गुलपृथ्वग्रा सर्पफणाकृत्यग्रा च कार्य्या ॥४ ॥

आकर्षफलकम्

अथाकर्षफलकं धनुराकृति हस्तमात्रं सर्पफणाकाराग्रं खादिरं वैकङ्कतं वा कार्य्यम् ।

कङ्कतानि

कङ्कतानि तु त्रिदन्तीनि वारणानि भवन्ति ॥

धृष्टिः

धृष्टिरपि मेक्षणसदृशी भवति । सा च कपालोपधाने गार्हपत्यादङ्गारोद्धरणादौ चोपयुज्यते । तेनात्युष्णमपि द्रव्यं सहसा ग्रहीतुं प्रगल्भते तस्मात् धृष्टिः ।

उपवेषः

उपवेषोऽपि धृष्ट्याकारः प्रादेशमात्रः पालाशो वत्सापाकरणशाखायाः पर्णानि छित्वा विनिर्मितो भवति । अरत्निमात्रः खादिरो चैकङ्कतो वा हस्ताकार उपवेष इत्येके । स हि सांनाय्यसंस्कारकाले गार्हपत्याङ्गाराणामुदग्दिशि निरुहणादावुपयुज्यते धृष्टिवदुपवेषः ।।८ ।।

अभ्रिः

अभ्रिररत्निप्रमाणा खादिरा वैकङ्कती वारणी वौदुम्बरी वा तीक्ष्णमुखा कार्य्या । काष्ठकुद्दालोऽभ्रिः । तस्याः शासं दशाङ्गुलं कार्य्यम् ।।

कूर्चः

कूर्चः कुशमयो बाहुमात्रो मकाराकारः । मलिनद्रव्यमलापकर्षणादावुपयुज्यते कूर्चः ।।

षड्वर्त्तम्

षड्वर्त्तं तु वारणनिर्म्मितं वैकङ्कतं वा षडङ्गुलप्रमाणं चतुरस्रमुभयतः खातं कार्य्यम् ।।

परिधयः

परिधयस्तु श्रैपर्णा बाहुमात्रा अपुष्कराः कार्य्याः ।।

श्रपण्यौ

अथ श्रपण्यौ श्रैपर्ण्यौ हस्तमात्रे भवतः ।।

शूलम्

शूलं तु हस्तमात्रं यस्य कस्यचित्तरोर्य्यज्ञियस्य क्रियते ।।

पशूखा

अथ पशूखा मृण्मयी, लौहो, ताम्रमयी वा स्यात् ।।

अन्तर्धानकटः

अन्तर्धानकटस्तु आश्वत्थो वेकङ्कतो वा द्वादशांगुलोऽर्द्धचन्द्राकृतिः किञ्चिदुच्छ्तिशीर्षा भवति । यदा गार्हपत्येऽध्वर्य्युः पत्नीसंयाजैः प्रचरति तदा तत्राहूतानां देवपत्नीनां तिरोधानेनाऽवस्थानायोपयुज्यते सोऽन्तर्धानकटः ।।

वेदः

वेदस्तु दर्भमुष्टिरुच्यते । यो हि प्रदक्षिणमावेष्ट्य द्विगुणः कृतः प्रादेशमात्र उपविष्टवत्सजानुसदृशसंपन्नः प्रच्छिन्नाग्रः स्यात् । स च समन्त्रके वेदिसंमार्जनादावुपयुज्यते तस्माद्वेदः ।।

वेदपरिवासनानि

अथ योऽयं प्रच्छिन्नाग्रो वेद उक्तस्तस्य यान्यग्राणि पूर्वं छिन्नानि तानि वेदपरिवासनान्युच्यन्ते ।।

पवित्रम्

पवित्रं त्वनखच्छिन्नं साग्रं प्रादेशमात्रं द्विदलं समपरिणाहं मन्त्रसंस्कारयुक्तं दर्भद्वयम् । तेन प्रोक्षणादिप्रयोगाः क्रियन्ते, तस्मात् पवित्रम् । अत्र द्विदलत्वमावश्यकम् , दर्भद्वयं तु नावश्यकम् । एकस्यापि दर्भस्य पवित्रत्वात् । अतएव – समावप्रच्छिन्नाग्रो दर्भौ प्रादेशमात्रौ पवित्रे करोति इति ब्राह्मणवचने द्विवर्वनं संगच्छते । कर्मप्रदीपेऽप्येवमेवाह ।।

प्रोक्षण्यः

व्रीह्यादिप्रोक्षाणार्थमग्निहोत्रहवण्यां गृहीता आपः प्रोक्षण्यः ।।२० ।।

विधृतिप्रस्तरबर्हींषे

विधृतिप्रस्तरबर्हींष्यपि वेदपवित्रवद्दर्भमुष्टीनां नामानि । दर्शपौर्गमासे चैतान्युपयुज्यन्ते । तत्र वेद्यां तावद् द्वौ दर्भावुदगग्रो निधीयेते, तयोर्विधृतिसंज्ञा ।

अथ चतस्रो दभमुष्टयश्छिद्यन्ते । तत्र प्रथमा दर्भमुष्टिर्म्मन्त्रसंस्कृता, तयोविर्धृत्योरुपरिप्रागग्रा स्थाप्यते । तत्र च जुहूर्निधीयते स प्रस्तर उच्यते ।।

अन्यास्तु तिस्रो मुष्टयो वेद्यास्तरणर्था बर्हिंषि । तत्र चास्तृते बर्हिषि हवींषि पात्राणि च निधीयन्ते । तदित्थं दर्भाणामेवावस्थाविशेषादेताः समाख्या भवन्ति-वेदः, पवित्रं, विधृतिः, प्रस्तरः, बर्हिरिति ।।

''यज्ञवास्तुनि मुष्टौ च स्तम्बे दर्भवटौ तथा । दर्भसंख्या न विहिता विष्टरास्तरणेषु च ।।''

यत्तु – ''पञ्चनिर्नवभिर्वापि सार्द्धद्वितयवेष्टितम् । ओंकारेणेव मन्त्रेण द्विजः कुर्य्यात् कुशद्विजम् ।
पञ्चाशद्भिः कुशैर्ब्रह्मा तदर्द्धेन च विष्टरः ।।''

इत्येवमादिभिः क्वचिद्दर्भवटुब्रह्मविष्टरादिनिर्म्माणे कुशसंख्याऽभिधीयते,तदनुग्रहमात्रम् न तु नियम इति बोध्यम् ।।

जूना

जूनापि दर्भेणैव संपाद्यते । दर्भत्रयं गृहीत्वा प्रदक्षिणमावेष्ट्य तदन्तेऽन्यद्दर्भत्रयं मूलेन संयोज्य वेष्टनेन ग्रथितमिव कृत्वा ततः प्राग्वत् प्रदक्षिणमावेष्ट्य तदन्ते पुनरन्यद्दर्भत्रयं प्राग्वत् करोति तेनास्य मध्ये सन्धित्रयं जायते तद्दर्भसूत्रं द्विगुणं कृत्वा तदन्ते ग्रन्थिः कार्य्या । सा जूना भवति । जूना यज्ञे द्विविधाऽऽख्यायते – बर्हिः संनहनं, चेध्मसंनहनं च । बर्हिषां बन्धनोपयुक्तं बर्हिः संनहनम् । एवमिध्मनामिघ्मसंनहनम् । तयोरुभयोर्लौकिकी संज्ञा भवति जूनेति ।।

योक्त्रम्

अथ योक्त्रं मुञ्जमयं संनहनम् । कर्म्मकालेऽध्वर्य्युप्रेषित आग्नीध्रो मन्त्रपूर्वं येन वेष्टनगुणेन त्रिगुणितेन पत्नीं कटिदेशे संनह्यति स गुणो योक्त्रम् ।

इध्मानि

अथेध्मानि । बर्हिःसंभरणानन्तरमध्वर्य्युः स्थापितकाष्ठप्रदेशं गत्वाऽसिदेन श्वपशुना वा तूष्णीमिध्मं छिनत्ति । तान्येकविंशतिसंख्याकानि काष्ठानि गृह्यन्ते सोऽयमेकविशतिदारुकः संघ इध्म शब्देनोच्यते । तानीध्मानि द्वेधा विभज्यन्ते – परिधयः समिधश्चेति । आहवनीयस्य पश्चाद्दक्षिणत उत्तरतश्च प्रथममेखलोपरि

स्थापनार्थं मेखलापरिमितायामं काष्ठत्रयं परिधिशब्देनोच्यते । पुरस्तात्वाहवनीयस्य सूर्य्यपरिधित्वेन मनसा क्लृप्तः । अथान्यान्यष्टादशकाष्ठानि प्रादेशमात्राणि समिधः । समिल्लक्षणं छन्दोगपरिशिष्टे यथा-

नाङ्गुष्ठादधिका कार्य्या समित् स्थूलतया क्वचित् ।। न वियुक्ता त्वचा चैव न सकीटा न पाटिता ।। १

प्रादेशान्नाधिका न्यूना न तथा स्याद् द्विशाखिका ।। न सपर्णा न निर्वीर्य्या होमेषु न विजानता ।। २

मरीचिः - विशीर्णा विदला ह्रस्वा चक्राः ससुषिराः कृशाः ।। दीर्घाः स्थूला घुणैर्जुष्टाः कर्मसिद्धिविनाशिकाः ।। ३

प्रागग्राः समिधो देयास्ताश्चाऽकामेष्वपाटिताः ।। काम्येषु च सवल्कार्द्रा विपरीता जिघांसत ।। ४ इति ।।

एताश्च यज्ञियवृक्षाणामेव स्युः । ते यथा -

पालाशाश्वत्थन्यग्रोधप्लक्षवैकङ्कतोद्भवाः ।।
अश्वत्थोदुम्बरौ बिल्वश्चन्दनः सरलस्तथा ।।
शालश्च देवदारुश्च खदिरश्चेति याज्ञिकाः ।। इति ।।

तत्रैतासामष्टादशानां समिधां द्वे आहवनीयायतनस्यान्तर्दक्षिणोत्तरयोर्भागयोरूर्द्ध्वाग्रे रोपणार्थं भवतः । एकमनुयाजार्थम् । पञ्चदश सामिधेन्यर्थानि । क्वचित्तु विकृतीष्ट्यादिषु सामिधेनोवृद्धो अधिका अपि समिधा गृह्यन्ते । क्वचिन्नूना अपीत्यूह्यम् , प्रकृतीष्टौ त्वित्थमेतान्यष्टादशैव समिधः संपद्यन्ते ।।

इध्मप्रव्रश्चनानि

अथेध्मच्छेदनकाले यानि काष्ठशकलानीतस्ततः पतन्ति तानीध्मप्रव्रश्चनानि ।।

शाखा

व्रतोपायनानेते संनयति यजमानेऽध्वर्युः प्राचीमुदोचीमैशानीं वा दिशं गत्वा पलाशस्य शम्या वा प्राचीमुदीचीमैशानीं वा शाखामसिदेन समन्त्रं छित्वा समन्त्रमेव तां विहारमानयति सा शाखा । तस्य अग्रभागश्छिन्नस्त्रिभिर्दर्भैर्वण्याकारेण निबद्धः शाखापवित्रमित्युच्यते । यस्तु तस्या मूलभागश्छिन्नपर्णः प्रादेशमात्रः स उपवेशः प्रागुक्त : ।

विषाणम्

दीक्षितस्य व्रतस्थस्य कण्डूयनापेक्षायां कण्डूतिसाधनं शृङ्गनिर्म्मितं विषाणं नाम ।। औदुम्बरी नाभिदघ्नपादा अरत्निमात्रशीर्ष्णी आनूच्या मौञ्जविवयना आसन्दी भवति । यज्ञियस्य वृक्षस्योदुम्बरस्याभावे । मुञ्जाभावे तु दार्भं विवानम् । प्रादेशमात्राः पादाः । अरत्निमात्राणीतराण्यङ्गानि शिरः, अनूची, तिरश्ची, पूर्वपादी, अपरपादी । विवाने प्राञ्च आतानाः, तिर्य्यञ्च आतानाः, आस्तरणम्, उपबर्हणम्, अतीरोकाः, सन्धयः, आत्मा, प्रतिष्ठा, अधस्ताद् द्वौ कूर्चौ इत्येतावन्त्यासन्द्यागात्राणि । औदुम्बरोऽस्या वारयो रोहितेनानडुहेनोत्तरलोम्ना चर्म्मणा पिहितः स्यात् । तस्य दशसु पश्चाच्छिदेषु दश दश तन्त्र्यो बद्धाः स्युः । ताश्च स्नायुमय्यो नाड्यो लोके प्रतिपन्नाः । इह तु ता मौञ्ज्यो दार्भ्यो वा स्युरिति लाट्यायनः । शाण्डिल्यस्तु त्रिष्वेव पश्चाच्छिद्रेषु सत्सु चतुस्त्रिंशन्मध्यमे तन्त्र्यः स्युरभितस्तु त्रयास्त्रिंशतौ इति मन्यते । उभयथापि शततन्त्रीको वाणः स्यादिति दिक् तत्र वास आस्तीर्य्य कर्म्मविशेषे यजमानं

उपविशति क्वचित् सोमोराजाऽन्यो वा । यथोक्तं लाट्यायनीये – "आरोहत्युद्गातरि कूर्चानाराहेयुः प्रष्टी, ब्रह्मा, गृहपतिरिति"। प्रष्टी पार्श्ववर्त्तिनौ प्रस्तोतृप्रतिहर्त्तारौ । या तु प्रवर्ग्यकर्म्मणि चर्म्मानधानार्थमासन्दी भवति सा सम्रडासन्दीत्युच्यते ।।

इत्युपयोजनपात्राणि

अथ प्रातिस्विकानि ।

सिकता, ऊषरमृत्तिका, मूषकबिलमृत्तिका, वल्मीकमृत्तिका, महाह्रदमृत्तिका, अरण्यवराहविहतमृत्तिका, शर्करा, षट् हिरण्यशकलानि, त्रीणि सुवर्णशकलानि, त्रीणि रजतशकलानि, अश्वत्थस्पार्द्राः सपत्राः सप्ररोहाः, प्रादेशमात्रा अशुष्का ग्रास्तिस्रः समिधः, अश्वत्थः, उदुम्बरः, पलाशः, शमी, विकङ्कतः, विशनिहतम्, अरण्यौ, मुञ्जकुलायः, पद्मिनीपत्रम् । इत्याधाने विंशतिसंभाराः ।

अद्भिरभ्युक्षणम्, हिरण्यम्, उषाः, आखुकरीषम्, शर्कराः । इत्याधाने पञ्चसंभाराः ।

वल्मीकवपा, वराहविहतम् ,आदाराः, पूतिकाः, अजाक्षीरम् । इति यज्ञशिरसि पञ्चसंभाराः ।

महावीरः, शफः, प्रचरणी, उपयमनम्, उपयमनी, परीशासो, पिन्वने, रौहिणकपाले, रौहिणहवन्यौ स्रुचौ । इत्येतानि दश यज्ञशिरः पात्राणि । तत्र मृत्पिण्डेन प्रादेशमात्रं मध्ये संगृहीतं महावीरं करोति । तस्योपरिष्टात् त्र्यङ्गुलं मुखं तत्र नासिका च क्रियते । तदेतन्महावीरधारणार्थं यज्ञकाष्ठनिर्म्मिते मध्यतो वर्त्तुले द्वे पात्रे शफपदवाच्ये भवतः। वैकङ्कतं जुहूसदृशं पात्रं प्रचरणी नाम । महापुष्करं महादण्डम् । जुहूसदृशं पात्रमुपयमनं । अथोपयमन्यादीन्युपरिष्टात् प्रकरणान्तरे प्रदर्शयिष्यामः । एवमन्यान्यान्यपि तत्तत्कर्मणां प्रातिस्विकानि पात्राणि तत्तत्कर्मप्रकरणे प्रदर्शयिष्यन्ते इति दिक् ।

अथासनानि ।

आसनं ब्रह्मणः कार्यं वारणं वा विकङ्कतम् । हस्तमात्रं चतुःस्रक्तिन्मूलदण्डसमन्वितम् ।
द्विषडङ्गुलसंख्याको मूलदण्डो विकङ्कतः ।

एवं यजमानासनम् , पत्न्यासनम्,अध्वर्य्यासनम्, होत्रासनम् आग्नीध्रासनम्, इत्यादीन्यासनानि सर्वाण्यरत्निमात्राणि कार्य्याणि ।। इति ।।

इति यज्ञपात्राधिकारः ।

अथ हविर्द्रव्याधिकारः ।

देवतोद्देशेन त्यागार्थमपकल्पितानि यज्ञसाधनानि द्रव्याणि हवीष्युच्यन्ते । तेषां चत्वारो वर्गा भवन्ति–पशुप्रभवाणि, औषधानि, यादृच्छिकानि, उत्तरद्रव्याणि–इति भेदात् । तत्र पशुप्रभवं दशविधम्–पयः, दधि, आज्यम्, आमिक्षा, वाजिनम्, वपा, त्वचः, मांसम्, लोहितम्, वसा चेति । पयो दुग्धम् । दधि प्रसिद्धम् । आज्यं घृतम् । प्रतप्ते दुग्धे दधिमिश्रणाद् द्वैरूप्यं जायते; तत्र यो घनीभूतो भागः सामिक्षा । यस्तु तत्र जलरूपो भागस्तद्वाजिनम् । वपा हृदयस्थो मेदोविशेषः । त्वचश्चर्म्माणि । अश्वमेधे 'त्वच उत्कृत्य वपाना' मिति वचनात् त्वचोऽप्युपयोगो दृश्यते । मांसं पललम् । लोहितं रुधिरम् । अश्वस्य लोहितं स्विष्टकृदर्थमिति वचनात् । वसा पशुरसः । इत्येतानि दश द्रव्याणि पशुदेहात् प्रभवन्ति ।। १ ।।

अथौषधं द्वादशविधम् – ओषधयः, तन्दुलानि, पिष्टानि, फलीकरणानि, पुरोडाशः, ओदनः, यवागूः, पृथुकाः, लाजाः, धानाः, सक्त वः, सुरा चेति । ओषध्यः फलपाकान्तानि मूलद्रव्याणि । तन्दुलं वितुषीकृतं धान्यम् । पिष्टं तन्दुलादीनां चूर्णं जलमिश्रितं घृष्टं वा । व्रीह्यादीनामुलूखलेऽवहतानां शूर्पेण परापवनात् कण्डन पृथग्भूतानां तुषाणां विशोधनेन संपादनं फलीकरणम् । व्रीह्यादिपिष्टैः श्रुतैर्मन्त्रादियोगाद्विधिवत्संपादितं कपालोपहितं द्रव्यं पुरोडाशः । ओदनो भक्त म् । यवागूः पिष्टमयम् पिष्टद्रव्यम् । पृथुकाश्चिपिटान्नम् । लाजा भर्जितं धान्यम् । धाना भ्रष्टयवाः । यवगोधूमोपवाकानां नकलबदरकर्कन्धूनां पिष्टानि सक्तवः । सुराः पैष्टी-माध्वी-गौड्यादीनि मादकद्रव्याणि । सौत्रामण्यां सुरायागः ॥ २ ॥

अथ यादृच्छिकमपि द्वादशविधम् – आकाशः, वायुः, आपः, मधु, सोमः, कृष्णलानि, किंशुकानि, समिधः, शाकलानि, वर्हिः, करीराणि, खर्जूराणि चेति । तत्राकाशो मनोग्रहे । वायुर्वातनामहोमे । आपः संसृष्टहविषि । मधु 'मधुना जुहोती'त्यत्र । सोमो महायज्ञे । कृष्णलानि अतियज्ञे । किंशुकानि सर्पबल्याम् । करीराणि खर्जूराणि कारीर्य्याम् । तान्येतानि स्वाहाकारवषट्कारप्रदानानि हवींषि भवन्ति ॥ ३ ॥

अथाग्निः शरीरम् , प्राणः, शरीरी , तुषा इत्येतान्यपि यज्ञसाधनानि भवन्ति । तेषां हविष्ट्वं देवतार्थत्वादिष्यते । देवतायै त्याज्येषु हि हविःशब्दमिच्छन्ति । परे तु पयः प्रभृतिषु खर्जुरान्तेष्वेव चतुस्त्रिंशद्द्रव्येषु हविः शब्दं प्रयुञ्जते ॥

उत्तरद्रव्याणि ।

अथाहुतिद्रव्यं, होमद्रव्यं, यागद्रव्यं, अर्हणाद्रव्यं, दक्षिणाद्रव्यमित्येतानि व्याख्यास्यामः । आहुतिर्द्वेधैवसोमाहुतिराज्याहुतिश्चेति । तत्र सोमाहुतिः सोमयज्ञे । अन्यत्र तु हविर्यज्ञे पशुयज्ञे सर्वत्राज्याहुतिर्भवति ॥

होमद्रव्याणि

अथ होमद्रव्याणि तिलादीनि पाकयज्ञे कर्म्मविशेषाद्बहुधा भिद्यन्ते । आग्निहोत्रे तु – "पयो दधि घृतं तैलं यवागूतन्दुलौदनाः । मांसं सोमरसो माषाः होमद्रव्याणि वै दश"।

तत्र पयसा तन्दुलैर्यवाग्वा वा संप्रति होमः संप्रदायसिद्धः । जनकसंवादश्रुतौ तु –पय एवाग्निहोत्रं, तदभावे व्रीहियवौ, त दभावे या अन्या ओषधयः, तदभावे या आरण्या ओषधयः, तदभावे वानस्पत्यम्, तदभावे त्वापः स्युः । सर्वाभावे तु सत्यं श्रद्धायां जुहुयादिति श्रूयते ॥

यागद्रव्याणि

अथ यागद्रव्याणि त्रयोदशधा – आज्यम् , पृषदाज्यम् , तानूनप्त्राज्यम् , आमिक्षा, वाजिनम् , चरुः, पुरोडाशः, पशुपुरोडाशः, वपा, अपूपः, सक्त वः, सुरा, सोमश्चेति । तत्राज्यं स्नेहद्रव्यम् ; तच्चेह घृतं ग्राह्यम् । तदपि गोरेव । तदाज्यस्थाल्यां कृत्वा वेद्यां निधायते । तदाज्यं संस्कारार्थमग्नेः प्राङ्नीत्वा पुनः पश्चादानीय तत्रैव वेद्यां स्थापयति । यत्र यत्राज्यस्य हवनादीषूपयोगस्तत्र तदाज्यस्थाल्याः सकाशादाज्यं स्रुवेणोद्धृत्य जुह्वादिषु पूरयति । तद्यथा – आज्यस्थाल्या उत्तरतो वेद्यां प्रागग्रमुदगग्रं वा वेदं निधाय तस्मिन् प्रागग्रामादौ जूहूं स्थापयित्वा तस्यां चतुःकृत्वः स्रुवेणाज्यं पूरयति । तत उपभृतं स्थापयित्वा तस्यामाज्यमष्टकृत्वो गृह्णाति । ततो ध्रुवायां चतुःकृत्वो गृह्णाति । आज्यपूर्णाश्च ता जुहूप्रभृतीः स्रुचोऽध्वर्य्युर्दत्ताः परिकर्मी नीत्वा प्रणीतोत्तरतः स्थापितयोरिध्मबर्हिषाः पश्चिमतः स्थापयति । अथ कर्मविशेषेऽध्वर्य्युर्या-

गावशिष्टमाज्यं चतुःकृत्वो होतुः पाणौ, षट्कृत्वस्तु आग्नोध्रपाणौ स्रुवेण ददाति । तच्च तौ प्राश्नोतः । सेयमाज्येडा नाम इत्याज्यम् ।

दधियुक्तं संस्कृतमाज्यं पृषदाज्यं नाम ॥

तानूनप्त्रमपि संस्कृताज्यविशेषः । वेद्यां कंसं निधाय ध्रुवाज्यात् पञ्चकृत्वस्तानूनप्त्रमन्त्रैराज्यं गृह्णाति । अवमृश्यावघ्राय तत्पात्रमद्भिः संस्पृश्य शालाया उत्तरभागे निनयति । तदाज्यं तानूनप्त्रं नाम ॥

अथ पूर्वेद्युरामिक्षादध्यर्थं सायं दोहः कार्य्यः । ततो दधि संपादयेत् । अथ प्रातर्दुग्धे पयस्यग्नितप्ते दधि संमिश्रयति । तेन तत्र दधि मिश्रितोत्तप्तपयोद्रव्ये द्वौ भागौ संपद्येते - यो घनीभूतो भागः सा आमिक्षा इत्युच्यते । यस्तु जलरूपो भागः स वाजिन इत्युच्यते । आमिक्षावाजिने शीतले कृत्वा निदधाति ॥

अथ गार्हपत्याङ्गरान् गार्हपत्यायतनाद्बहिः पश्चिमतो निरुह्य तत्र तैः कृतान्तर्गर्भी चुह्लीं स्थापयित्वा तस्यां सोदकस्थालीमधिश्रित्य तत्र मन्त्रसंस्कृतानि तन्दुलानि परिपच्यन्ते चरवो नाम । पयःसहितां तु स्थालीमधिश्रित्य साधितश्चरुः पयसि चरुर्नाम ॥

अथ पुरोडाशः । देवतोद्देशेन कृतो व्रीहियवान्यतरपिष्टपिण्डो मदन्तीजलेन सिद्धःकूर्माकारेणा सन्निवेशितः पुरोडाश इत्युच्यते । तत्परिपाकार्थं कपालोपधानं क्रियते । तानि च पुरोडाशभर्जनार्थानि कपालानि मृण्मयानि द्विजहस्तघट्टितानि लोकिकाग्नि - परिपक्वानि द्व्यंगुलोच्छ्रितानि कार्याणि । तत्र कस्मिंश्चित्पुरोडशे एकमेव कपालं विधीयते । तच्चेकमेवाश्वशफाकारमश्वरशफपरिमाणं च भवति । यत्र त्वनेककपालः पुरोडाशस्तत्रेदमश्वशफाकारत्वमश्वशफमात्रत्वं चास्मिन् कपालसमूहे नेयम् । यथाष्टाकपाले पुरोडाशे मध्ये तावदेकं चतुरस्रं कपालपुपधीयते । ततस्तत्पश्चाद्-द्वितीयं शफाकारतासंपादनार्थमर्धचन्द्राकारं कार्य्यम् । एवं मध्यमस्य पुरस्तादप्यर्धचन्द्राकारं तृतीयम् । तादृशमेव च मध्यमस्य दक्षिणतश्चतुर्थम् । अथ दक्षिणस्यास्य चतुर्थस्य पुरस्तात् पञ्चमम् , पश्चात् षष्ठं च शफाकृतियोग्यं कार्य्यम् । एवं पश्चिमस्थस्य द्वितीयस्योत्तरतः सप्तमम् । पूर्वस्थस्य तृतीयस्योत्तरतस्त्वष्टमं संनिवेश्यम् । इत्थमेतान्यष्टौ कपालानि समुदितान्याकारेण परिमाणेन चाश्वशफसादृश्येन संपद्यन्ते ।

एवं न्यूनाधिककपालेष्वपि चतुःकपालषट्कपालसप्तकपालैकादशकपालद्वादशकपालादिषु कपालरचनाक्रमः कपालविभागश्च शफाकारतन्मात्रासंपत्तिसंभवानुसारेणाऽनुसन्धेयौ । तत्र च तं पुरोडाशं सर्वकपालेषु संश्लेषयितुमश्वशफमात्रं प्रसारयति । शतपथे तु - "तं प्रथयति । तं न सत्रा पृथुं कुर्य्यात् । अश्वशफमात्रं कुर्य्यादित्युहैके आहुः । कस्तद्वेद-यावानश्वशफः । यावन्तमेव स्वयं मनसा न सत्रा पृथुं मन्येत, एवं कुर्य्यात्" इत्याम्नायते । केचित्तु द्व्यङ्गुलसमचतुरस्राणि कपालानि इत्याहुः । तद्यथा-

एषु च कपालेषु पक्वान् पुरोडाशान् कपालेभ्य उद्वास्य दारुपात्र्यां प्रथयति इडापात्रतुल्यं केनचिद्विशेषचिह्ने नोपलक्षितं पात्रं दारुपात्री । तत्राज्योपस्तरणं कृत्वा कृतोपस्तरणस्थाने तान् पुरोडाशान् प्रथयति । तां च दारुपात्रीं हविरासादकाले वेद्यामासादयति । ततो यागकाले तत्पात्रस्थानामेव पुरोडाशानामवदानम् ॥

आज्यस्य पुरोडाशस्यान्यस्य वा स्थापितस्य हविषो होमपरिमितभागग्रहणार्थं खण्डनमवदानम् । तच्चानेकवारं कृत्वा गृह्णाति । तथाहि-ध्रुवाज्यात् स्रुवेण जुह्वामेकवारमाज्यं गृहीत्वा पुरोऽनुवाक्यापठनार्थं होतारं संप्रेष्य पुनस्त्रिवारं गृह्णाति । तच्चतुरवतं नाम । केषांचित्तु तत्पञ्चावतं भवति । तदक्तम्-

जामदग्न्या वत्सविदावार्ष्टिषेणास्तथैव च । भार्गवाश्च्यावना और्वाः पञ्चावर्त्तिन ईरिताः ॥

एषां हि यजमानत्वे पञ्चवारमवद्यति । इतोऽन्ये चतुरवर्त्तिनः ।। इत्याज्यावदानम् ।।

अथ पुरोडाशस्यावदानप् । तत्रादौ जुह्वामुपस्तीर्य्य प्रथमस्य पुरोडशस्य पूर्वार्धात् प्रथममवदाय द्वितीयं पश्चार्धादवद्यति । ततोऽभिघारयति । तथा चोपस्तरणपूर्वाधिक - पश्चाधिकाभिघारणैश्चतुरवत्तं भवति । द्वितीयपुरोडाशादीनां तु अन्ततः प्राक्संस्थासंपादनाय पूर्वं पश्चार्धादवदानं ततः पूर्वार्धादिति विशेषः । हविरवदानं च पञ्चभिरंगुलिभिरंगुष्ठमध्यमानामिकाभिर्वा कार्य्यम् । पञ्चावत्तिनां तु प्रथमस्य मध्यात् पूर्वार्धात् पश्चार्धाच्चेति त्रिरवदानम् । उपस्तरणभिधारणाभ्यां पञ्चावत्तता । द्वितोयपुरोडाशादीनामप्येवम् ।।

एवमेव चर्वादिद्रव्यस्याप्यवदानं कार्य्यम् । तत्र च मेक्षणोमैवावदानं नाङ्गलिभिरिति विशेषः ।।

अथ हवनोत्तरमवशिष्टस्यास्य दारुपात्रीस्थस्य पुरोडाशद्रव्यस्य त्रेधा विभागप्रक्लृप्तिः । प्राशित्रम् , यजमनभाग, इडा च । तथाहि - प्रथमतः प्राशित्रहरणपात्रे प्रथमप्रधानद्रव्यसंबन्धिनं कंचिदंशमवदाय स्रुवदण्डेन तदभिवार्य्य ब्रह्मणः प्राशनार्तं प्रणीतानां पश्चिमतः सादयति तत् प्राशित्रं नाम । तत इडापात्रं वेद्यामुदगग्रं निधाय तस्मिन् यावन्ति प्रधानद्रव्याणि तावदर्थं सकृदेवोदकसंस्थमाज्यस्थाल्याज्येनोपस्तीर्य्य, प्रथम प्रधानद्रव्यास्यादौ दक्षिणार्धादवदाय तस्मिन्निडापात्रे उपस्तीर्णदेशे निद्धाति । तत उत्तरार्धादवदाय तत्र निदधाति। ततोऽस्य द्रव्यस्य पूर्वभागात् त्र्यङ्गुलं चतुरङ्गुलं खण्डमवदाय त्राज्यस्थाल्याज्येन सुसंतृप्तं संतर्प्य यजमानप्राशनार्तं ध्रुवायाः पूर्व भागं निदधति । तत्खण्डं यजमानभागो नाम । त्रथ द्वितीयादिप्रधानद्रव्याणां प्रथमवदवदाय, निधायोपस्तरणवदभिवारयति । तदिडावदानमुच्यते । इत्थमिडापात्र्यां गृहोतं हविरिडा नाम । तां ततो होतृपूर्वा ऋत्विजः सयजमाना भक्षयन्ति, तदिडाप्राश्नं भवति । इति पुरोडशः ।।

अथ पशुपरुराडाशादीनि पञ्च पाशुकहविर्द्रव्याणि । तत्र शामित्राग्नौ पशुकुम्भीमधिश्रित्य तस्यां प्रभूतमुदकं कृत्वा वपाभिन्नानि सर्वाणि पशोरङ्गानि तत्र निक्षिप्य सुशृतानि करोति । तान्येव पशुपुरोडाशः । तमन्तर्वेदि सादयति । जुहूपभृतरुपस्तीर्य पुराडाशस्य पूर्वार्धादवद्यति । पाशुकहविषोऽस्य हृदयादीन्येकादशावदानानि भवन्ति । हृदयाज्जुह्वां द्विरवद्यति । जिह्वाया द्विरवद्यति । ततो वक्षसस्तनिम्नश्च । दक्षिणावृक्कात् , सव्यवृकात् , सव्याद्दोष्णः, दक्षिणपार्श्वात् , सन्य पार्श्वात् , दक्षिणश्रोण्याः, अध्यध्या ऊर्ध्वप्रदेशात् । गुदं त्रेधा कृत्वा मूलमुपयड्भ्योऽग्रं स्विष्टकृते निधाय, मध्यं द्वेधा कृत्वा जुह्वामवदधाति । सर्वाण्यङ्गानि द्विद्विरवद्यति ।। हवनीतरकालं षड्ऋत्विजो यजमानश्चैष्टिकेडावदिमां पश्विडामपि भक्षयन्ति ।।

अस्यैव तु पशोः सर्वादरव्यापी पोलिकाकारोऽतिश्वेतवर्णा मेदोविशेषो वपा नाम । वपायां शृतायां पात्रान्तरेऽपूर्वाज्येनापस्तीर्य्य वपाश्रयणीसकाशादुद्धत्य वपां तस्मित् पात्रेऽवधायाऽग्नावधिश्रित्य अपूर्वाज्येनाभिवार्य्योदगुद्वास्य तेनैवाज्येन सांनाय्यवन्मन्त्रेणालं करोति । तां वपां स्रुचां दक्षिणतः सादयति ।।

अथ त्र्यम्बकयागे त्रैयम्बकापूपः क्रियते । अपूपश्च लोके प्रसिद्धपदार्थः ।।

अथ सक्तवः । यवगोधूमोपवाकानां सक्तवः । नकलबदरकर्कन्धूनां च सक्तवः । नकलादयो बदरभेदाः । सौत्रामण्यां व्रीहिसक्तून् यवसक्तून् वाऽऽज्येनापूर्वेणोपस्तीर्य्याभिघार्य्याञ्जलिनाऽऽहवनीयाग्नौ जुहोति ।।

अथ सुरा मादकद्रव्यविशेषः । स्मरन्ति हि धर्म पूत्रकाराः ।।

"सुरा वै मलमन्नानां पाप्मा च मलमुच्यते । तस्माद् ब्रह्मणराजन्यौ वैश्यश्च न सुरां पिबेत्" इति ।।

सौत्रामण्यां तु प्रत्यक्षं होता सुराग्रहं भक्षयति । प्राणभक्षं वा । यदि होता न भक्षयति, तदा खरे उपविष्टः कश्चिद् ब्राह्मणो भक्षति । यदि ब्राह्मणं न विन्देत्, तर्हि आहवनीयस्य दक्षिणतो भस्मनिर्मितखरस्य वल्मीकवपायामवनयति ।।

अथ सोमः । स च लताविशेषो गन्धमादनहेमकूटादिष्वद्रिषु लभ्यः ।।

अर्हणीयद्रव्याणि

अथार्हणीयद्रव्याणि अर्हणार्थमर्घ्याय विष्टरं पाद्यमर्घ्यमाचमनीयं मधुपर्कं गाश्चेत्याहरन्ति । विष्टरो दर्भासनम् । उपलक्षणमिदं कूर्चस्य । ''कूचेमध्यास्तेऽधितिष्ठति वे'' तिशांखायनीये । अर्घ्यमर्घार्थमुदकम् । आचमनीयमाचमनार्थमुदकम् । मधुपर्को मधुना पृक्तं दधिपयः कृतान्नं वा । ''दधनि पयस्यकृतान्ने मधु दध्यान्मधुपर्कमेतदाहुः'' । षडर्घ्या भवन्ति-आचार्य्य ऋत्विक् श्वशुरो राजा स्नातको जामाता च । एषामाचार्यादीनां त्रैवर्णिकानां परिसंवत्सराद्गृहमागतानामवश्यं मधुपर्कः कर्त्तव्य इत्यार्यसदाचारः । तत्र स्नातकः समावृत्तमात्रो ग्राह्यः ।। मधुपर्कानन्तरं गौरप्येको निवेद्यः । अथ-मन्थानामपि मधुपर्क कल्पत्वमाहुः । सक्त व एव दधिमधुजलयोगात् त्रिविधा मन्था उच्यन्ते-दधिमन्थो, मधुमन्थ, उदमन्थश्चेति ।

अथ दक्षिणाद्रव्याणि

''हतो यज्ञस्त्वदक्षिण'' इति श्रुतेर्ऋत्विग्भ्यः कृतकृत्येभ्यो गौर्हिरण्यं भूमिरन्नं वासोऽन्यद्वा प्रतिपन्नं वस्तु दक्षिणात्वेन दीयते । तच्च कर्म्मभेदेन भिद्यते इत्यग्रे वक्ष्यते ।

अथ पूर्णपात्रं दक्षिणा ब्रह्मणे दीयते । कृतेनाऽकृतेन वान्नेन फलैर्वा कंसं चमसं वा पात्रमापूर्य्य दद्यात् तत्पूर्णपात्रम् ।

अष्टमुष्टिर्भवेत् कुञ्चिः कुञ्चयोऽष्टौ च पुष्कलम् । पुष्कलानि च चत्वारि पूर्णपात्रं विधीयते । - इति गृह्यासंग्रहः ।

यावता बहुभोक्तु श्च तृप्तिः पूर्णेन जायते । नावरोर्द्ध्वं ततः कुर्य्यात् पूर्णपात्रमिति स्थितिः इतिकर्म्मप्रदीपः ।।

अथैतदतिरिक्त मेतेभ्यः कर्म्मान्ते भोजनीयं दोयते तदन्वाहार्यं नाम दक्षिणाद्रव्यम् । यावन्तस्तत्र कर्म्मणि ऋत्विजः संयुक्ताः स्युस्तावतां भोजने पर्याप्त ओदनो दक्षिणाग्नौ सुशृतः कियते, ततो वेद्या दक्षिणश्रोण्यां स्थाप्यते । ततः स्वं स्वं भक्तं गृहीत्वा ब्रह्मादयः प्राश्नन्ति । आदिष्टदक्षिणास्वाग्रयणमित्र-विन्दाप्रभृतिष्वन्वाहार्य्यो नास्ति । नियता ह्येषा दक्षिणा यत्राग्नौ पच्यते, सोऽत एव दक्षिणाग्निरुच्यतेऽन्वाहार्य्य पचनश्चेति ।

द्विविधा हि देवता भवन्ति - ईडेन्याः, सपर्य्येण्याश्च । ये दिव्या देवा अग्निसोमेन्द्रवरुणादयस्ते ईडेन्याः । तेभ्यो यागहोमाहुतिद्रव्याणि हवींषि भवन्ति । ये तु ब्राह्मणाः शुश्रुवांसोऽनूचानस्ते मनुष्यदेवाः सपर्य्यण्याः । तेषां दक्षिणाद्रव्याणि हवींषि । श्रूयते च - ''परोक्षं वा अन्ये देवा इज्यन्ते प्रत्यक्षमन्ये । यद्यजते - य एव देवाः परोक्षमिज्यन्ते तानेव तद् यजति । यदन्वाहार्य्यमाहरन्ति- एते वै देवाः प्रत्यक्षं यद् ब्राह्मणास्तानेव तेन प्रीणाति'' । इति दिक् ।

इति श्रीमहामहोपदेशक समीक्षाचक्रवर्ति-

श्रीमधुसूदन-विद्यावाचस्पतिप्रणीते

यज्ञोपकरणाध्यायो द्वितीयः

सम्पूर्णः ।

अथ यज्ञविटपाध्यायः

यज्ञेश्वरप्रसादाय श्रीयज्ञमधुसूदने ।।

यज्ञप्रचयमुत्कृष्टं प्रवक्ति मधुसूदनः ।।१ ।।

यज्ञाः कतिविधा भवन्तीति जिज्ञासायां कश्चित् तावदाह – पञ्चविधा हीमे सर्वे यज्ञा भवन्ति। [१]अग्निहोत्रम् , [२]दर्शपौर्णमासम् , [३]चातुर्मास्यम् , [४]पशुबन्धः, [५]सोम इति भेदात् । एतेषामेव यज्ञभेदानां स्वरूपारम्भकत्वेनोपबृंहणत्वेन विकृतित्वेन समुच्चयेन वान्येषां सर्वेषामेव यज्ञानां विधानात्तेषामप्येतैरेवोपसंग्रहणात्। अत एव पाङ्क्तो वै यज्ञ– इति श्रूयते । पाङ्क्तः पञ्चविधः ।।१ ।।

अपर आह । एक एव हि सर्वा यज्ञोऽग्निहोत्रादिभिः पञ्चसंस्थो विधीयते । एकस्यैव संवत्सराग्नेः संस्काररूपत्वेन सर्वेषामेषां यज्ञानां स्वरूपारम्भात् तस्य चाहोरात्रादिभिः पञ्चभिरेव संस्थाभिः पृथक् संस्करणादग्निहोत्रादिसंस्थाभिः पृथगाख्यानेऽपि वस्तुतोऽनन्यत्वात् । पाङ्क्तो यज्ञ इति हि श्रुतिः पञ्चसंस्थमेवैतमाहेति बोध्यम् ।।२ ।।

अपर आह यज्ञस्त्रिविधः–[१]इष्टयः, [२]पशवः, [३]सोमा इति भेदात्। यत्राज्याहुतौ पशुहिंसा नास्ति तत्रेष्टिशब्दः। यत्र मांसमपि देवतायै दीयते तत्र पशुशब्दः । यत्र ग्रहयागे सोमरसाहुतिस्तत्र सोमशब्द इति ।।३ ।।

एके तावदाहुः–एकविंशतिसंस्थः सर्वो यज्ञः – सप्तपाकयज्ञसंस्थाः, सप्तहविर्यज्ञसंस्थाः, सप्तसोमसंस्था इति भेदात्। तथा हि–[१]औपासनहोमो, [२]वैश्वदेवम् , [३]पार्वणम् , [४]अष्टकाः, [५]मासिकश्राद्धम् , [६]सर्पबलिः, [७]ईशानबलिरिति सप्तपाकयज्ञसंस्थाः ।।१ ।। [१]अग्निहोत्रम् [२]दर्शपूर्णमासौ, [३]आग्रयणादीष्ट्ययनानि [४]चातुर्मास्यानि, [५]निरूढपशुबन्धः, [६]सौत्रामणी, [७]पिण्डपितृयज्ञचतुर्होतृहोमादयो दर्विहोमाः–इति सप्त हविर्यज्ञसंस्थाः ।। यज्ञशब्दवाच्यत्वेपिण्डपितृयज्ञस्य वषट्प्रदानत्वाभावाद् दर्विहोमता ।।२ ।। [१]अग्निष्टोमः [२]अत्यग्निष्टोमः, [३]उक्थ्यः, [४]षोडशी, [५]अतिरात्रः, [६]वाजपेयः, [७]आप्तोर्यामः–इति सप्त सोम संस्थाः ।। अग्निष्टोमे षोडशीग्रहणादत्यग्निष्टोमो राजन्यस्येत्येके, ब्राह्मणस्यापीत्येके ।। एताश्चैकविंशतिर्यज्ञसंस्थाः प्रचारबाहुल्याभिप्रायेण नित्यत्वाभिप्रयेणा–वश्यकर्तव्यताभिप्रायेण चोपन्यस्ताः । तथाहि– जायमानो वै ब्राह्मणास्त्रिभिर्ऋणवाँ जायते– ब्रह्मचर्येण ऋषिभ्यो, यज्ञेन देवेभ्यः, प्रजया पितृभ्यः ।। एष वा अंनृणी, यः पुत्री यज्वा ब्रह्मचारी च। इति श्रुतेः प्राणिमात्रे नाप्राप्तस्य देवर्णस्यापनयनार्थं हीमे एकविंशतिसंस्था यज्ञा विधीयन्ते। तस्मादशूद्राणां सर्वेषामेवैतेऽवश्यकर्तव्या इष्यन्ते । शूद्राणां तु विद्या नास्तीत्यशक्तत्वादधिकारो निरस्यते इत्यन्यत्। त्रैवर्णिकेन तु समर्थेनाफलार्थिनाऽप्येते कर्तव्या इति नित्यत्वम्। अतएव चैषां पुरात्वेऽधिकप्रचार आसीदिति बोध्यम्।

श्रूयते चैकविंशतित्वमित्थं यज्ञानां गोपथश्रुतौ सप्तसुत्याः, सप्त च पाकयज्ञा, हविर्यज्ञाः सप्त, तथैकविंशतिः। "सर्वे ते यज्ञा अङ्गिरसोऽपियन्ति नूतना यानृषयः सृजन्ति ये च सृष्टाः पुराणैः" – इति ।। (५ । २५) ।। सायं प्रातर्नित्यहोमौ स्थालीपाको नवश्च यः। बलिश्च पितृयज्ञश्च अष्टका सप्तमः पशुः इत्येते

पाकयज्ञाः ।।- अग्न्याधेयमग्निहोत्रं पौर्णमास्यमावास्ये। नवेष्टिश्चातुर्मास्यानि पशुबन्धोऽत्र सप्तमः - इत्येते हविर्यज्ञाः। अग्निष्टोमोऽत्यग्निष्टोम उक्थ्यः षोडशिमांस्ततः। वाजपेयोऽतिरात्रश्च आप्तोर्यामोऽत्र सप्तमः - इत्येते सुत्याः ।। (गो. ब्रा. ५ प्र. २३) इति ।। इत्थं चैकविंशतेः संग्रहेण त्रयो यज्ञाः प्रसिध्यन्ति पाकयज्ञो हविर्यज्ञः सोमयज्ञ इति ।। पूर्वं त्रेतायामेव त्रैविध्यस्येष्टत्वात् पाकयज्ञं त्यक्त्वा पशुबन्धेन त्रैविध्यमुक्तम् । इह तु त्रैतोपेक्षणात् पाकयज्ञस्यापि संग्रहेण त्रैविध्यमाख्यातम्। पशुबन्धस्य पशुपुरोडाशतया हविर्यज्ञेऽन्तर्भावयितुं शक्यत्वात् ।। इति दिक् ।।४।।

अपरस्तु सर्वानेव यज्ञानन्यथा विभजते। तथाहि यज्ञः पञ्चधा-शिरोयज्ञः[१], अतियज्ञः[२], महायज्ञः[३], हविर्यज्ञः[४], पाकयज्ञश्चेति[५]।

शिरोयज्ञः ।१।

यज्ञो वै विष्णुः। सोऽसावादित्यः। तस्य धर्मः प्रवर्ग्यः शिरोभागः। छिन्न शीर्षा हि सर्वो यज्ञः। स शिरोयज्ञेन शीर्षणवान् भवति। स यदेतेन यज्ञस्य शिरः प्रतिसन्धत्ते तेनासौ शिरोयज्ञो नाम। नात्र प्रणीताः प्रणयन्ति। नात्र प्रयाजानुयाजाः। नाज्यभागावत्र जहोति मृन्मयैरेवात्र जुहोति न वानस्पत्यैरिति विशेषः तत्र सहस्रे प्रवृज्ज्यात्, सर्ववेदसे च विश्वजिति च वाजपेये च राजसूये च सत्रे च एतान्येवास्य प्रवर्जनानि। नातोऽन्यत्र। तेनाग्निहोत्रं दर्शपूर्ममासौ चातुर्मास्यानि पशुबन्धः सौम्योऽध्वरश्चेत्येते सर्वेऽप्यप्रवर्ग्याः। सोऽयं घर्मयागः। प्रवर्ग्ययागः। सम्राड्यागः। महावीरोपासना चेत्येभिः शब्दैर्व्यपदिश्यते ।। इति शिरोयज्ञाधिकारः ।।१।।

अतियज्ञः ४

अथाग्निचित्या, वाजपेयः, राजसूयः, अश्वमेधः इत्येते चत्वारोऽतियज्ञाः। त इमे परमा यज्ञाः सर्वानन्यानतिक्रामन्ति, नैनानतिक्रामन्ति महायज्ञादयः। "अतीनि ह कर्म्माणि सन्ति-यान्यन्यत् कर्म्माति तानि। अतीनि तेषामग्निचित्या, राजसूयो, वाजपेयोऽश्वमेधः। तद्यत् तान्यन्यानि कर्म्माण्यति, तस्मात् तान्यतीनि"।। (शत० ६.४.३.१) ।। एष्वप्यश्वमेधाद्राजसूयादयोऽतिश्रेष्ठाः। तेष्वपि - "अवरं वै राजसूयं परं वाजपेयम् । राजा वै राजसूयेनेष्ट्वा भवति, सम्राड् वाजपेयेन। अवरं हि राज्यं परं साम्राज्यम् इति वाजपेयश्रुतेः" (शत० ४।१।१) राजसूयाद्वाजपेयोऽतिशेते। ततोऽप्यग्निचित्या त्रीनन्यानतिक्रमते। अमृतप्राप्तिहेतुत्वात् । अन्येषु नामृतत्वस्याशास्ति। तत्र गार्हपत्यो नैर्ऋत्य आहवनीयोऽष्टो धिष्ण्याश्चेत्येतेषामेकादशानामग्नीनां सोमसंबन्धिनां संस्कारविशेषोऽग्निचयनं नामातियज्ञः। स द्विविधः- स्वतन्त्रः, सोमाङ्गूतश्च। अन्तरेणाप्यग्निचयनं सोमः क्रियते। इच्छतस्तु स महाव्रते सोमेऽग्निचयनस्यावस्यकत्वात् । तत्रायमङ्गभूतश्चयनयागः प्रतिपद्यते। अथ यः सोमयागं विनैव क्रियते स स्वतन्त्रः। तत्राध्वरधर्मा अप्यनुक्रमन्तेऽग्निधर्माश्च। फाल्गुन्यां पश्वालम्भोऽनन्तराष्टकायामुखा संभरणमनन्तरामावस्यायां दीक्षा।। ततः संवत्सरं यावदुख्याग्निधारण - विष्णुक्रम वात्सप्रादिकर्माणि। संवत्सरान्ते फाल्गुन्या अनन्तरामावास्यायां सोमक्रयः। सोमक्रयात् प्रागेव गार्हपत्यचयनं नैर्ऋत्यचयनं सोमक्रयादूर्ध्वं चैत्रशुक्लेऽन्तरोपसदावाहवनीयाग्नेः पञ्च चितयः। ततः शतरुद्रियहोमः। अग्निविकर्षणम्। प्रवर्ग्योत्सादनमग्निप्रहरणं वैश्वानरमारुताः। वसोर्धारा । आहुतयः। धिष्ण्याग्निचयनम् । इति चयनकर्माणि ।।

त एते चत्वारो ऽतियज्ञा उक्ताः । एषु चतुर्ष्वतियज्ञेष्वग्निचित्यावाजपेययोर्ब्राह्मण एवाधिकुरुते, राजसूयाश्वमेधयोस्तु राजन्य एवेति विशेषः। इत्यतियज्ञाधिकारः ।।२।।

महायज्ञः १७५

अथ महायज्ञो द्वेधा-सोमःसुरा च। तत्र सोमः पञ्चधा-एकाहः, अहीनः, रात्रिसत्रम्, अयनसत्रम्, महासत्रं चेति।। एकेनाह्ना साध्य एकाहः। द्विरात्रमारभ्य दशरात्रपर्य्यन्ता अनेकाहसाध्या अहीनाः। तत्र दशाहो द्विविधः- छन्दोमदशाहः, त्रिककुब्दशाहश्चेति भेदात्। एकादशरात्रमारभ्य शतरात्रपर्य्यन्तं बहुरात्रसाध्यानि रात्रिसत्राणि। शतरात्रादूर्ध्वं सहस्ररात्रिपर्य्यन्तमयनसत्राणि। तदित्थम् - एकदशशतसहस्रभेदाच्चतुर्धा भिन्नाः सोमा भवन्तीत्येकं मतम्। (१।१०।१००।१०००)। द्विरात्रमारभ्य द्वादशरात्रपर्य्यन्तमहीनाः। एकादशरात्रमारभ्य संवत्सरादर्वाक् रात्रिसत्राणि। एकसंवत्सरसाध्यमारभ्य सहस्रसंवत्सरपर्य्यन्तमयनसत्राणि। तथा चायमेकादशाहो द्वादशाहश्चेत्युभयो द्वेधा संपद्यते अहीनभूतः, सत्रभूतश्चेति। तत्रापि द्वादशाहो द्विविधः- व्यूढद्वादशाहो भरतद्वादशाहश्चेति भेदात्। तदित्थम्-एकाहद्वादशाहैकसंवत्सरसहस्रसंवत्सर परिच्छेदाच्चतुर्धा भिन्नाः सोमा भवन्तीत्यपरं मतम् (१।१२।३६०।३६००००)।। महासत्राणि तु यावज्जन्मसाध्यानि। तत्र सोमानियमेऽपि चिररात्रसाध्यत्वात् सत्रशब्दः प्रवर्तते। अथादौ सोमाधेयमन्ते च काम्यसोमान् प्रवेशयन्तः केचिदिष्टिवत् सोमेऽपि साप्तविध्यमिच्छन्ति।।

एकाहाः ५७

तत्रैकाहा बहुविधा इष्यन्ते। तेषां प्रकृतिभूतः प्रधानैकाहो ज्योतिष्टोमः। स च सप्तसंस्थः प्रतिपद्यते- अग्निष्टोमः[१]। अत्यग्निष्टोमः[२]। उयथ्यस्तोमः[३]। षोडशिस्तोमः[४]। अतिरात्रस्तोमः[५]। वाजपेयस्तमः[६]। आप्तोर्यामस्तोमः[७]। इति ।। एता हि तस्य सप्त संस्थाः।। सर्वेऽप्येतेऽग्निष्टोमसंपन्ना भवन्तीत्यतः सप्तसंस्थोऽप्य-यमग्निष्टोम इत्युच्यते।। आग्नेय्यां यज्ञायज्ञियायामृच्युत्पन्नेनाग्निष्टोमसाम्ना समाप्तेरप्ययमग्निष्टोमो नाम। प्रातःसवने बहिःपवमानस्त्रिवृत्स्तोम इति नवस्तोत्रीयाः ६।। आज्यस्तोत्राणि चत्वारि पञ्चदशस्तोम इति पञ्चदशानीति षष्टिः। माध्यन्दिने सवने माध्यन्दिनः पवमानः पञ्चदशस्तोम स्तोत्रीयाः। १५।। पृष्ठस्तोत्राणि चत्वारि सप्तदशानीत्यष्टषष्टिः स्तोत्रीयाः ६८।। तृतीयसवने आर्भवः पवमानः सप्तदश इति सप्तदश स्तोत्रीयाः १७।। अग्निष्टोमस्तोत्रमेकविंशमित्येकविंशतिः स्तोत्रीयाः २१।। इत्थमत्र नवत्यधिकं शतं स्तोत्रीयाः संपद्यन्ते। ताश्चोनविंशतयो दश भवन्ति। दशाक्षरत्वाच्चायमग्निष्टोमो विराट्। विराड्हि छन्दसां ज्योतिः। तस्मादयमग्निष्टोमो ज्योतिष्टोम इत्युच्यते।। त्रिवृत्पञ्चदशसप्तदशैकविंशाख्यैश्चतुर्भिर्ज्योतिषां स्तोमैःसाध्यत्वादप्ययं ज्योतिष्टोम इत्युच्यते चतुष्टोमश्च। अग्निष्टोमः, उयथ्यः, षोडशी, अतिरात्रः-इत्येतेषां चतुर्णां संघेऽपि चतुष्टोमशब्दो व्यवह्रियते। त इमे याज्ञिकानां संप्रदायभेदाद् व्यवहारभेदा भवन्ति।। वाजपेयस्त्वयमग्निष्टोमसंस्थाविशेषः पूर्वस्मादतियज्ञविशेषाद्वाजपेयादतिरिच्यते।।

स चायमग्निष्टोमः पञ्चाहसाध्यः। वसन्ते पूर्णिमायां प्रतिपद्यमायां प्रतिपदि वा प्रारम्भः। प्रथमेऽहनि दीक्षादीक्षणीयाद्याङ्गानुष्ठानम्। द्वितीयेऽहनि प्रायणीययागः। सोमलताक्रयणं च।। ततो द्वितीये तृतीये चतुर्थे चाहनि प्रातःसायं च प्रवर्ग्योपसद्यागः। चतुर्थेऽहनि प्रवर्ग्योद्वासनादूर्ध्वमग्नीषोमीयपश्वनुष्ठानम्। सोमलताकण्डनेन सोमरसं निष्कास्य ग्रहैश्चमसैश्च होमः।। तत्र सूर्योदयादूर्ध्वमाग्नेयपशुयागः। उक्थपर्य्यायान्ते कृते प्रातःसवनसमाप्तिः। ततो मध्यन्दिनसवनम्। तत्रैव द्वादशोत्तरशतं गावो दक्षिणा दीयन्ते।

ततस्तृतीयसवनम् । इत्थं सवनत्रयात्मकः प्रधानयागः । ततोऽवभृथयाग उदके वरुणदेवताकः पुरोडाशहोमः ।। ततोऽनुवन्ध्या पशुयागः । तत्र गोः पशोः कलिनिषिद्धत्वात् तत्स्थाने आमीक्षायागः । तत उदयनीया चोदवसानीया च पञ्चमेऽहनि यावद्रात्रि कार्य्या ।। इति कार्य्यक्रमः । दीक्षोपसत्सुत्यानां सुत्यायाः प्राधान्यात् तदनुरधेनास्यैकाहत्वमिष्यते ।।

चतुष्टोमे अग्निमारुतादूर्ध्वमागमात् त्रयाणां शस्त्राणामुक्थो भवति । एकागमादूर्ध्वमुक्थेभ्यः षोडशी । त्रयोदशागमादूर्ध्वं षोडशिनोऽतिरात्रः ।। अन्तरेणाग्निमारुतमनुयाजांश्चैतेषां स्थानम्- इत्याह शांखायनः । भाष्यकारस्त्वाह - अग्निष्टोमादूर्ध्वमुक्थः । ततः षोडशी ततोऽतिरात्रः इतिक्रमो नियमेन नापेक्ष्यते । अत्यग्निष्टोमे अग्निमारुतादूर्ध्वं षोडशिग्रहे स्तुते शस्त्रम् । उक्थशस्त्रेऽप्यूर्ध्वं नावश्यं षोडशिचरणम् । अकृत्वापि षोडशिनं त्रयोदशागमादतिरात्रो भवति इति ।।

अथ वैकारिका एकाहा अङ्गिरसकल्पे वैतानसूत्रे ताण्ड्यादिषु चोक्ताः । यथा-१ त्रिवृत्स्तोमः, २ पञ्चदशस्तोमः, ३ सप्तदशस्तोमः, ४ एकविंशतिस्तोमः, ५ त्रिणवस्तोमः, ६ त्रयिस्त्रिंशस्तोमः, ७ सर्वस्तोमोऽतिरात्रः, ८ चतुर्विंशस्तोमः, ९ विषुवत्स्तोमः, १० अभिजित् स्तोमः, ११ सर्वजितस्तोमः, १२ विश्वजित्स्तोमः, १३ बलभित्, १४ उद्भित्, १५ पुनस्तोमः, १६ सूर्य्यस्तोमः, १७ इन्द्रस्तोमः, १८ मरुत्स्तोमः, १९ भूमिस्तोमः, २० प्रतीचीनस्तोमः, २१ वैश्यस्तोमः, २२ व्रात्यस्तोमः, २३ अग्नेःकुलायः, २४ इन्द्राग्न्योः कुलायः, २५ तीव्रसुत्, २६ गोसवः, २७ बृहस्पतिसवः, २८ वनस्पति सवः, २९ त्विट्, ३० एट्, ३१ विराट्, ३२ स्वराट्, ३३ सम्राट्, ३४ विराजः, ३५ राजसूयः, ३६ वाजपेयः, ३७ दशपेयः, ३८ चतुःपर्य्यायः, ३९ अपूर्वः, ४० विघनः, ४१ विवधः, ४२ उपहव्यः, ४३ उपसदः, ४४ सदः, ४५ राशिः, ४६ मरापः, ४७ ऋषभः, ४८ अपचितिः, ४९ विनुतिः, ५० अभिभूतिः, ५१ साद्यस्क्रः, ५२ विभ्रंशयज्ञः, ५३ सदंशः, ५४ अभिषेचनीयः, ५५ अजिरवज्रः, ५६ वज्रः, ५७ इषुः, ५८ श्येनः एवमेवान्यत्र विहिता अन्येऽप्येकाहा द्रष्टव्याः ।।इत्येकाहप्रचयः ।।

अहीनाः ३५

अथाहीना वैतानसूत्रादिषूक्ता यथा व्युष्टिः । आङ्गिरसः । कापिवनः । चैत्ररथः । गो आयुषी । इत्येते पञ्च द्व्यहाः ।। ० ।। ५ ।। चत्वारि सौमिकचातुर्म्मास्यानि वैश्वदेव[१] - वरुणप्रघास[२] - शाकमेध[३]शुनासीर्य्याणि[४] । गर्गत्रिरात्रम्[५] । वैदत्रिरात्रम्[६] । चतुर्विंश[७]चतुश्चत्वारिंशा[८]ष्टाचत्वारिंशैरेकाहैश्छन्दोभवत्[९] त्र्यहः । पराकः[१०] । अन्तर्वसुः[११] । अश्वमेधः[१२] । स्वरसामनस्त्रयः[१३] । पृष्ठत्र्यहः[१४] । ज्योतिर्गौरायुरित्याभिप्लविकत्र्यहः[१५] - इति अहाः पञ्चदश ।।०।।१५।।०।।

संसर्पः । चतुर्वीरः - इति द्वौ चतुरहौ ।।०।।२।। अभ्यासङ्ग्यः[१] । पञ्चशारदीयः[२] । ज्योतिर्गौरायुर्गौरायुरित्य-भिप्लवपञ्चाहः[३] । पृष्ठ्यपञ्चाहः[४]-इति चत्वारः पञ्चाहाः ।।०।। ।। ४।। ज्योतिर्गोरायुर्गौरायुर्ज्यातिरित्य-भिप्लवषडहः[१] । त्रिवृत्पञ्चदशसप्तदशैकविंशत्रिणवत्रयस्त्रिंशाः पृष्ठ्यः षडहः[२] ।। इति द्वौ षडहौ ।। ० ।। २ ।।

आभिप्लविकः षडहो महाव्रतान्त्यः सप्ताह एकः ।।१ ।। आभिप्लविकः षडह एव गौरायुरिति द्व्यहेन युक्तोऽष्टाह एकः ।। ० ।। ।। १ ।।

अभिजित्[१], स्वरसामानस्त्रयः[३], (विषुवान्[१], स्वरसामानस्त्रयः[३]) विश्वजित्[१]-इत्येष एतैर्नवरात्र एकः ।।०।।१ ।। पृष्ठ्यषडहः, छन्दोमत्र्यहः। चतुर्विंशात्मकोऽविवाक्यश्चैकाहः - इत्येतैः षडहत्र्यहैकाहैः कृतः पृष्ठ्यच्छन्दोमाविवाक्यात्मकः- छन्दोमदशाहः त्रिककुबूदशाहः ।।० ।। २ ।।

दशाह एव महाव्रतान्त्य एकादशाहः ।। ० ।।१ ।। पृष्ठ्यच्छन्दोमाविवाक्यात्मको दशाह एवाद्यन्ताभ्यामतिरात्राभ्यां संपुटितो भरतद्वादशाहः ।। पृष्ठ्यच्छन्दोमाविवाक्यमहाव्रतातिरात्रात्मकस्तु व्यूढद्वादशाहः ।१ ।।२ ।। द्वादशसुत्यः क्रतुर्द्वादशाहः सुत्यानि सावनमानपरिमितान्यहानि। सर्वमेवाहः-त्रिवृत्स्तोमं रथन्तरपृष्ठमग्निष्टोमसंस्थं भवतीति शांखायनः ।। इत्यहीनसोमाः पञ्चत्रिंशदाख्याताः ।।० ।।३५ ।। इत्यहीनप्रचयः ।।

भरत - द्वादशाहः				
१ प्रायणीयोऽतिरात्रः	दशाहः			१ उदयनीयोऽतिरात्रः
	पृष्ठ्यःषडहः	छन्दोमाः	अविवाक्यम्	
	९ १५ १७ २१ २७ ३३	२४ ४४ ४८	२४	
	१ २ ३ ४ ५ ६	७ ८ ९	१०	

व्यूढछन्दा द्वादशाहः				
एकादशाहः			महाव्रतम्	अतिरात्रः
दशाहः				
पृष्ठ्यःषडहः	छन्दोमाः	अविवाक्यम्		
९ १५ १७ २१ २७ ३३	२४ ४४ ४८	२४	२४	
१ २ ३ ४ ५ ६	७ ८ ९	१०	१	१

अथ रात्रिसत्राणि ३२

द्वादशाहप्रभृतीनि शतरात्रपर्य्यन्तानि रात्रिसत्राणि। तत्र द्वादशाहप्रभृतीनि चत्वारिंशद्रात्रपर्य्यन्तान्येकोत्तराणि सत्राणि ऊनत्रिंशत्। तत उत्तराणि तु कानिचिद्वैशेषिकाणि त्रीणि भवन्ति। तत्रैतेष्वेकोत्तरसत्रेषु नित्यो द्वादशाहः। स यैरहोभिर्यथा यथा विवर्द्धमानस्तत्तदेकोत्तरसत्ररूपाय संपद्यते तान्याख्यायन्ते।

एकाहआहरणीयः	महाव्रतम् ।१		
द्व्यहः, (२) २ =	गौः ....१ आयुः.......२	षडहः, (१) (२) ६= (१) (२)	ज्योतिः....१ गौः........२ आयुः......३ गौः........४ आयुः......५ + ज्योतिः.....६
त्र्यहः, (१) ३= (२)	ज्योतिः....१ गौः ....२ आयुः ३	सप्ताहः, (१) (२) (२)	+ ज्योतिः.....१ गौः........२ आयुः......३
चतुरहः, (१) ४= (२) (१)	+ ज्योति.....१ गौः........२ आयुः......३ महाव्रतम् ४		

पञ्चाहः, ५=	(१) (२) (२)	+ ज्योति.....१ / { गौः........२ आयुः......३ } / { गौः........४ आयुः......५ }		७ = (१)	{ गौः........४ आयुः......५ } / + ज्योतिः.....६ / + महाव्रतम् ७

एतेषां स्थानानि यथा –

५	४	३	२	१
२१ एकावशः	१७ सप्तदशः	१४ पञ्च दशः	६ त्रिवृत्	प्रयणीयः
		ड	पृष्ठ्यः ष	अतिरात्रः
		द–		एकाहः

६ २७ त्रिणवः

७ ३३ त्रयस्त्रिंशः

सत्रप्रकृतिः भतर – द्वादशाहः ॥

छन्दोमा	त्र्यहः			एकाहः
		हः	एकाहः	अतिरात्रः
२४ चतुर्विशः	४४ चतुरचत्वारिंशः	४८अष्टचत्तवारिश	२४अविवाक्यम्	उदयनीयः
८	६	१०	११	१२

एतस्य द्वादशाहस्य दशमादह ऊर्ध्वं महाव्रतमाहरन्ति, ततस्त्रयोदशरात्रं संपद्यते। अथवा पृष्ठ्यं छन्दोमाश्चान्तरेण सर्वस्तोममतिरात्रम्। ततस्त्रयोदशरात्रं संपद्यते ॥१३॥ तदित्थमेकाहार्थे दशरात्रादूर्ध्वं महाव्रतमाहरेत् पृष्ट्यादूर्ध्वं सर्वस्तोमं वातिरात्रम् ॥१३॥ अथ द्व्यहार्थे गो आयुषो वर्द्धयेत् ॥१४॥ त्र्याहार्थे त्रीणि पूर्वाण्याभिप्लविकानि ज्योतिर्गौरायुरिति वर्द्धयेत् ॥१५॥ चतुरहार्थे तान्येव महाव्रतचतुर्थानि ॥१६॥ पञ्चाहार्थे आभिप्लविकान्यादितः पञ्च वर्द्धयेत् – ज्योतिः, गोरायुः,गौरायुरिति ॥१७॥ षडहार्थे आभिप्लविकं षडहं वर्द्धयेत् – ॥१८॥ सप्ताहार्थे तु महाव्रतसप्तमं षडहमाभिप्लविकम् ॥१६॥ तदतऊर्ध्वमप्यनेनैव न्यायेन तां तां संख्यां पूरयन्ति ॥ एतत् सप्तकस्य चतुरावृत्या द्वादशाहे संनिवेशाच्चत्वारिंशद्रात्राणि संपद्यन्ते ॥ द्वादशाहे चान्तरेण प्रायणीयं पृष्ठ्यं चैतेषां द्व्यहादीनां प्रवर्द्धनकानां स्थानंभवति।

अथ विंशातिरात्रमेकविंशतिरात्रं चतुर्विंशतिरात्रं त्रयस्त्रिंशद्रात्रं सप्तविंशद्रात्रमित्येतेषु पञ्चसु केचन विशेषा आख्यायन्ते। ततोऽन्यत्राचत्वारिंशद्रात्रात्सर्वेषु एकोत्तरसत्रेषु पूर्वोक्ते न क्लृप्तिन्यायेनैव सा सा संख्या पूर्य्यते। यद्यदल्पसंख्यं तत् तत्पूर्वं कुर्य्यादिति हि स क्लृप्तिन्यायः ॥

द्वादशाहस्य प्रायणीयं दशरात्रं चान्तरेणागन्तूनामष्टानामह्नां संनिवेशाद्विंशति रात्रसिद्धिः। तथा हि – प्रायणीयः, १ अभिप्लवषडहः, ७ अभिजित्, ८ विश्वजित्, ९ पृष्टः षडहः, १५ छन्दोमा त्र्यहः, १८ अविवाक्यम् , १९ उदयनीयः – २० इति क्रमो विंशातिरात्रस्य ॥२०॥

अथैकविंशतिरात्रः। स द्वेधा पूर्वश्चोत्तरश्च। प्रायणायः, १ अभिप्लवषडहः, ७ अतिरात्रः, ८ अभिप्लवषडहौ द्वौ, उदयनीयः- इत्येवं पूर्वः।। प्रायणीयः १ पृष्ठयः षडहः ६ स्वरसामनस्त्रयः ३ विषुवानहः १ स्वरसामानस्त्रयः ३ पृष्ठ्यःषडहो विपरीतः ६ उदयनीयः १ इत्येवमेकविंशातिरात्र उत्तरः।।

अथ क्लृप्तिन्यायेन कल्पितानामह्नामागन्तूनां द्वादशाहस्य प्रायणीयं दशरात्रं चान्तरेणैव संनिवेशः सर्वत्र। तथा च प्रायणीयः, आगन्तून्यहानि, दशरात्रः, - उदयनीय-इत्येवं क्रमा वक्ष्यमाणानां ज्ञेयाः। आगन्तूनि त्वहानि क्रमेणोदाहरामः।

त्र्यहः ३ अभिप्लवषडहः ६ महाव्रतं १ चेति द्वाविंशतिरात्रः ।।२२।। अभिप्लवपञ्चाहः, अभिप्लवषडहः- इति त्रयोविंशातिरात्रः ।।२३।।

प्रायणीयः १। पृष्ठ्यस्तोमषडहः। त्रयस्त्रिंशमहरनिरुक्तम् १। त्रयस्त्रिंशमहर्निरुक्तम् १। त्रिणवस्तोममेकमहः१ ।एकविंशम्। पुनरेकविंशम्१। त्रिणवस्तोममेकमहः१। त्रयस्त्रिंशं निरुक्तम् १। त्रयस्त्रिंशमहरनिरुक्तम्। पृष्ठ्यस्तोमषडहो विपरीतस्त्रयस्त्रिंशारम्भणः ६। त्रिवृदहनिरुक्तम् १। ज्योतिष्टोमोऽग्निष्टोमः१। उदयनीयः १। इति चतुर्विंशतिरात्रः ।।२४।।

अथ द्वावभिप्लवौ। महाव्रतमिति पञ्चविंशतिरात्रः ।।२५।। गो आयुषी। द्वावभिप्लवौ-इति षड्विंशतिरात्रः ।।२६।। त्र्यहः। अभिप्लवौ द्वौ-इति सप्तविंशतिरात्रः ।।२७।। त्र्यहः। अभिप्लवौ द्वौ। महाव्रतं चेत्यष्टाविंशतिरात्रः ।।२८।। पञ्चाहः। अभिप्लवौ द्वौ - इत्येकोनत्रिंशद्रात्रः ।।२९।। त्रयोऽभिप्लवाः - इति त्रिंशद्रात्रः - ।। ३०।। त्रयोऽभिप्लवाः। महाव्रतं चेत्येकत्रिंशद्रात्रः ।।३१।। गो आयुषी । त्रयोऽभिप्लवाः - इति द्वात्रिंशद्रात्रः ।।३२।। त एतेऽष्टौ न्यायक्लृप्ताः ।।

प्रायणीयः १। पञ्चाहाभिप्लवास्त्रिरावृत्ताः १५। विश्वजिदतिरात्रः १। पञ्चाहाभिप्लवः ५। दशरात्रः १०। उदयनीयः १ इत्येवं त्र्यस्त्रिंशद्रात्रो विधीयते।। ३३।।

अथ ज्योतिः, गौः, आयुरित्येतान्याभिप्लविकानि त्रीण्यहानि ३ त्रयोऽभिप्लवाः षडहाः १०। महाव्रतं चेति चतुस्त्रिंशद्रात्रः ।।३४।। पञ्चाहः ५। त्रयोऽभिप्लवाः १८ इति पञ्चत्रिंशद्रात्रः ।।३५।। चत्वारोऽभिप्लवाः- इति षट्त्रिंशद्रात्रः ।।३६।। त एते त्रयो न्यायक्लृप्ताः ।।

प्रायणीयः १। चतुर्विंशमहः १। अभिप्लवषडहः ६। पृष्ठ्यषडहः ६। नवरात्रः ९। गो आयुषो २। दशरात्रः १०। महाव्रतम् १। उदयनीयः १ इति सप्तत्रिंशद्रात्रः।। अत्राभिजित् - स्वरसाम - विषुवत् - स्वरसामविश्वजिद्भिर्नवरात्रः संपद्यते। दश रात्रस्तु पृष्ठ्यषडहेन छन्दोमत्र्यहेणाविवाक्येन च संपद्यमानो द्वादशाहस्थः ।।३७।।

अथ गो आयुषी। चत्वारोऽभिप्लवाः। इत्यष्टत्रिंशद्रात्रः ।।३८।। त्र्यहः। चत्वारोऽभिप्लवाः- इत्येकोनचत्वारिंशद्रात्रः ।।३९।। त्र्यहः। चत्वारोऽभिप्लवाः। महाव्रतं चेति चत्वारिंशद्रात्रः ।।४०।। त एते त्रयो न्यायक्लृप्ताः। तदित्थं वैशेषिकाणि च न्यायक्लृप्तानि चेत्येवं कृत्वा विभक्तान्येकोत्तराणि सत्राणि दर्शितानि ।। अत ऊर्ध्वं त्रीणि वैशेषिकाणि भवन्ति तान्युदाहराम:।।

प्रायणीयः। चतुर्विंशमहः। त्रयोऽभिप्लवाः। नवरात्रः। अभिप्लवाः। गो आयुषी। दशरात्रः। महाव्रतम्। उदयनीयः - इत्येष एकोनपञ्चाशद्रात्रः। स एष संवत्सरसत्रधर्म्मैर्युक्त इत्यतः संवत्सरसम्मित उच्यते ।। ४९।। अथैतस्मिन्नेकोनपञ्चाशद्रात्रे यो नवरात्रः, तमुभयतः पृष्ठ्यावनुलोमप्रतिलोमौ संनिवेश्यौ।

तथा चैकषष्टिरात्रः संपद्यते। अनुलोमपृष्ठ्यस्त्रिवृदारम्भणस्त्रयस्त्रिंशपर्य्यवसानः। स नवरात्रात् प्राग् विधीयते। यस्तु त्रयस्त्रिंशारम्भणस्त्रिवृत्पर्य्यवसानः स प्रतिलोमः। स नवरात्रादुपरिष्टाद्विधीयते।। अन्यत् समानम्।। ६१।। प्रायणीयः १। आभिप्लविकस्त्र्यहः ३। अभिप्लवाश्चतुर्दश १४। दशरात्रः १०। महाव्रतम्१। उदयनीयः १ । इतीत्थं न्यायक्लृप्तः शतरात्रः १००।। तदित्थं द्वात्रिंशदेतानि रात्रिसत्राणि व्याख्यातानि।।३२।।

इति रात्रिसत्रपरिचयः।

अथ अयनसत्राणि ३५

गवामयनम्, आदित्यानामयनम्, अङ्गिरसामयनम्-इति त्रीणि मुख्यानि ज्योतिषामयनानि।।३।।

नाक्षत्रं, चान्द्रं, तैर्य्यगयनम्-इति त्रीणि गौणानि ज्योतिषामयनानि ।।३।। तत्रैतद् गवामयनमष्टविकल्पं नाक्षत्रं तु द्विविधम्।। इति चतुर्द्दशैतानि भवन्ति।। संसदामयनम्, उत्सर्गिणामयनम् , अभिप्लवायनम्-इत्येतानि त्रीणि वैकारिकाणि गवामयनानि।।३।। कौण्डपायिनामयनम्, दृतिवातवतोरयनम् , सर्पसत्रम् - इत्येतानि त्रीणि वैशेषिकाणि।।३।। तापश्चितम्, क्षुल्लकतापश्चितम् , महातापश्चितम् - इति त्रीणि तापश्चितानि ।।३।। बहुसांवत्सरिकम्, प्रजातिकामानामयमयनम् , प्रजापतेरयनम्, शाक्त्यानामयनम्, साध्यानामयनम्, विश्वसृजामयनम्, अग्नेः सहस्रसाव्यं सत्रम्, प्रजापतेरयनम् - इत्येतान्यष्टौ बहुसांवत्सरिकाणि।।८।। मित्रावरुणयोरयनम् , इन्द्राग्न्योरयनम् , अर्य्यमायणम - इति त्रीणि सारस्वतानि।।३।। दार्षद्वतं चैकम्।।१।। इत्येवमेतानि कल्पोक्तानि पञ्चत्रिंशदयनसत्राणि।।३५।।

तत्र गवामयनं नाम संवत्सरसत्रेऽहर्गणाः प्रदर्श्यन्ते। शारदविषुवद्दिनमारभ्य शारद विषुवद्दिनपर्य्यन्तमह्नां षष्ट्युत्तर त्रिशत्या साध्येऽस्मिन् सत्रे प्रायणीयोऽतिरात्रः प्रथममहः। चतुर्विंशस्तोममुक्थं द्वितीयमहः तदारम्भणीयम्।। अथातः परे चत्वारोऽभिप्लवाः पृष्ठ्यपञ्चमाः प्रथमो मासः।। एवं द्वितीयतृतीयचतुर्थपञ्चमा मासाः संपाद्याः।।

ततस्त्रयोऽभिप्लवाः पृष्ठ्यचतुर्थाः।।०।। ततोऽभिजिदेकम् , स्वरसामानस्त्रयः, विषुवदेकं, स्वरसामानस्त्रयः, विश्वजिदेकम्, इत्येतैर्नवभिरग्निष्टोमैर्नवरात्रम्।।०।। ततः पृष्ठ्यपूर्वास्त्रयोऽभिप्लवाः।। तेन विषुवदहं दिवाकीर्त्यस्तोममभितोऽष्टाविंशिनौ मासौ षष्ठसप्तमौ संपद्येते। विषुवांस्तु नावरेषां न परेषामित्याहुः कौषोतकिनः (२३। १-२)।।०।। ततः पृष्ठ्यापूर्वाश्चत्वारोऽभिप्लवा अष्टमो मासः। एवं नवमदशमैकादशा मासाः संपाद्याः।।०।। ततस्त्रयोऽभिप्लवाः।।०।। ततो गौरायुरिति दव्यहमुक्यम्।। ततः पृष्ठ्यच्छन्दोमा-विवाक्यात्मको दशाहः।। ततः पञ्चविंशस्तोमं महाव्रतं नामोपान्त्यमहः।। तत उदयनीयोऽतिरात्रः सर्वान्त्यमहः।।०।। तदित्थमिह संवत्सरे षष्टिः षडहा भवन्ति। एकश्चातिरिक्तो विषुवान्, स आत्मा ।। अपि वा अस्मिन् संवत्सरे द्वावतिरात्रस्तोमौ २। शतं च षट् चाग्निष्टोमाः १०६।। चत्वारिंशे द्वे शते उक्थास्तोमाः २४०।। द्वादश तु षोडशिस्तोमाः १२।। इत्थमह्नां षष्ट्युत्तरत्रिशती संपद्यते। तथा चोक्तं वैतानकल्पे-

द्वावतिरात्रौ, षट् शतमग्निष्टोमा, द्वे विंशतिशते उक्थानाम्।
द्वादश षोडशिनः, षष्टिः षडहा, वैषुवतं चेति।।१।।

तदिदं गवामयनं द्वेधा-द्वादशमाससाध्यं दशमाससाध्यं चेत्याहुः। लाट्यायनः पुनरस्याष्टौ विकल्पानाह। तथाहि - सर्वाण्यहानि ज्योतिष्टोमेनैव साध्यानीत्येकः।।१।। अतिरात्रोक्थाभ्यामुपक्रान्तस्य महाव्रताति-

रात्राभ्यां संस्थितस्य अभिजित् स्वरसाम विषुवत् स्वरसाम विश्वजिद्भिर्नवरात्रं मध्ये कृत्वा शेषण्यहानि ज्योतिष्टोमाः कार्या इत्येकः ।। २ ।। गो आयुषी पृष्ठ्याभिप्लवौ, दशरात्रं चाधिकं, शेषाणि ज्योतिष्टोमाः - इत्येकः ।।३।। अभिजित् पृष्ठ्यस्वरसाम विषुवत् स्वरसाम पृष्ठ्यविश्वजिद्भिर्मध्ये एकविंशतिरत्रमित्येकः ।।४ ।। अभिजितः स्वस्थाने विश्वजितं कृत्वा विश्वजितः स्थानेऽभिजितं कुर्य्यादित्येकः ।।५ ।। अथोत्तरे पक्षसि विषुवाद्दिनादारभ्य यत् प्रातिलोम्यं विहितं तदपि द्वेधा विकल्प्यते । केचिदहरावर्तकारिणो भवन्ति । तेऽभिप्लवो क्रमान् पृष्ट्यावसानानेव मासान् कुर्वामस्तानहःप्रतिमान् कुर्वन्ति स एको विकल्पः ।।६ ।। परे तु मासावर्तकारिणः पृष्ठ्योपक्रमानभिप्लवावसानान् मासान् कुर्वाणास्तानहःप्रतिमान् कुर्वन्ति स एको विकल्पः ।।६ ।। परे तु मासावर्तकारिणः पृष्ठ्योपक्रमानभिप्लवावसानान् मासान् कुर्वाणास्तत्राहान्या-नुलोम्येनैवाचरन्ति स एको विकल्पः ।।७ ।। (गो आयुषी च ते विपर्यासयन्ति) ।। दशरात्रमप्येके आवर्तयन्ति स एकः ।।८ ।। तदित्थमष्टौ गवामयनविकल्पा भवन्ति ।।० ।।० ।।

आदित्यानामयने शांखायनः प्राह । विपुवतः पूर्वस्मिन् पटले एकस्मिन्नहनि त्रिवृत् । परस्मिन् पञ्चदश इत्येवहर्व्यत्यासेनाभिप्लवस्तोमौ कार्यौ विषुवत् उत्तरस्मिंस्तु पटले पञ्चदशत्रिवृतावभिप्लवस्तोमौ । मासास्तु मध्ये पृष्ठ्याः कार्य्याः । षष्ठे मासि त्रयोऽभिप्लवाः पृष्ठ्यचतुर्थाः । नवरात्रे त्वभिजितः स्थाने बृहस्पतिसवः । विश्वजितः स्थाने त्विन्द्रस्तोमः । ततः पृष्ठ्याभिप्लवौ । ततो व्यूढच्छन्दा दशरात्रस्त्रिवृत्स्तोमोऽग्निष्टोमसंस्थः तत उद्भिदबलभिदौ । इत्थं सप्तमो मासः । ततो मध्ये पृष्ठ्याश्चत्वारो मासाः । मध्ये पृष्ठ्यावभिप्लवौ । गो आयुषी । छंदोमदशाहश्चेति द्वादशो मासः ।।० । इत्यादित्यानामयनं नाम ज्योतिषामयनम् ।।० ।।

अङ्गिरसामयने तु त्रिवृदभिप्लवस्तोमः । पृष्ठयारम्भणाः पूर्वस्मिन् पटले मासाः, पृष्ठ्यो दयास्तूत्तरस्मिन् । आयुर्गौः शेषमादित्यानामयनवत् ।।० ।। इत्यङ्गिरसामयनम् ।।

इति मुख्यानि ज्योतिषामयनानि ।

अथ ज्योतिषामयनविकल्पा नाक्षत्रचान्द्रसौरा लाट्यायनद्राह्यायणाभ्यामुक्ताः । तथाहि - ये ते त्रिंशिनः सावना अयनमासाः कल्पिताः, तेषामेकैकस्मिन्मासि आद्यस्याभिप्लवस्य स्थाने त्रिकद्रुकाः कार्य्याः । ज्योतिर्गौरायुरित्याभिप्लविकस्त्र्यहस्त्रिकद्रुकः । उत्तरे तु पक्षस्यन्त्यस्याभिप्लवस्य स्थाने त्रिकद्रुकस्त्र्यहः । तदित्थं सप्तविंशतो नाक्षत्रा मासाः - इत्यतः षट्त्रिंशदूनो नाक्षत्रः संवत्सरः (३२४) ।। तदिदमेकं नाक्षत्रं ज्योतिषामयनम् ।

षष्ठस्य मासस्य य आद्योऽभिप्लवः, तस्य स्थाने ज्योतिर्गौश्च स्यातां न त्वन्यानि चत्वारि । उत्तरे तु पक्षसि सप्तममासस्य योऽन्त्योऽभिप्लवः, तस्य स्थाने ज्योतिरेवैकमहः स्यान्न त्वन्यानि पञ्च । तदित्थं सावनात् संवत्सरान्नवभिरहोभिरूनः (३५१) सा नाक्षत्र एव संवत्सरो भवति त्रयोदशमासात्मकः । तदिदं द्वितीयं नाक्षत्रं ज्योतिषामयनम् ।

द्वितीयचतुर्थषष्ठेषु युग्मामासेषु प्रथमस्याभिप्लवस्य स्थानेऽभिप्लवपञ्चाहः । उत्तरे पक्षसि त्वष्टमादिमासेष्वन्तिमस्याभिप्लवस्य स्थाने पञ्चाहः । तदित्थं षड्भिरहोभिः सावनसंवत्सरादूनश्चान्द्रमसः संवत्सरः (३५४) ।। एषा हि चान्द्रमसी गतिः ।।० ।। इति चान्द्रं ज्योतिषामयनम् ।।० ।।

अथ षष्ठमासस्यादौ त्रिकद्रुकानभिप्लवं चोपदध्यात् । सप्तममासस्यान्तेऽभिप्लवं त्रिकद्रुकांश्चोपदध्यात् । तदित्थं नवभिः पूर्वपक्षसि, नवभिरेवोत्तरपक्षसीत्यष्टादशभिरधिकोऽयमादित्यः संवत्सरः । स तैर्य्यगयनिकः ।

तिरश्ची हि गतिरान्तरिक्षी दृश्यते अस्य च पौर्णमास्यां प्रसवः ।। इति तैर्य्यगयनम् नाम ज्योतिषामयनम् ।। अत्राष्टादशदिनाधिकवं लाट्यायनोक्तं चिन्त्यम् । अष्टादशदिनाधिकस्य संवत्सरस्याप्रसिद्धेः । त्रिकद्रुकान-भिप्लवमित्यभिप्लवपदस्य त्रिकद्रुकपरिचायकत्वाभ्युपगमे त्रीण्येव पूर्वपक्षसि त्रीण्युत्तरपक्षसीत्येवं षड्भिरेवाधिकः त्रिंशत्युत्तरषट्षष्टिदिनात्मकः सौरः संवत्सरो विवक्षितः स्यादिति मन्यामहे ।।० ।।

इति गौणानि ज्योतिषामयनानि ।

अथान्ये गवामयनविकारा भवन्ति । यान्यहानि दर्शपूर्णमासाभ्यां यजनीयदिवसाभ्यां संनिपतेयुः- तान्युत्सृजेत् । तदिदं संसदामयनम् ।। अथवा पौर्णमासीभिरेव यानि सुत्यान्यहानि संगच्छेयुस्तान्येवोत्सृजेत् । अत्र पौर्णमासीशब्दो यजमानायाहर्वचनः - इति शांखायनभाष्यकारः ।। इत्युत्सर्गिणामयनम् ।।० ।। अथ दशरात्रे यः पृष्ठ्यः तं वर्जयित्वा गवामयने यावन्तः पृष्ठ्याः, तेषां स्थानेऽप्यभिप्लवाः कार्य्याः । तदिदमभिप्लवायनं नाम संवत्सरसत्रम् ।।० ।। तान्येतानि त्रीणि वैकारिकाणि गवामयनानि ।।० ।। उपसद्भिश्चरित्वा सुत्यास्थानेषु तन्त्रवत् सायं प्रातर्होमक्रमतो मासमग्निहोत्रं जुहोति ।।१ ।। दर्शपूर्णमासाभ्यामेकतन्त्रक्रियया मासमुपैति ।.।२ ।। ततश्चातुर्मास्यपर्वणां वैश्वदेव - वरुण प्रघास - साकमेध-शुनासीरीयाणामेकैकेन मासं मासमुपैति ।। तेन षण्मासाः संपन्नाः ।।६ ।। अथ मासं त्रिवृता, मासं पञ्चदशेन, मासं सप्तदशेन, मासमेकविंशेन, मासं त्रिणवेनोपैतीत्येकादशमासाः संपद्यन्ते ।।११ ।। उत्तमे तु मासेऽष्टादशाहं त्रयस्त्रिंशस्तोमेनोपैति । ततो दशाहः । ततो महाव्रतमहः । ततोऽतिरात्रं - इतीत्थं संवत्सरः पूर्य्यते ।। अत्र यो होता सोऽध्वर्य्युः स पोता । यो मैत्रावरुणः स ब्रह्मा स प्रतिहर्ता । य उद्गाता सोऽच्छावकः स नेष्टा । यः प्रस्तोता स ब्राह्मणाच्छंसी स ग्रावस्तुत् । यः प्रतिपस्थाता सोऽग्नीत् स उन्नेता । सुब्रह्मण्यः सुब्रह्मण्यः । गृहपतिर्गृहपतिः ।। तदिदं कौण्डपायिनामयनम् ।।० ।।

अथ त्रिवृदादीनां पृष्ठ्यस्तोमसंस्थानामेकैकेन मासं मासमुपैति । तेव पूर्वाः षण्मासाः संपन्नाः ।। ततो विषुवतः स्थाने महाव्रतम् ।। तत आवृत्तानां पृष्ठ्यस्तोमानामकैकेन मासं मासमुपैति । यथा मासं त्रयस्त्रिंशेन, मासं त्रिणवेन, मासमेकविंशेन, मासं सप्तदशेन, मासं पञ्चदशेन, मासं त्रिवृता - इत्येवं विपर्य्यस्तक्रमेणोत्तराः । षण्मासाः संपद्यन्ते ।। तदित्थं द्वादशमासाः क्रियन्ते - इति दृतिवातवतोरयनम् ।।०।।

अथ सर्पसत्रम्-तच्चातिरात्रोपक्रममतिरात्रसंस्थम् । मध्ये तु सर्व एवाग्निष्टोमसंस्था दिवसाः । प्रत्यहमस्य दशकाः स्तोमा भवन्तीत्यतोऽयं दशदशी संवत्सरः । अत्र यो विषुवान् द्वादशीकः । द्वादशकैः स्तोमैर्युक्तत्वात् ।। इति सर्पसत्रम् ।।० ।।

इति वैशेषिकाणि संवत्सरसत्राणि ।

अथ चतुरो मासान् दीक्षाभिः, चतुरो मासानुपसद्भिः, चतुरो मासान् सुत्याभिरुपैति । यादृशौ गवामयनस्य प्रथमोत्तमौ मासौ तादृशावस्यापि । तद्वद् विषुवांश्च, विषुवन्तमुभयतोऽष्टाविंशिनौ मासौ च । तदिदं क्षुल्लकतापश्चितं नाम सांवत्सरिकं सत्रम् ।।० ।। यत्र तु संवत्सरं दीक्षाः, संवत्सरमुपसदः, संवत्सरं सुत्याः-तत् तापश्चितं नाम त्रैवार्षिकं सत्रम् ।।० ।। अथ यदि त्रीन् संवत्सरान् दीक्षाः । त्रीन् संवत्सरानुपसदः । त्रीन् संवत्सरान् सुन्वन्ति-तदिदं नवसांवत्सरिकं महातापश्चितं सत्रम् ।

इति तापश्चितानि।

बहुसंवत्सरे सत्रे गवामयनस्याभ्यासः कार्य्यः। अथवा संहार्य्यान् मासान् परिहाप्य बहुसंवत्सरे गवामयनाभ्यासः कार्य्यः। प्रथमषष्ठसप्तमोत्तमा मासाः संहार्य्याः। तत्रैकाहानां संहारात्।। इति बहुसंवत्सरसत्राणि ।।०।। अथातिरात्रसंस्थंप्रथममहः। ततः सहस्रसंख्यान्यहानि छन्दोगवशेन। ततोऽतिरात्रसंस्थमुत्तममहः।। तदेतदग्नेः सहस्रसाव्यं सत्रम्।।०।। अथ गवामयनं प्रथमः संवत्सरः। आदित्यानामयनं द्वितीयः संवत्सरः। अङ्गिरसामयनं तृतीयः संवत्सरः। एवं त्रिसांवत्सरं प्रजातिकामानामयनम्।।०।। अथ त्रीन् संवत्सरान् त्रिवृत् स्तोमेन, त्रीन् पञ्चदशेन, त्रीन् सप्तदशेन, त्रीनेवैकविंशेन – इत्येवं त्रिवृदादीनां चतुर्णां पृष्ठ्यस्तो मानामेकैकेन त्रींस्त्रीन् संवत्सरानुपैति। तद् द्वादश संवत्सरं प्रजापतेरयनम्।।०।। एतेषामेवैकैकेन नव नवसंवत्सरानुपैति; तत् षट् त्रिंशत् संवत्सरं शाक्त्यानामयनम्।।०।। एतेषामेवैकैकेन पञ्चविंशतिः पञ्चविंशतिः संवत्सराः-इति शतसंवत्सरं साध्यानामयनम्।।०।। एतेषामेवैकैकेन पञ्च पञ्च पञ्चाशतः २५० संवत्सराः-इति सहस्रसंवत्सरं विश्वसृजामयनम्।।०।। अतिरात्रः। सहस्रं त्रिवृतः संवत्सराः। अतिरात्रः। एवं सहस्रसंवत्सरं प्रजापतेरयनम्।।०।।

इत्यष्टौ बहुसांवत्सरिकाणि।

अत्रेदं तापश्चितब्राह्मणे शतपथे श्रूयते। देवाः खलु सहस्रसंवत्सराय दिदीक्षिरे न मनुष्यः सहस्रसंवत्सरेण यष्टुमीष्टे। तदर्थं देवाः पञ्चैव यज्ञप्रतिनिधीनञ्जः सवानन्वकल्पयन्। तापश्चितं, संवत्सरं, द्वादशहां, पृष्ठ्यषडहं, विश्वजितं चेति।। तत्र सहस्रसंवत्सरस्थाने तापश्चितं नाम त्रैसांवत्सरिकं सत्रं कुर्य्यात्। तापश्चितस्थाने संवत्सरसत्रं कुर्य्यात् संवत्सरसत्रस्थाने द्वादशाहं कुर्य्यात्।। द्वादशाहस्थाने पृष्ठ्यं षडहं कुर्य्यात्।। पृष्ठ्यं षडहस्थाने सर्वपृष्ठमेकाहं विश्वजितमेव कुर्य्यादिति। एकाहेन षडहः, षडहेन द्वादशाहः, द्वादशाहेन संवत्सरः, संवत्सरेण त्रैसांवत्सरिकः। त्रैसांवत्सरिकेण सहस्रसंवत्सरः कृतो भवति। तेनैतस्य सहस्रसंवत्सरस्य स्थाने तापश्चितं कुर्य्यादिति न व्यर्थस्तदुपदेशः।। तत्र संवत्सरं दीक्षाभिरेति, संवत्सरमुपसद्भिः, संवत्सरं सुत्याभिः। तेनैवं क्रमेण सहस्रसंवत्सरस्य तस्य पूर्वार्द्धं मध्यमुत्तरार्द्धं चावरुन्धे।। तेनैवेदं त्रयं सह क्रियते-अग्निः, अर्क्यं, महदुक्थमिति। दीक्षाभिरग्निराप्यते, उपसद्भिरर्क्यं, सुत्याभिस्तु महदुक्थम्। तदित्थमेष तापश्चितः सहस्रसंवत्सरस्य प्रतिमा भवति।। तस्याशीतमह्नां सहस्रं भवति। तथा चैकाहः संवत्सरस्य प्रतिमा संपद्यते इत्यनुसंधेयम्।।

अतिरात्रः प्रथमाहः। शुक्ले शुक्ले पक्षेऽभिजत्। कृष्णे कृष्णे तु विश्वजित्। पूर्णिमासु गोष्टोमाः। अमास्वायुष्टोमाः। एवं विषुवतः पूर्वे पक्षसि क्रियते। उत्तरे तु विपर्य्यासात्। शुक्ले विश्वजित् कृष्णेभिजित्।। पूर्णिमास्वायुष्टोमाः, अमासु गोष्टोमाः।। उत्तमाहश्चातिरात्रः।। इतीन्द्राग्न्योरयनम्।।०।। अतिरात्रः प्रथमाहः। ततो ज्योतिष्टोम – गोष्टोमायुष्टोमा दण्डकलितवदार्त्येरन्। पूर्णिमासु विश्वजितः। अमास्वभिजितः। उत्तरे तु पक्षसि विपर्य्यासेनैते कार्य्याः।। उत्तमाहश्चातिरात्रः।।०।। इत्यर्य्यमणोऽयनं भवति।।०।। सरस्वती नाम नदी ब्रह्मावर्तदेशस्य पश्चिमा सीमा। तस्या विनशनप्रदेशे पुरा दीक्षा विहिता। तेनैतानि त्रीणि सारस्वतान्ययनानि।।०।।

अथ दृषद्वतीनाम नदी ब्रह्मावर्तदेशस्य पूर्वा सीमा। तस्या आसन्ने प्रदेशे ब्राह्मणस्य ऋत्विज आचार्य्यस्य वा गाः संवत्सरं रक्षेत्। ततः संवत्सरं व्यर्णे नैतधवे स्थाने प्रज्वलितमग्निं धारयेत्।। दृषद्वत्याः संनिहितं नैतंधवं नाम किश्चिन्निर्जलं स्थानमस्ति तत्रैतमग्निमिन्धे।। अथ तृतीये संवत्सरे परीणाहिस्थानेऽग्नीनाधाय, दर्शपूर्णमासान्तं कर्म कृत्वा सरस्वतीदृषद्वतीसंगमस्थानात् प्रस्थितो दृषद्वत्या दक्षिणेन तीरेण गच्छन् यमुनायास्त्रिः प्लक्षातीर्थप्रदेशमवभृथस्नानार्थमभ्यवैति।। तदिदं त्रिसंवत्सरं दार्षद्वतं नाम सत्रम्।।०।।०।। तदित्थं पञ्चत्रिंशदेतान्ययनसत्राणि व्याख्यातानि।।३५।।

इत्ययनसत्रप्रचयः।

अथ महासत्राणि।

यावदायुषं कर्तव्या नित्या यज्ञा महासत्राणि तत्रेयं शातपथी श्रुतिः-पञ्चैव महायज्ञाः, तान्येव महासत्राणि। भूतयज्ञो, मनुष्ययज्ञः, पितृयज्ञो, देवयज्ञो, ब्रह्मयज्ञ इति।। अहरहभूतेभ्यो बलि हरेत् स भूतयज्ञः। अहरहर्दद्यादोदपात्रात् स मनुष्य यज्ञः। अहरहः स्वधा कुर्य्यादोदपात्रान् स पितृयज्ञः अहरहः स्वाहा कुर्य्यादाकाष्ठात् स देवयज्ञः।। अथ स्वाध्याय एव ब्रह्मयज्ञः। तस्य वागेव जुहूः। मन उपभृत्। चक्षर्ध्रुवा। मेधा स्रुवः। सत्यमवभृथः। स्वर्गो लोक उदयनम्।। यावन्तं खल्विमां वित्तेन पूर्णां पृथिवीं ददल्लोकं जयति त्रिस्तावन्तं जयति। भूयांसं चाक्षय्यं य एवं विद्वानह रहः स्वाध्यायमधीते। तस्मात् स्वाधायोऽध्येतव्यः।। एषु च बहुकालसाध्यत्वात् सत्रशब्दः प्रवर्तते। सत्रशब्दसाधर्म्याच्चैषामेषु सोमेषु प्रवेश इत्यवधेयम्।। इति महासत्रप्रचयः।।०।।

सर्वेऽप्येते सोमयज्ञास्त्रिविधा-नित्या नैमित्तिकाः काम्याश्च। ये स्वतन्त्राः कर्तव्यत्वेनादिष्टास्ते नित्याः। यत्र सोमविशेषं कृत्वा परे यज्ञा विधीयन्ते यत्र वा यज्ञान्तरं कृत्वा सोमविशेषा विधीयन्ते तत्र ते यज्ञान्तरसाहचर्य्यक्लृप्ताः सोमा नैमित्तिकाः।। यत्र त्वैहिकमामुष्मिकं वा फलमुद्दिश्य सोमाः क्रियन्ते तत्र काम्याः एकाहाः काम्या अहीनाः काम्यसत्राणि।

अथाहुः - काम्याः सोमा द्विविधाः आदिष्टसोमाः प्राक्सौमिकाश्च। तत्रैकाहहीनसत्राणि आदिष्टसोमाः। अथ वक्ष्यमाणाः सर्वे हविर्यज्ञाः फलविशेषमुद्दिश्य सौम्येन कल्पेन क्रियमाणाः प्राक्सौमिकाः काम्यसोमाः भवन्ति।

इति सोमयज्ञाः संपूर्णाः ।।१६८।।

अथ सुराप्रचारः सौत्रामणीनाम यज्ञः।। सौत्रामणी द्विविधा - कौकिली चरका च। "यजेत् सौत्रामण्यामपत्नीकोऽप्यसोमपः" - इत्यैतरेयोक्तेरपत्नीकेनाप्यसोमपेनापि यजमानेन कर्तव्या या स्वतन्त्रा सा कौकिली[1]। अग्निं चित्वा वाजपेयेनेवा इष्ट्वा सौत्रामण्या[2] यजेत", एतया राजसूययाजी यजते[3]।- इत्यादिष्वङ्गत्वेन श्रूयमाणा चरका।

अत्र चरकायाः सौत्रामण्या हविर्यज्ञत्वमपीच्छन्ति। तदभिप्रायेणैव सप्तसंस्थेषु हविर्यज्ञेषु सौत्रामण्याः प्रवेशः।।०।। इति सौत्रामणी।।०।।

इति महायज्ञाधिकारः।।३।।

---

1. शतपथे आपस्तंबे। 2. आपस्तम्बे। 3. शतपतथे।

अथ पूर्वप्रतिज्ञाता सामक्लृप्तिरत्र प्रदर्श्यते

सामक्लृप्तिः

(१) उद्गीथरसावलम्बी वागध्यूढः प्राणः साम।। १ ।। वाक्प्राणमनोभिरारब्धं खल्विदमेकैकं सकलं सत्वम्।। तत्रेयं वाग् मा प्रमा प्रतिमा प्रभृतिच्छन्दः प्रभेदानां मध्यतः केनचिच्छन्दसा छन्दिता सती ऋगित्युच्यते। ऋच्यध्यूढः प्राण एवायं वितायमानः सामाख्यां लभते। तयोश्च ऋक्सामयोरारम्भणं प्रणवः प्रतिष्ठा च प्रणवः। अथ साम्नस्तु ऋगध्यूढस्य मध्यमा भक्तिरुद्गीथः। वाक्प्राणावृक्सामे उद्गीथेऽस्मिन्नक्षरे संसृज्येते।।१ ।।

(२) सर्वत्रैव तु ते ऋक्सामे अन्योन्यमविनाभूते भवतः। तद्यथा - इयं पृथ्वी ऋक्-तत्राध्यूढोऽयमग्निः साम। अन्तरिक्षमृक् - वायुः साम। द्यौर्ऋक्-आदित्यः साम। नक्षत्राणि ऋक् - चन्द्रमाः साम। ऋच्यध्यूढं साम गीयते।। आदित्यस्य शुक्ला भा ऋक् - तत्र नीलं परः कृष्णं साम। या चेयमक्ष्णः शुक्ला भाः सा ऋक् - अथ यन्नीलं परः कृष्णां तत् साम। ऋच्यध्यूढं सामगीयते ।।२ ।।

(३) ऋचमनु सामेदं शश्वत् साध्वेवानुवर्तते नत्वेव जात्वेतामृचमात्मानमतिपातयति। तस्मात् साधुनि साधुत्वे च सामशब्दः; असाधुनि चासाधुत्वे च तद्वदसामशब्दोऽभिनिवर्तते। अपिचेदमृचि साम्येन सामानुवर्तते यावतीयमृक् तावदेवेदं सामापि तत्रभिव्यप्नोति। तस्मात् सामनाम। अथ ऋगायतनापेक्षया वितायमानत्वाद् बृहदायतनमपीदं साम संमितमृचांशैर्भवति तस्मात् सामनाम। "ऋचा समं मेने"- इति नैदाना इत्याह यास्को निरुक्ते (दै० ७।१२।४) तिसृभिर्ऋग्भिः समं सामेत्याहुः। विष्कम्भस्य हि ऋक्त्वमभिप्रयन्ति। पृष्ठस्य च सामत्वम्। विष्कम्भत्रयसमं हि तत्पृष्ठं भवतीति त्र्यृचं सामोपपद्यते।।३ ।।

(४) साम देवानामन्नमिति ताण्ड्यम्। ६। ४। १३।

अथ लोके सौन्दर्य्यं द्विविधं भवति - भगः सामेति। यत्रेतरानपेक्षं प्रातिस्विकं सौन्दर्य्यं तत् भगनिबन्धनं सौभगं नाम।

अथ यत्र तु शिल्पादावितरेणानुरूप्यं प्रातिरूप्यं वा तद्धेतुस्तत्रेदं सामैव मनोहरतीति विद्यात् ।४।

(५) तस्यैतस्य साम्नः पञ्च भक्तयो भवन्ति । हिंकारः । प्रस्तावः । उद्गीथः । प्रतीहारः । निधनम् । इति । संतानारम्भणं वितानोपक्रमणं वा हिंकारः। उदग्राभनिग्राभयोरभिक्रान्तापक्रान्तयोरुत्थान-पतनयोर्व्यवच्छेदकं मध्यमं पदमुद्गीथम्। यत्रोपसंहारोऽवसायस्तन्निधनम् । हिंकारं चोद्गीथं चान्तरा भक्तिः प्रस्तावः। उद्गीथं च निधनं चांतरा भक्तिः प्रतीहारः। केचित्तु-हिंकारोद्गीथयोर्गर्भे प्रस्ताव आदिरिति द्वे , उद्गीथनिधनयोर्गर्भे प्रतीहार उपद्रव इति द्वे - इत्थं सप्तभक्तिं सामाचक्षते। तत्रैतयोर्न विशेषः। विवक्षाधीनत्वात् भक्तीनाम्।।५ ।।

(६) अनन्तविधान्यन्नानि चेमानि सामानि। तानि त्रेधा विभज्यन्ते निरूढानि निगूढानि प्राकृतानि चेति। सुप्रसिद्धं याज्ञिकं निरूढम्। काम्यं विद्वद्भिः प्रक्लृप्तं निगूढम्। लौकिकं पारिप्लवं प्राकृतम् ।।६ ।।

(७) तत्र सप्त चतुर्दश वा निरूढानि। रथन्तरं[१] पृथिव्याः वृहद्दिवः[२]। वामदेव्यमन्तरिक्षस्य[३] राजनं[४] चन्द्रमसः। प्राणमयमग्नेः[५]। वाङ्मयं प्रजापतेः। सर्वमिति सर्वेषाम्। तत्र देवरथो वै रथन्तरम् (तां० ७।७।१३)।

तमनुष्टौति ताण्ड्यः। ७ । ७ । १९।

यस्ते गोषु महिमा यस्ते अप्सु रथे वाते स्तनयित्नौ य उ ते

यस्ते अग्नौ महिमा तेन संभवरथन्तर द्रविणवन्न एधि। ७। ७। १९।।

(८) रथन्तरं[१] वैरुपं शाक्करमिति। त्रीणि रथन्तरस्य रूपाणि। अभिमन्थनं धूमः प्रज्वलनमङ्गारा उपशम इति- अग्नौ प्रोतं रथन्तरम्। अभ्रसंप्लवो मेघो वर्षा विद्योतते उद्गृह्णातीति पर्जन्ये प्रोतं वैरूपम्। पृथिव्यन्तरिक्षं द्यौर्दिशः समुद्र इति लोकेषु प्रोताः शकर्य्यः।।

वृहद्[(४)] वैराजं[(५)] रैवतमिति[(६)] त्रीणि वृहतो रूपाणि। उद्यन्-उदितः मध्यन्दिनः, अपराह्न, अस्तं यन्निति वृहदादित्ये प्रोतम्। वसन्तो ग्रीष्मो वर्षाः शरद्धेमन्तः इति पञ्चर्तवो वैराजमृतुषु प्रोतम्।। अजाः। अवयः। गावः। अश्वाः। पुरुषः-इति पञ्च पशवो रेवत्यः पशुषु प्रोताः।।०।।

(९) पशवो वै बृहद्रथन्तरे। (तां० ७। ७।१) रथन्तरो रथघोषवत्। बृहदिदं स्तनयित्नोर्घोषवत्। दुन्दुभिघोषवद्वा। वैरूपं वातघोषवत्। वैराजमग्निघोषवद् + अग्निमन्थनघोषवद्वा। शाक्करीरपां घोषवत्। रेवतीर्गवां घोषवत्। एतैर्वा एतानि सहघोषैरसृज्यतन्त। (तां० ७। ९। १४)

(१०) १ ऐरं बृहत् - ऐडं रथन्तरम्   २ मनो बृहम् - वाग् रथन्तरम्

३ साम बृहत् - ऋग् रथन्तरम्   ४ प्राणो बृहत् - अपानो रथन्तरम्

५ असौ लोको बृहत् - अयं रथन्तरम्   एतानि मनसाऽवीक्ष्योद्धायेत् ।।

(११) अथ वामदेव्यं पशवः। अपृष्ठं बै वामदेव्यमनिधनं ह्वीति। अनायतनं वा एतत् साम यदनिधनम्। तद्यथा-उपमन्त्रयते ज्ञपयते स्त्रिया सह शेते प्रतिस्त्रीसह शेते कालं गच्छतीति वामदेव्यं मिथुने प्रोतम्। निधनवत्तु राजनं सौम्यम्। तद्यथा-अग्निः वायुः आदित्यः। नक्षत्राणि चन्द्रमा इति देवतासु प्रोतम्।

(१२) गायत्रं परोवरीयश्चेति द्वे सामनी प्राणमये भवतः मनो वाक् चक्षुः श्रोत्रम् प्राण इति गायत्रं प्राणिषु प्रोतम्। अथ प्राणो वाक् चक्षुः मन इति परोवरीयः साम। परोवरीयांसि ह्येतानि।।

(१३) वारवन्तीयं[(११)] श्रायन्तीयं[(१२)] यक्षायज्ञीयमिति[(१३)] त्रीणि प्राजापत्यानि। तत्र एकविंशान्तं वारवन्तीयं, त्रयस्त्रिंशान्तं श्रायन्तीयं, चतुस्त्रिंशान्तं यज्ञायज्ञीयम्। ताण्ड्यूश्रुतिराह - अश्रयम् वाव श्रायन्तीयेन। अवारयन्त वारवन्तीयेन। इन्द्रियस्य वा एषा वीर्य्यस्य परिगृहीतिः। (१८।११।१) सर्वाण्यङ्गान्येकं रूपं यज्ञायज्ञीयम्। लोमत्वङमांसमस्थिमज्जेति यज्ञायज्ञीयमङ्गेषु प्रोतम्। एतस्माद्वै योनेः प्रजापतिर्यज्ञमसृजत। यद् यज्ञे यज्ञमसृजत तस्माद् यज्ञायज्ञीयम्। (तां० ८।६।२)

(१४) अथ यदीश्वरस्थ विराडात्मनः प्रजापतेः परमं वैश्वरूप्यं तदिदं सर्वसामेति प्रतीयात्। अपि चाहुः- त्रयी विद्या त्रय इमे लोकाः, अग्निर्वायुरदित्य इत्यमी त्रयो देवाः अथ नक्षत्राणि वयांसि मरोचयः,

अथ सर्पाः गन्धर्वाः पितर इति पञ्चभक्तिकमेतत्साम सर्वस्मिन् प्रोतम्। तथा चेमानि सप्तैव सामान्यवान्तरभेदाच्चतुर्दशधोपपद्यन्ते ।।

(१५) ज्योतिष्टोमो गोष्टोम आयुष्टोम इति त्रिविधाः स्तोमा भवन्ति। तेष्वग्निष्टोमः। उक्थ्यस्तोमः। षोडशीस्तोमः। अतिरात्रस्तोमः। इति चतुष्टोमो ज्योतिष्टोमः। अग्निरित्यहः। अहां विभक्तौ रात्रिशब्दः। सोऽतिरात्रः। अहोरात्रयोः सन्धिर्द्वैधा - उक्थः षोडशी चेति। तत्रैतदग्निष्टोमे निरूढानि सामान्युक्तानि।

(१६) अथ यान्यग्निष्टोमे निगूढानि सामानि तान्यतः परमुच्यन्ते। इलान्दं यज्ञायज्ञीयं वारवन्तोयमिति-महाव्रतीयानि। त्रिनिधनं हीदमिलान्दम् । समुद्रो वा एतच्छन्दः। अशीत्यक्षरस्य छन्दसः सिन्धुरिति संज्ञा। सिन्धुसमुद्रौ तुल्यार्थौ । इरान्नं तदिलान्दम्। ब्रह्मणो विभागे क्रियमाणे यदतिरिच्यते ब्रह्म तदिदं यज्ञायज्ञीयम्। वैश्वानराग्नेर्विभवनं यत्र वार्य्यते तद्वारवन्तीयम्। अन्नं ब्रह्म पशव इति हीमानि सामानि।।१ ।।

(१७) प्राणोऽपानौ द्वौ व्रतपक्षौ प्रजापतेर्हृदयं वसिष्ठस्य निहवः इति षट् चित्याग्निसामानि ।। २ ।।

(१८) सत्रस्य ऋद्धिराग्नीध्रीयाग्निसाम। श्लोकानुश्लोकौ हविर्धानसामनी । यामेति मार्जालीयाग्नि साम।आयुर्नवस्तोभौ सदसः सामनी । ऋष्यस्य सामेति शालामुखीयस्य गार्हपत्याग्नेः साम ।।३ ।।

(१९) गौरिवीतं सुज्ञानमित्यसंस्थितेद्वे वाचः सामनी। गायत्री त्रिष्टुबजगतीत्येवं वाचो विभागे क्रियमाणे यावती वागतिरिच्यते तद् गौरिवीतम् । वाचोरसो गौरिवीतम् । छन्दोगातिरिक्तास्त्वेतद् गौरिवीतमाहुः ।।४ ।।

(२०) गौरिवीतं श्यावाश्वं निहव इति त्रीण्यच्युतसामानि ।।५ ।।

प्लव इति गवामयनीयं साम। ओकोनिधनमिति षडहीयं साम ।।६ ।।

(२१) गायत्रम्। अमहीयवम्। रौरवम्।यौधाजयम्। औशनम्। इति भिन्न दैवतानि पञ्चसामानि। तानि क्रमेण प्राणस्य प्रजापतेरग्नेरिन्द्रस्य वायोरिति विद्यात्। आपानव्यानप्रणाख्याः स्वरमयाश्त्रैलोक्य-प्राणा एवाप्रतीहारा गायत्रं साम।

(२२) रथन्तरं वामदेव्यं नौधसमिति वा; बृहद् वामदेव्यं श्यैतमिति वा वैवाहिकानि सामानि। रथन्तरे गुणीभूतं यद् बृहत् तन्नौधसम्। बृहति गुणीभूतं रथन्तरं श्यैतम्। श्यैतं पशवः। नौधसं ब्रह्मवर्चसम्।

(२३) त्रैककुभम् (१)। त्रैशोकम् (२)। आष्कारणिधनम् (३)। जनित्रम् (४)। आथर्वणम् (५)। अभीवर्तम् (६)। श्रायन्तीयम् (७)। इति सप्त ब्रह्मसामानि। तानि क्रमेण पशुकामाय (१) शोकग्रस्ताय (२) प्रतिष्ठाकामाय (३) प्रजाकामाय (४) लोककामाय (५) भ्रतृव्यवते (६) यज्ञविभ्रष्टाय (७) च कुर्य्यादित्यादेशः। अथ शत्रुबहिष्कारार्थं कालेयं सामोद्गीयते ।।

(२४) श्यावाश्वम्। आन्धीगवम्। कावम्। औशनम्-इति चत्वारि सामानि। वृष्टिपशुप्रभृति-कालमैरुद्रेयानि। अथ कावं प्राजापत्यम्। औशनं वायव्यमिति विद्यात्। इत्यग्निष्टोम-सामान्युक्तानि ।।

२५) अथाष्टावुक्थसामानि। एकविंशस्तोमान्युक्थानि। तेषु च साकमश्वम्। सौभरम्। नार्मेधम्। इति त्रीणि प्रथमानि। तत्रेदं साकमश्वसामैन्द्रावारुणमैन्द्राबार्हस्पत्यमैन्द्रावैष्णवं चोपपद्यते। तेनोक्थाभिजयो भवति। पशवो वा उक्थानि। अथ बृहत्पृष्ठतेजः सौभरम्। तत् सार्वकामिकम्। नार्मेधं तु गातुवित्साम। तच्च घातुकजीवात् परित्राणहेतुः।

२६) अथ वारवन्तीयं वैश्वानराग्निवारणीयमित्युक्तम्।

२७) अथ हारिवार्णम्-उद्वंशीयम्-आष्टादंष्ट्रे द्विविधे इति चत्वार्य्युत्तमानि। तत्रेदं हारिवर्णं पशुकामाय रक्षोऽनुषक्ताय च कुर्य्यात्। अथ रथन्तरबृद्द्वैरूपवैराजशकरीरेवतीनां रूपेण षट्पृष्ठमिदुमुद्वशीयं भवति। तच्चासुरघ्नं स्वर्गकामाय कुर्य्यात्। आष्टादंष्ट्रे तु ऋद्धिकामाय।।

२८) अथातिरात्रसामानि। वैतहव्यम्। ओकोनिधनम्। और्ध्वसद्मनम्। घृतश्च्युन्निधनम्। आश्विनम्। इत्येतानि पशुसामानि।।

२९) गौरिवीतं काण्वं श्रौतकक्षं दैवोदासम्। इत्येतेषां साम्नां प्रथमं ब्रह्मसाम। द्वितीयमिन्द्रसांविद्यसाम। तृतीयं क्षत्रसामेति विद्यात्।

३०) आकूपारम्। आर्षभम्। गारम्। माधुच्छन्दसम्। दैवातिथम्। सौमेधम्। कौत्सम्। इति सप्तेन्द्रप्रीणनानि सामानि। तत्रार्षभं क्षत्रसाम। सौमेधं रात्रिसामेत्याहुः।।

३१) अथ विप्रकीर्णसामानि। आक्षारं महावैष्टम्भमिति द्वे ब्रह्मसामनी।। आयास्यम्। सीदन्तीयम्। रौरवम्। और्णायवम्। वात्सप्रम्। मार्गीयवम्। भासः - इति साधारणसामानि।।

३२) यौक्ताश्वम् (१)। वैखानसम् (२)। शार्करम् (३)। वात्सम् (४)। सौश्रवसम् (५)। वीङ्कम् (६)। इति कामसनिसामानि षट्।

३३) सैन्धुक्षितं (१)। दैर्घश्रवसम् (२)। पार्थं काक्षीवतम्-इति देवराज्ञां सामानि।। दैवोदासं वाध्यूश्वं वैतहव्यम् - इति मनुष्यराज्ञां सामानि।

३४) इत्थं काम्यानि निगूढसामानि दर्शितानि। अथ लौकिकान्युदाह्रियन्ते। वृष्टौ तावत् पुरोवातो वहति। अथ मेघो जायते। अथ वर्षति। अथ विद्योतते स्तनयति। अथोद्गृह्णाति। इत्येताः पञ्चावस्थाः क्रमेण हिंकारादयः। साम्नः पञ्चभक्तयो द्रष्टव्याः।।१।। अथ मेघः संप्लवते। अथ वर्षति। अथ प्राच्यः स्पन्द्यन्ते। अथ प्रतीच्यः। अथ समुद्र इत्येवमप्सु हिंकारादयः स्युः।।२।। वसन्तो ग्रीष्मो वर्षाः शरद्धेमन्त इति ऋतवः पञ्चभक्तिकं साम।।३।। अजाः अवयो गावोऽश्वाः पुरुष इति पशवः सामः ।।४।। प्राणो वाक् चक्षुः श्रोत्रं मन इति प्राणाः साम।।५।।

३५) ये तु सप्तविधं सामोपासते तेषामुदाहरणानि यथा-यत्किञ्च वाचो हुमिति स हिंकारः। यत् प्रेति स प्रस्तावः। यदेति स आदिः। यदुदिति स उद्गीथः। यत्प्रतीति स प्रतीहारः। यदुपेति स उपद्रवः। यन्नीति स निधनम् ।।१।। इति।।

इति सामाक्लृप्तिः

ऐष्टिकयज्ञाः

आदित्ये यथा-यत्पुरोदयात्। यत्प्रथमोदिते। यत्संगववेलायाम्। यत्संप्रति मध्यन्दिने। यदूर्ध्वं मध्यन्दिनात्-प्रागपराह्णात्। यदूर्ध्वमपराह्णात्- प्रागस्तमयात्। यत् प्रथमास्तमिते-इति सप्तभक्तिकं साम ।।२।।

अथ हविर्यज्ञस्त्रेधा-इष्टिः पशुश्च पित्र्यं च। तत्रेष्टिः सप्तधा-अग्न्याधेयम्, अग्निहोत्रम्, दर्शपूर्णमासः, चातुर्मास्यम् , आग्रयणम् , इष्ट्ययनानि, काम्येष्टयश्च ।।

तत्राग्न्याधेयं पञ्चधा - अपूर्वाधानम् , अन्वाधानम् , पुनराधानम् , तृतीयाधानम् , विच्छिन्नाग्न्याधानं चेति। यत्रानाहिताग्निरग्निहोत्रादिहविर्यज्ञं कर्तुमग्नीन् प्रथममाधत्ते तदपूर्वाधानम्। अथ करिष्यमाणस्य कर्म्मणोऽनुकूलं यत् प्रथमं समिधामाधानमग्नौ क्रियते तदन्वाधानम्। अथ यस्य यजमानस्याधानकालादारभ्य संवत्सरादर्वाक् कस्यचित्पदार्थस्य हानिर्भवति, महारोगो वा जायते, अन्यानि वाऽग्न्यनुगत्यादीनि निमित्तानि भवन्ति स पुनर्वसुयुक्तायाममायां पुनरग्नीनाधत्ते तत् पुनराधानम् ।। पुनराधानानन्तरं संवत्सरादर्वागर्थनाशादिनिमित्तयोगादग्निनाशे पुनरप्यग्नीनाधत्ते तत् तृतीयाधानम्।। एतच्च द्वितीयं पुनराधानं भवति।। अथ सर्वाग्निनाशे समारूढारणीनाशे च विच्छिन्नसंधानार्थमग्नीनाधत्ते तद्विच्छिन्नाग्न्याधानम् ।।०।। एतत्सर्वं गार्हपत्याद्यग्नित्रयभेदात् प्रत्येकं त्रिधा भिन्नम्।।

एवमाहितेऽग्नावन्या इष्टयो भवन्ति। तासां काश्चन वर्जयित्वा सर्वा दिनमाससंवत्सराद्यनुगता भवन्ति। तत्राग्निहोत्रमाह्निकेष्टिः। तस्याहोरात्रसन्धिभेदाद् द्वे पर्वणी भवतः सायमाहुतिश्च प्रातराहुतिश्च ।।१।। अथ दर्शपौर्णमासो मासिकेष्टिः। तस्य पक्षसन्धिभेदाद् द्वे पर्वणी भवतः-दर्शश्च पौर्णमासश्च ।।२।। अथ चातुर्मास्यं सांवत्सरिकेष्टिः। तस्य ऋतुसन्धिभेदाद् चत्वारि पर्वाणि भवन्ति। फाल्गुन्यां वैश्वदेवः। आषाढ्यां वरुणप्रघासः। कार्तिक्यां साकमेधाः। अथ फाल्गुन्या अर्वाक् शुनासीर्य्येष्टिरिति।। त्र्यम्बकयागः पित्र्येष्टिः, पिण्डपितृयज्ञश्च तस्यैव धर्म्मा भवन्ति ।।३।। संवत्सरस्य ऋतुत्रयं द्वेधा व्यवतिष्ठते - अग्नितारतम्याच्च सस्योत्पत्तिविशेषाच्च। तत्र घर्मकालः, वर्षाकालः, शीतकालः-इत्यग्निपर्वाणि। तद्वैशेष्या च्चातुर्मास्य-पर्वाण्युक्तानि।। अथ संवत्सरविभागत्रयेण श्यामाकव्रीहियवा नवसस्या उत्पद्यन्ते। तद्वैशेष्यादपराणि त्रीणि संवत्सरपर्वाणि भवन्ति। तान्याग्रयणपदेनोच्यन्ते। नवसस्येष्टिराग्रयणम्। तत्र श्यामाकाग्रयणकालो वर्षाः। व्रीह्यग्रयणकालः शरत्। यवाग्रयणकालो वसन्तः।। वेणुयवाग्रयणकालोऽपि वसन्तः। वेणु यवा वंशफलानि। वैणुयवीष्टिरनित्या। अन्यास्त्वाहिताग्नेर्नित्या। अन्येषां नित्यकाम्याः ।।

अथेष्ट्ययनकर्म्माणि। अयनमिष्ट्ययनमित्येकार्थौ।'कस्मादयनानीति। गमनान्येतानि भवन्ति कामस्य कामस्य स्वर्गस्य च लोकस्य इति कौषीतकीयश्रुतेः सर्वकामसाधनकर्म्मविशेषेष्वयनशब्दो योगरूढः। द्विविधान्ययनानि श्रूयन्ते - ऐष्टि - कानि, सत्रविशेषाश्च। तेषु सत्रव्यावृत्यर्थमिष्टिशब्दः प्रयुज्यते। इष्टचयनानीति। इष्टयश्चैता अयनानि चैतानि। यद्वा-केवलेनेष्टिशब्देन दर्शपूर्णमासप्रतिपत्तिरिति याज्ञिकसंप्रदायः। ततः समानतन्त्रतया दर्शपूर्णमासं गतानि कर्म्माण्येवेष्ट्ययनानि। एता हीष्टयो दर्शेष्टितन्त्रेण वा पौर्णमासेष्टितन्त्रेण वा कर्तव्यास्तद्विकारसिद्धा भवन्ति।। ताश्च कामनाविध्यपचारादिनिमित्तानन्त्यादसंख्येया इष्यन्ते। 'न चेष्टयः पृथक्त्वतः शक्याः परिसंख्यातुम्' इति शांखायनोक्तेः। अथापि यावत्यो ब्राह्मणेष कल्पेषु चोपदिष्टाः, तासां काश्चिन्निर्दिश्यन्ते। ताश्च पञ्चधा विभज्यन्ते अनुनिर्वाप्या (१)। अदीक्षितायनानि (२)।

प्रायश्चित्तीयाः[(३)]। क्रत्वर्थिक्यः[(४)]। काम्याश्चेति[(५)]।। तत्र विमृद्धती, वैमृधेष्टिः, वैमध्येति वा, याऽख्यायते सैका अनुनिर्वाप्या। सा नित्या।

शांखायनः प्राह – पौर्णमास्यां पूर्णमासकर्मणि समाप्तेऽमावास्याविकारेण यागेनेन्द्राय विमृधे एकादशकपालं पुरोडाशं निर्वपति।अमावास्यायां त्वामावास्यकर्म्मणि समाप्ते पौर्णमासीविकारेण यागेनादितिं यजते साऽनुनिर्वपनादनुनिर्वाप्या नामेष्टिः अनया द्विषतो भ्रातृव्यानपहन्ति। ते एते इष्टी दर्शपूर्णमासयोः संस्थानमनुसृत्यैव विधीयेते इत्यतस्ते अपि दर्शपूर्ममासवद् यावदायुषं कार्य्ये त्रिशतं वर्षाणि वा ।।०।।

अथ दाक्षायणयज्ञः[१]। इलादधः[२]। सार्वसेनियज्ञः[३]। वसिष्ठयज्ञः[४]। शौनकयज्ञः[५]। साकं प्रस्थाय्यः[६]। मुन्ययनं[७]। तुरायणम्[८] – इत्यष्टावदीक्षितायनानि।। तत्र पुरा दक्षः पार्वतिरेतेन यज्ञेनेयाज। तस्मादयं दाक्षायणो नाम यज्ञः। अत्र पोर्णमास्यमामावास्यं चेति यागद्वयम्। तत्र पौर्णमास्ये – आग्नेयः[१] पुरोडाशः, अग्नीषोमीयमुपांशुयाजमाज्यम्[२], अग्नीषोमीयः[३] पुरोडाशः – इति त्रीणि पूर्वेद्युर्हर्वीषि। अग्नीषोमीयः पुरोडाश एव वा हविरेकं पूर्वेद्युः पौर्णमास्यां भवति न परेद्युस्तु – आग्नेयः[१] पुरोडाश, ऐन्द्रं[२] च सांनाय्यम्।। अथ दर्श –आग्नेयः[१] पुरोडाशः।। वैष्णवमुपांशुयाजमाज्यम्[२]। ऐन्द्रं[३] सांनाय्यम् – इति त्रीणि हवीषि पूर्वेद्युः। अथवा ऐन्द्राग्नः पुरोडाश एवामावास्यायां पूर्वेद्युः। परेद्युस्तु – आग्नेयः[१] पुरोडाशः, मैत्रावरुणी[२] पयस्या च भवति।। अयं च फाल्गुन्यामारभ्य यावदायुषं कार्य्यः पञ्चदशवर्षाणि वा। संवत्सरं वा।। काम्यस्तु संवत्सरमेव कार्य्यः।। एनमप्येके वसिष्ठयज्ञ इत्याचक्षते– इत्याह भगवान् याज्ञवल्क्यः।।१।।

अथेडादधः स प्राजापत्ययज्ञः पशुकामस्यान्नाद्यकामस्य च विधीयते। तत्र पौर्णमास्याम् आग्नेयः[१] पुरोडाशः, सरस्वत्यै[२] चरुः, अग्नीषोमीयः[३] पुरोडाशश्चोपांशुयाजश्च[४]। एन्द्रं[५] सांनाय्यं च। दर्शे तु – आग्नेयः[१] पुरोडाशः। सरस्वत्यै[२] चरुः। ऐन्द्राग्नेयः[३] पुरोडाशः। मैत्रावरुणी[४] पयस्या च। फाल्गुन्यामारभ्य यावदायुषं कार्य्यः। संवत्सरं वा। काम्यस्तु संवत्सरमेव ।।२।।

अथ यत्र पौर्णमास्यामेव पौर्णमास्यानि हर्वीषि पूर्वाणि कृत्वा पश्चादामावस्यान्यपि हर्वीषि क्रियन्ते न पृथगमावास्यायां स सार्वसेनियज्ञः। प्रजातिकामस्य यज्ञोऽयम्। फाल्गुन्यामारभ्य संवत्सरं कार्य्यः।। एनमप्ये के वसिष्ठयज्ञ इत्याचक्षते ।।३।।

यत्र तु अमावास्यायामेवामावास्यानि पूर्वाणि कृत्वा पश्चात् पौर्णमास्यान्यपि हवीषि क्रियन्ते न पृथक् पौर्णमासी यजते स वसिष्ठयज्ञः। अनेन प्रजावान् पशुमांश्च भवति। द्विषतो भ्रातृव्यांश्चाभिभवति।। फाल्गुनस्यामावास्यायामारभ्य संवत्सरं कार्य्यः ।।४।।

अथ शौनकयज्ञस्तु स्तूर्षमाणस्य भवति, य इच्छेद्-द्विषन्तं भ्रातृव्यं स्तृणवीयेति सोऽनेनेष्ट्वा स्तृणुते। सार्वसेनियज्ञवदयं फाल्गुन्यामारभ्य संवत्सरं कार्य्यः ।।५।।

अथ यत्र साकं संप्रतिष्टन्ते, साकं संप्रयजन्ते, साकं भक्षयन्ते – स साकं प्रस्थाय्यो नाम। श्रैष्ठ्यकामस्य पौरुषकामस्य चायं यज्ञः। वसिष्ठयज्ञवदयं फाल्गुन्याममावास्यायामारभ्य संवत्सरं कार्य्यः ।।६।?।। एतानि षड् दीक्षितायनानि। दर्शपूर्णमासायनानीति शांखायनः। पर्वण्येवैषां कर्तव्यतानियमात्। काम्यानि चैतानि। काम्यानामकरणे प्रत्यवायाभावः ।।

अथ यदि पर्वदिनादन्यत्र दिनेषु पौर्णमासीविकारेण यागेन सदा यजते तन्मुन्ययनम्। तत्र पञ्चदश सामिधेन्यः। आग्नेयश्चाग्नावैष्णवश्च पुरोडाशः। सर्वकामस्य यज्ञोऽयं फाल्गुन्यामारभ्य यावदायुषं कार्य्यः। संवत्सरं वा ।।७।।

यत्र तु पर्वदिनादन्यत्र दिनेषु अमावास्याविकारेण यागेन सदा यजते तत्तुरायणम्। तत्राग्नेयः[१], ऐन्द्रः[२] वैश्वदेवश्चेति[३] त्रयो यागाः। अदीक्षितः कृष्णाजिनं प्रतिमुञ्चते। स्वर्गकामस्य यज्ञोऽयं फाल्गुन्यामारभ्य यावदायुषं कार्य्यः संवत्सरं वा।। ८।। एते द्वे अदीक्षितायते अपर्व्वायिणे काम्ये चेति दिक् ।।०।। तान्येतान्यष्टौ दर्शपूर्णमासविकारभूतान्यदीक्षितायनानि नाम।। एषामन्यतमं कुर्वाणस्य यावदेतत्संस्थं दर्शपूर्णमासौ नित्यावपि निवर्त्तेते।। तत्प्रतिस्थाने एवैषां काम्यत्वेन विधानात्। कौण्डपायनीयौ तु भवत एव।। इत्यदीक्षितायनानि।। इत्येताः पौरुषार्थिक्य इष्टयः।।

अथ शांखायनीये प्रायश्चित्तीयाः काश्चिदुपदर्शिताः।। तथा हि – अभ्युदिता[१], अभ्युद्दृष्टा[२] चेति द्वे अन्ये ।। अग्निमदग्नीष्टिः[१]। पथिकृदग्नीष्टिः[२]। वीत्यग्नीष्टिः[३]। विविच्यग्नीष्टिः[४]। संवर्गाग्नीष्टिः[५]। शुच्यग्नीष्टिः[६]। अप्सुमदग्नीष्टिः[७]। इति सप्तान्याः। रुद्रेष्टिः[१]। पथिकृत् पूषेष्टिः[२]। सार्वकामिकीष्टिः[३]। व्रतपत्यग्नीष्टिः[४]। व्रतभृदग्नीष्टिः[५]। क्षामवदग्नीष्टिः[६]। मारुतेष्टिश्चेति[७] च सप्तान्याः।। वैश्वानरीष्टिः[१]। सारस्वतीष्टिः[२]। सुमत्यग्नीष्टिः[३]। प्रातरिष्टिः[४]। वारुणीष्टिश्चेति[५] पञ्चान्याः। एवमादयो बह्वयो बहुविधाश्च प्रायश्चित्तीयाः इष्टयः ।। यस्योपवसथे पुरस्ताच्चद्रो दृश्यते स यज्ञपथादपैति । अत भ्रान्तिवशादनागते पर्वणि यस्यामावास्यं प्रकान्तं तेनेयमभ्युदितेष्टिः क्रियते। स एतया यज्ञपथमेत्य यथाविहिते काले पुनरामावास्यं करोति ।। अत्रेष्टौ त्रीणि हवींषि – अग्नये[१] दात्रेऽष्टाकपालः पुरोडाशः। इन्द्राय[२] प्रदात्रे सायं दोहितं दधि । विष्णवे[३] तु शिपिविष्टाय प्रातर्दोहिते पयसि चरुः। सोऽयं दर्शविकारः ।।१।। अथ यस्योपवसथे पश्चाच्चन्द्रो दृश्यते सोऽपि यज्ञपथादपैति । अतएव भ्रान्तिवशादतीते पर्वणि यस्यामावास्यं प्रक्रान्तं तेनेयमभ्युद्दष्टेष्टिः क्रियते ।। स एतया यज्ञपथमेत्य तस्मिन्नेवाहन्यामावास्यं करोति ।। शतपथे तु – ''स अमावास्येन विधिनैवेष्ट्वा अथेष्टिमनुनिर्वपति । तदहर्वा श्वो वा'' – इत्येवमिष्टेः प्रागपि दर्शेष्टिरभ्यनुज्ञायते । अभ्युदितावदभ्युद्दष्टापि दर्शेष्टिकालव्युत्क्रमनिमित्ता प्रायश्चित्तीया। इयमपि दर्शविकृतिः ।।

अथ शांखायनः प्राह। यदि पूर्वोद्धृतेऽग्नौ सत्यन्योऽग्निरभ्युद्ध्रियते तर्हि विध्यपराधप्रायश्चित्तायाग्निमतेऽग्नये इष्टिं कुर्य्यात्। साग्निमदग्नीष्टिः ।।१।। यदि विहृतानग्नीनन्तरेण शकटादिकं चक्रीवन्निर्गच्छेत्। नियतकालानां वा दर्शपूर्णमासादीनामतिपत्तिः स्यात्। तदा तद्दोषशमनाय पथिकृतेऽग्नयेऽष्टाकपालं पुरोडाशं निर्वपेत् ।। २ ।। अनपवृत्तकर्मणामग्नीनां द्वयोरनेकेषां वा मिथ: संसर्गे सति तत्प्रायश्चित्ताय वीतयेऽग्नये यागः। सा वीत्यग्नीष्टिः ।। ३ ।। ग्राम्येण लौकिकेनासंस्कृतेनाग्निना संस्कृतानामग्नीनां संसर्गे तद्दोषशमनाय विविचयेऽग्नये यागः। सा विविच्यग्नीष्टिः ।।४।। अरण्ये घोरं प्रदहन्नग्निर्यदि ग्राममागतः स्यात् स प्रदाव्य इत्युच्यते। तेन सह संस्कृताग्नीनां विहृतानां संसर्गे सति प्रायश्चित्तायाग्नये संवर्गायेष्टिः क्रियते सा संवर्गेष्टिः ।।५ ।। क्रव्येण शवाग्निना तेषा संसर्गे शुचयेऽग्नये यागः। सा शुच्यग्नीष्टिः ।।६ ।। वैद्युतेनाग्निना संस्कृताग्निसंसर्गेऽप्सुमतेऽग्नये यागः। साऽप्सुमदग्नीष्टिः ।।७ ।। सप्तैताः अग्निदोषप्रायश्चित्तीयाः।

अथ स्वजनविषये व्याधिप्राचुर्ये सति रुद्रायेष्टिं कुर्य्यात् ।।१ ।। महान्तमध्वानं गमिष्यन् पूष्णे पथिकृते यजेत ।।२ ।। सर्वकामसिद्ध्यर्थमग्नये कामाय यजेत ।।३ ।। व्रत्यवेलायां यदि सकलं व्रत्यमहः प्रवासेनातिपतेत्। अव्रत्यं वा मैथुनमांसभोजनादि चरेत् तदाऽग्नये व्रतपतये व्रातपतीष्टि: कार्य्या: ।।४ ।।व्रत्यबेलायामार्त्यश्रु पातयित्वा व्रतभृतेऽग्नये इष्टिं कुर्य्यात् ।।५ ।। गृहदाहे सति तत्प्रायश्चित्ताय क्षामवतेऽग्नये इष्टिं कुर्य्यात् ।।६ ।। द्वयो: सरूपयोर्यमलजनने असरूपयोर्जनने, बहूनां यमलजनने वा, मरुद्भ्य इष्टिं कुर्य्यात् ।।७ ।।सप्तैता विप्रकीर्णदोषप्रायश्चित्तीया: ।।

१ अथ सुमत्यग्नीष्टिः २ अथ प्रातरीष्टिः ३ अथ वारुणीष्टिः

वैश्वानरीं व्रातपतीं पवित्रेष्टिं तथैव च ।। ऋतावृतौ प्रयुञ्जानः पुनाति दशपौरुषम् ।। १

क्लृप्तानां पशुसोमानां निष्कृत्यर्थमसंभवे ।। इष्टिं वैश्वानरीं नित्यं निर्वपेदब्दपर्य्यये ।। २

इत्येवमादयः प्रायश्चित्तीया द्रष्टव्याः ।। अग्निहोत्रापचारे च बह्व्यः प्रायश्चित्तीष्टय: शतपथे व्याख्याताः ।। प्रायश्चित्तीयाः पौरुषार्थिक्यश्च भवन्ति क्रात्वर्थिक्यश्च। येषां यागानामकरण प्रत्यवायः प्राप्नोति तेषां विध्यपचारप्रायश्चित्तय उभयार्था भवन्ति। काम्यानां विध्यपचारे प्रायश्चित्तयः क्रत्वर्था एव ।।० ।। अथ अपराः काश्चन क्रात्वर्थिक्यो भवन्ति। तत्तत्क्रतुसिद्धये प्रयुज्यमानास्ता यज्ञधर्म्मा इष्यन्ते। यथा दीक्षणीयेष्टिः[१], आतिथ्येष्टिः[२], उपसदिष्टिरित्यादयो[३] ज्योतिष्टोमधर्म्माः। प्रायणीयेष्टि[१]रुदयनीयेष्टि[२]रित्यादयः सत्रधर्म्माः। अवभृथेष्टिः[१]। अनकिवतीष्टिः[२]। सांतपनेष्टिः[३]। क्रीडीयेष्टिः[४]। पित्र्येष्टिः[५]। आदित्येष्टिः[६]। सवनेष्टि[७]रित्यादयश्चातुर्मास्यधर्म्माः। उखासंभरणीयेष्टिरित्यादयश्चयनधर्म्माः ।। एवमुदवसानीयेष्ट्यादयोऽन्यान्या अपि बह्व्य इष्टयो यज्ञार्थस्तत्रतत्रानुसन्धेयाः इति दिक् ।।० ।।० ।। इति क्रात्वर्थिकेष्टयः ।।

अथ काम्याः ।

[१] द्यावापृथिव्ययनम्, [२] मित्रविन्दा, [३] संज्ञानी, [४] द्वितीया संज्ञानी, [५] एन्द्रामारुती, [६] एन्द्राबार्हस्पत्या, [७] स्नुषाश्वश्रुरीया, [८] पवित्रेष्टिः, [९] स्वस्त्ययनीया, [१०] जीवातुमती, [११] पुत्रकामिका, [१२] पुष्टिकामिका, [१३] प्रजाकामेष्टिः, [१४] इन्द्रियवीर्य्यप्रतिष्ठाकामेष्टिः, [१५] अनुनिर्वापपौष्णेष्टिः, [१६] क्षैत्रपत्येष्टिः, [१७] राक्षोघ्नेष्टिः, [१८] सुरभिमदीष्टिः, [१९] क्षामवदीष्टिः, [२०] कामेष्टिः, [२१] आयुःकामेष्टिः, [२२] भूतिकामेष्टिः, [२३] द्वितीया भूतिकामेष्टिः, [२४] रुक्कामेष्टिः, [२५] तेजस्कामेष्टिः, [२६] अन्नकामेष्टिः, [२७] अन्नाद्यकामेष्टिः, [२८] अन्नपतित्वकामेष्टिः, [२९] चिररोगमुक्तिकामेष्टिः, [३०] चक्षुःकामेष्टिः, द्वितीया चक्षुःकामेष्टिः, [३१] पुत्रकामेष्टिः, [३२] रसकामेष्टिः, [३३] वसुकामेष्टिः, [३४] अभिशापनिवृत्तीष्टिः, [३५] ग्रामकामेष्टिः, [३६] द्वितीया ग्रामकामेष्टिः, [३७] भिक्ष्यमाणद्रव्यप्राप्तिकामेष्टिः, [३८] पशुकामेष्टिः, [३९] द्वितीया पशुकामेष्टिः, [४०] ब्रह्मवर्चसकामेष्टिः, [४१] ब्रह्मवर्चसकामेष्टिः, [४२] अन्नमाकेष्टिः, [४३] पापक्षयकामेष्टिः, [४४] बन्धादिमोक्षकामेष्टिः, [४५] महायज्ञकामेष्टिः, [४६] दत्तद्रव्यप्राप्तिकामेष्टिः, [४७] अधिकश्रीकामेष्टिः, [४८] यज्ञकामेष्टिः, [४९] दुश्चर्म्मत्वाभावेष्टिः, [५०] शतकृष्णलेष्टिः, [५१] हिरण्यलाभकामेष्टिः, [५२] लब्धहिरण्येष्टिः, [५३] पुंस्त्वकामेष्टिः, [५४] लोकेष्टिः, [५५] आशापालेष्टिः, [५६] कारीरी, [५७] पिण्डीयागः, [५८] इत्यष्टापञ्चाशत् ।। एवमादयोन्या अपि बह्व्यः काम्या इष्टयः ।।

मित्रलब्धिकामोऽग्निं [१] सोमं [२] वरुणं [३] मित्रमिन्द्रं [४] [५] बृहस्पतिं [६] सवितारं [७] पूषणं [८] सरस्वतीं [९] त्वष्टारमित्येता [१०] दश देवता यजति । सैषा मित्रविन्दा नामेष्टिः । इयमेव महा वैराजी नाम ।।२ ।।

ज्ञातयः- सपिण्डाः सनाभयो वा ।। ते वा स्वामिभृत्या वा परस्परमसंविदानाः कार्य्येषु विभिन्नमतयः सन्तो यदि संमतिकामाः स्युस्तदा संज्ञानीमिष्टिं निर्वपेरन् सैषा संज्ञानी बहुदेता चोच्यते । तत्राग्निर्वसुमान् , सोमो रुद्रवान्, इन्द्रो मरुत्वान्, वरुण आदित्यवान् - इत्येतासां सगुणानां चतसृणां देवतानामेकं प्रदानम् । तत्र ज्ञातयः- संज्ञानमुशनावदद्-इति सूक्तं जपेयुः । समाने श्रैष्ठ्यमिच्छतश्चेयमिष्टिः ।।३ ।। राजविशोरसंपत्तिकामानामाहिताग्नीनां च प्रकृत्यैव संज्ञानीष्टिः १ (आश्व) ।।४ ।। एवमेव भेदकामानामियमैन्द्रामारुतीष्टिः क्रियते । तत्र मारुतयागादूर्द्ध्वमैन्द्रो यागः । स्नुषाश्वशुरीया नामेष्टिराभिचीरिकी क्रियते ।। तत्र केवल इन्द्रो वा इन्द्रः सुरो वा देवता ।।५ ।। अथ शत्रुभिः प्रधृष्यमाणानामियमैन्द्रबार्हस्पत्या नामेष्टिः । तत्र बार्हस्पत्यं निरूप्य इन्द्राय नोदयेयुः ।।६ ।। संवत्सरमतिप्रवसतः शुद्धिकामस्य पवित्रेष्टिः । तत्र पावकवत्यौ धार्य्ये ।।७ ।। अथ स्वस्त्ययनीयेष्टिः, रक्षितवती चेयमुच्यते । तत्राग्निश्च सोमश्चेत्येतौ रक्षितवन्तौ देवता ।।८ ।। यत्र त्वायुष्कामेनाग्निरिन्द्रश्चेति द्वे जीवातुमत्यौ देवते इज्येते सा जीवातुमती । सैवायुःकामेष्टिरप्युच्यते । तत्राग्नेरायुष्मत्वमिन्द्रस्य च त्रातृत्वं गुणः ।।९ ।। पुत्रकामेष्टावग्निः पुत्रवती देवता इयमेव पुत्रवतीष्टिः ।।१० ।। पुष्टिकामेष्टाविन्द्रो दाता देवता ।।११ ।। अथ प्रजाकामेष्टिः सद्यस्काला चोच्यते । ऐन्द्राग्नो व्रीहिमय एकादशकपालः पुरोडाशः । सप्तदश सामधेन्यः । पौर्णमासतन्त्रम ।।१२ ।। अथ धर्मसभायां व्यवहारादिभाषणायेन्द्रियवीर्य्यप्रतिष्ठार्थमिष्टिः क्रियते, प्रजाकामेष्टिवत् ।।१३ ।। इन्द्रियवीर्य्यप्राप्त्यर्थमिमामिष्टिं

कृत्वा यत्र पौष्णां चरुमनुनिर्वपति साऽनुनिर्वापपौष्णेष्टिः ।।१४।। अथ जनसमूहं प्राप्तः प्रतिष्ठार्थं क्षैत्रपत्यं चरु निर्वपति सा क्षैत्रपत्येष्टिः ।।१५।। रक्षोगणपीडानिवृत्त्यर्थममावास्यां महारात्रेऽग्नये रक्षोघ्नेऽष्टाकपालः पुरोडाशः। सा राक्षोघ्नेष्टिः ।।१६।। गोमरणनिवृत्यर्थं पुरुषमरणनिवृत्यर्थं भयनिवृत्यर्थं पूतिगन्धनिवृत्यर्थं चाग्नये सुरभिमतेऽष्टाकपालः सा सुरभिमतेष्टिः ।।१७।। शेषजातिमृत्युनिवृत्यर्थमग्नये क्षामवतेऽष्टाकपालः। गृहदाहनिवृत्तयेऽपि स क्षामवतीष्टिः ।।१८।। प्रतिबन्धकनिवृत्या काम्यकर्मफलसिद्ध्यर्थमग्नये कामायेष्टिः ।।१९।। सर्वायुःसिद्ध्यर्थमग्नये आयुष्मतेऽष्टाकपालः इन्द्राय त्रात्रे एकादशकपालः। इयमेव जीवातुमतीष्टिः ।।२०।। भूतिकामोऽग्नये जातवेदसेऽष्टाकपालं निर्वपति सा भूतिकामेष्टिः ।।२१।। रुचे कामयमानोऽग्नये रुक्मवतेऽष्टकपालं निर्वपति रुक्कामेष्टिः ।।२२।। तेजस्कामोऽग्नये तेजस्वते ।।२३।। अन्नपतित्वकामोऽग्नयेऽन्नवते ।।२४।। अन्नाद्यकामोऽग्नयेऽन्नादाय ।।२५।। अन्नपतित्वकामोऽग्नयेऽन्नपतये ।।२६।। दीर्घरोगमुक्त्यर्थमग्नये पवमानाय, अग्नये पावकाय, अग्नये शुचये चाष्टाकपालाः पुरोडाशाः ।।२७।। चक्षुःकामोऽपि पूर्ववत् करोति ।।२८।। पुत्रकामस्याग्नये पुत्रवतेऽष्टाकपालः। इन्द्राय पुत्रिणेऽष्टाकपालः ।।२९।। रसकामस्य त्वग्नये रसवतेऽजक्षीरे चरुः। अत्र पयसः प्रणयनं नापाम् ।।३०।। वसुसकामस्याग्नये वसुमतेष्टाक्पालः ।।३१।। पतितत्वेन जनैरभिशस्यमानस्य वैश्वानराय द्वादशकपालः। वरुणाय चरुः। दधिकराव्णश्चरुः ।।३२।। ग्रामकामस्याग्नये वैश्वानराय द्वादशकपालः मरुद्भ्यः सप्तकपालः ।।३३।। भिक्ष्यमाणद्रव्यप्राप्तिकामस्याग्नये वैश्वानराय द्वादशकपालः। भिक्षितद्रव्यप्राप्तौ प्रतिष्ठाकामो वैश्वानर्य्या यजते ।।३४।। पशुकामस्यैन्द्रश्चरुः ।।३५।। अथवा पशुकामस्येन्द्रायेन्द्रियावते एकादशकपालः सा द्वितीया पशुकामेष्टिः ।।३६।। ब्रह्मवर्चसकामस्य इन्द्राय घर्मवते एकादशकपालः ।।३७।। अन्नकामस्येन्द्रायार्कवते एकादशकपालः ।।३८।। भूतिकामस्येन्द्राय धर्मवते एकादशकपालः ।।३९।। पापक्षयकामस्येन्द्रायांहोमुचे एकादशकपालः ।।४०।। बद्धो वा शत्रुवेष्टितो वा तन्मोक्षार्थमिन्द्राय त्रात्रे एकादशकपालं निर्वपति ।।४१।। महायज्ञान् वाजपेयादीन् कर्तुमशक्तस्येन्द्रायार्काश्वमेधवते एकादशकपालः ।।४२।। ग्रामकामस्येन्द्रायानृजवे एकादशकपालः। सा द्वितीयेष्टिः ।।४३।। दत्तद्रव्यप्राप्तिकामस्येन्द्राय प्रदात्रे एकादशकपालः ।।४४।। तुल्येभ्योऽधिकश्रीकामस्येन्द्रायैकादशकपालः ।।४५।। साधारणज्योतिष्टोमादियज्ञकामस्याग्नावैष्णव एकादशकपालः ।। ४६।। अथ ब्रह्मवर्चसकामस्य द्वितीयेष्टिः। पौष्यामग्निहोत्रानन्तरं सोमारुद्राभ्यां चरुः ।।४७।। भाविदुश्चर्मत्वाभावकामस्य सोमापौष्णश्चरुः ।।४८।। यो मृत्योर्बिभेति स पूर्णायुःप्राप्त्यर्थं प्रजापतये हिरण्यनिर्मितगुञ्जाप्रमाणशतकृष्णालमयं चरु निर्वपति सा शतकृष्णलेष्टिः ।।४९।। हिरण्यलाभकामस्याग्नेयोऽष्टाक पुनरेतयैवैष्ट्या यजते सा लब्धहिरण्येष्टिः ।।५०।। हिरण्यलाभे जाते तत्प्रतिष्ठार्थं पुनरेतयैवैष्टयां यजते सा लब्धहिरण्येष्टिः ।।५१।। क्लीवत्वनाशपूर्वकपुस्त्वकामस्य सोमाय वाजिने श्यामाकश्चरुः ।।५२।। चक्षुःकामस्याग्नये भ्राजस्वतेऽष्टाकपालः। सौर्य्यश्चरुः सैषा द्वितीया चक्षःकामेष्टिः ।।५३।। अथ लोककामस्य पृथिव्यन्तरिक्षदैवत्येष्टिः। सा लोकेष्टिः ।।५४।। एवमाशापालेष्टिः ।।५५।। अथ वृष्टिकामेनकारीरीष्टिः कार्य्या। सा चाग्न्यादिनानादेवताकाऽग्नि-देवताका वा ।।५६।। वर्षकामेष्टिमात्रेऽप्सुमन्तौ गायत्रौ देवते। अग्निः सोमो वा। अथवा धामच्छद्गुणकोऽग्निः। ता एतास्तिस्रो मरुद्देवत्या इष्टयः पिण्डीसंज्ञाः। संस्थितायामिष्टौ सर्वासां दिशामुपासनं च कार्य्यम् ।।५७।। एवमादयः काम्या आश्वलायनीयापस्तम्बीयबौधायनीयादिश्रौतग्रन्थेषु ब्राह्मणग्रन्थेषु च तत्र तत्र

समाख्याताः ।। एताश्च दर्शेष्टिविकारा वा पौर्णमासविकारा वेति तत्र तत्रोपेक्ष्यम् ।।० ।। काम्यानां चादीक्षितायनवदिष्टच्यनत्वाविशेषेऽपि भूयसा याज्ञिकैः पार्थक्येन व्यवह्रियमाणत्वात् तदनुरोधेन ब्राह्मणवसिष्ठन्यायेनेहापि तासां पृथगुपदेशः ।।

यासां काम्यानां कालविशेषो नोपदिष्टस्तासां पर्वणि शुक्लपक्षे देवनक्षत्रे प्रयोगः नैमित्तिकेष्टीनां तु निमित्तानन्तरमेव काम्यानां प्रयोगे दर्शपूर्णमासौ न निवर्तेते। आहिताग्निर्दर्शेष्ट्या पौर्णमासेष्ट्या वा नित्येष्ट्या सम्यगिष्ट्वा ततोऽभीष्टां काम्यामिष्टिं यष्टुमीष्टे ।। काम्या इष्टीः करिष्यमाणो यजमानः पूर्वं संवत्सरपर्य्यन्तं द्वादशाहं वा जयादिभिः पूतः पयोव्रती ब्रह्मचारी च भूत्वा काम्यास्वधिकारी भवति। ऋत्विजोऽपि पयोव्रतरहितानेतान्नियमन् धारयेयुः। काम्येष्टियजनशीला इष्टियायजूका उच्यन्ते ।।० ।।

इति ऐष्टिकयज्ञा आख्याताः ।

अथ पशुः। पशुरिति पशुबन्ध इति च तुल्यो व्यवहारः। स चतुर्धा–निरूढपशुबन्धः, अग्नीषोमीय–पशुबन्धः, सौत्रामणीपशुबन्धः, चयनपशुबन्धश्चेति ।। प्रकारान्तरेण पशुबन्धो द्वेधा - हविर्यज्ञविधः, सवविधश्च। तत्र यस्मिन् व्रतमुपैति, अपःप्रणयति, पूर्णपात्रं निनयति, विष्णुक्रमान् क्रमति, यत्र वाज्यभागो भवतः स हविर्यज्ञविधः। स निरूढपशुबन्धः ।। अथ यत्रैतानि न क्रियन्ते स सविविधः। सोऽग्नीषोमीयः, स सौत्रामणी पशुः ।। अत्र पुनः प्रकारान्तरेण स पशुबन्धो द्वेधा। पुरुषार्थः क्रत्वर्थश्च। तत्राद्यः स्वतन्त्रो विधीयते निरूढपशुबन्धो नाम। होता, अध्वर्य्युः उद्गाता, ब्रह्मा, प्रतिप्रस्थाता प्रशास्ता इति षडत्र ऋत्विजो भवन्ति ।। प्राकृतवेदिवत् पाशुकवेदिश्च। यूपसंपादनं च। पशुरत्र छाग एव जातदन्तः स्यादव्यङ्गः। अथ एकशृङ्गश्छिन्नकर्णोऽन्धो भग्नदन्तो वामनश्चिन्नपुच्छः शिपिविष्टो वधिरःकच्छनियुक्त एकखुरश्च पशुरत्र प्रतिषिद्धः। वर्हिषि प्रतीचीनशिरसमुदीचीनपदं पशुं शाययित्वा शमितारः संज्ञपयन्ति। पशोर्मारणं संज्ञपनम्। संज्ञप्यमानं यजमानादयो नावेक्षन्ते। ततो वपोत्खेदनम्। सर्वोदरव्यापी पोलिकाकारोऽतिश्चेतो वपा। शामित्रशालायां शामित्रेऽग्नौ पशुकुम्भ्यां पशुपाकः। वपा, पशुपुरोडाशःहवींषि। पश्वङ्गयागः। वनस्पतियागः। उपयाजः। पाशुकाग्नेयेष्टिः। पाशुकाग्नावैष्णवेष्टिः। प्रयाजाः। अनुयाजाः। इत्येवमादीन्यत्र कर्म्माणि भवन्ति ।। सोऽयं सद्यस्कालपशुप्रकारः ।। तस्य चोत्तरायणं शुक्लपक्षो देवनक्षत्रं रेवती वाऽमावास्या यजनीयदिनं वाऽनुष्ठानकालः ।। दर्शपौर्णमासयागकालो यजनीयदिनमुच्यते ।। अथोक्तं मानवे श्रौतसूत्रे - षट्सु षट्सु मासेषु पशुना यजेत, संवत्सरे संवत्सरे वा ।। नैनमनीजानं संवत्सरोऽतीयात्। यद्यतीयान्न मांसमश्नीयादापशुबन्धात् - इति ।। इति सद्यस्कालो निरुढपशुबन्धः ।।० ।।

अथ क्रत्वर्थः पशुबनधस्त्रेधा-एकपशुश्च त्रिपशुश्च पञ्चपशुश्चेति ।। तत्रेकपशुरग्नीषोमीयः पशुबन्धोऽग्निष्टोमाङ्गम्। ऐन्द्रपशु - त्रिपशु - वायोघसपशुभिः क्रियमाणायां सौत्रामण्यां त्रिपशुः क्रियते सौत्रामणीपशुबन्धः। पञ्चपशुस्त्वाग्नि चित्याधर्म्मः। स चयनपशुबन्धः ।। अन्येष्वपि यज्ञेष्विष्टिवत् पशवोऽङ्गानि भवन्ति ते तत्र तत्रोपेक्ष्याः ।।० ।।० ।।

इत्थमिष्टिः पशुश्चेति द्विधा भिन्नो देवयज्ञो व्याख्यातः। अथ पित्र्यं पितृकर्म्म। तदपि द्विविधम् - पुरुषार्थं च क्रत्वर्थं च। तत्राद्यं स्वतन्त्रं पिण्डपितृयज्ञो नाम ।। यत्तु चातुर्मास्यादियज्ञान्तराङ्गभूतं तत् क्रत्वर्थम्। तच्च पित्र्येष्टिः पितृयज्ञो महापितृयज्ञ इति चोच्यते।

इति हविर्यज्ञाधिकारः।

अथातः पाकयज्ञं व्याख्यास्यामः ।। यथा हविर्यज्ञे पुरोडाशश्रपणं भवति तथात्र चरुपाको भवति तस्मात् पाकयज्ञः । यद्वा - पाको बालः स्वल्पकायः । तस्माद्यः क्षुल्लको यज्ञः स पाकयज्ञः । यावानेकाग्नौ यज्ञो यावान् वाऽनग्नौ यज्ञः स सर्वः पाकयज्ञः ।।

अग्निस्तावत्त्रेधा-त्रेता, गृह्यः, लौकिकश्च । त्रेता, वैतानः, वैतानिकः, आरण्यः, संस्कृतो, वैदिकः, श्रौत इति तुल्यार्थाः । गार्हपत्यः आहवनीयः, दक्षिणाग्निरित्येते त्रयोऽग्नयो वितानिताः कर्म्मसाधका इत्यतस्ते त्रेता वैताना इति चोच्यन्ते । यस्तु दारग्रहणकालोपनीतो दायग्रहणकालोपनीतो वाग्निः स गृह्यः । दारासु शालायां व गृहशब्दः । तत्संबन्धादयमग्निर्गृह्यः ।। गृह्याग्निः, शालाग्निः, आवसथ्यः, औपासनः, स्मार्त इत्येकार्थाः इति गोभिलगृह्यसूत्रभाष्ये (१ प्र० १ खं) उक्तम् ।। एतद्भिन्नः सर्वोऽप्यसंस्कृतोऽग्निर्लौकिकः । तत्र त्रेताग्निसाध्यास्त्रयो यज्ञा वैतानिका व्याख्याताः- अतियज्ञो, महायज्ञो, हविर्यज्ञश्चेति । अथ गृह्याग्निसाध्या अनग्निसाध्याश्च पाकयज्ञाः प्रदर्श्यन्ते ।। अल्पयज्ञाः पाकयज्ञाः इत्याहुः ।।

तत्र केचिदाहुः । एकविधः पाकयज्ञः 'पाकयज्ञा इत्याचक्षते एकाग्नौ यज्ञान्' इति लाट्यायनोक्तेः । पाकयाज्ञान् समासाद्य एकाज्यानेकवर्हिषः । एकस्विष्टकृतः कुर्य्यान्नानापि सति दैवते - इत्यभियुक्तोक्तेश्च ।। अथाहुः - द्विविधः पाकयज्ञः । स्थालीपाकः पशुपाकश्च । लाट्यायनीयादिषु तथैव भेदकरणात् । अथवा द्विविधः पाकयज्ञः व्रतचर्य्याश्च शान्तिकर्म्माणि चेति ।। मानवगृह्यादौ तथैव भेदकरणात् ।। अन्ये त्वाहुः - त्रिविधः पाकयज्ञः । हुतः प्रहुतो ब्रह्मणि हुतश्चेति । 'त्रयः पाकयज्ञाः - हुता अग्नौ हूयमानाः, अनग्नौ प्रहुताः, ब्राह्मणभोजनं ब्रह्मणि हुताः । इत्याश्वलायनस्मरणात् ।। परे त्वाहुः - चतुर्विधः पाकयज्ञः हुतः, अहुतः, प्रहुतः, प्राशितः इति । 'चत्वारः पाकयज्ञाः' इति पारस्करस्मरणात् ।। यत्र होम एव स हुतः । यत्र होमो बलिहरणं च स प्रहुतः । यत्र भोजनं स प्राशितः । यत्रैतेभ्योऽन्यदेव किञ्चित् सोऽहुत इति ।। केचित्तु पञ्चविधमाहुः-

व्रतम्, वृद्धिः, पित्र्यम् , पशुः, स्थालीपाकः इति भेदात् ।। अथान्ये नवविधमाहुः- व्रतपाकाः, वृद्धिपाकाः, पित्र्यपाकाः, पशुपाकाः, स्थालीपाकाः, उपयाचितकाः, काम्यपाकाः, पूर्तं, दत्तं चेति ।। परे तु -"इष्टमापूर्तं दत्तं चेति त्रिविधं पाकयज्ञमास्थाय व्रतपाकादीनां सप्तानामिष्टशब्देन व्यपदेशमिच्छन्ति ।। सायं प्रातर्नित्यहोमौ स्थालीपाको नवश्च यः । बलिश्च पितृयज्ञश्च अष्टका सप्तमः पशुः - इत्येते पाकयज्ञाः" - इति गोपथब्राह्मणश्रुतिः (५ प्र - २३ ब्रा०) ।। अष्टकाः पार्वणश्राद्धं श्रावण्याग्रहायणी चैव्याश्वयुजीति सप्तपाकयज्ञसंस्थाः - इति ब्रुवन्तः सुमन्तुगौतमादयस्तु सप्तविधत्वमाहुः । हुतः, प्रहुतः, आहुतः, शूलगवो, बलिहरणं, प्रत्यवरोहणमष्टकाहोमः - इति सप्तपाकयज्ञसंस्थाः - इति बौधायनः प्राह ।। औपासनहोमो वैश्वदेवं पार्वणमष्टका मासिश्राद्धं सर्पबलिरीशानबलिरिति सप्तपाकयज्ञसंस्थाः - इत्यापस्तम्बसूत्रव्याख्यातारः । तत्र नैते मतभेदा भवन्ति । प्रतिपत्तेरन्यथात्वेऽपि प्रतिपाद्यानन्यथात्वात् । अनेकरूपोपपादनस्य प्रज्ञावैशद्यार्थत्वात् ।। तथा हि । पाकयज्ञा बहुधा संपाद्यन्ते - अग्निषु चानग्निषु च । अग्निसाध्या अपि द्विविधाः - लौकिके च गृह्ये च । तत्र गृह्याग्निसाध्यानां धर्मद्वयं भवति -हविर्यज्ञत्वं च पाकयज्ञत्वं च । ते पाकयज्ञाश्च भवन्ति हविर्यज्ञाश्च । अत एव लाट्यायनीये - सप्त हविर्यज्ञ संस्थाः सप्त सोमसंस्थाः । तासां हविर्यज्ञसंस्थानामग्न्याधेयमग्निहोत्रं दर्शपूर्णमासौ चातुर्मास्यानि पशुबन्धः सौत्रामणी पाकयज्ञः -इति ।५ ।४ । २२-३३ । इत्येवं हविर्यज्ञसंस्थात्वेन पाकयज्ञमाख्याय तस्य द्वैविध्यमाचष्टे - पशुः स्थालीपाकश्चेति ।। तत्रैतयोरेव पाकयज्ञविशेषयोर्हविर्यज्ञधर्मत्वं नान्येषामिति हि तदाशयो न तु

पाकयज्ञेयत्तायां तस्य तात्पर्यम् । तस्माद्धविर्यज्ञत्वमप्राप्ताः सन्त्येवान्येऽपि पाकयज्ञा इत्यविरोधः ।। 'इडा खलु वै पाकयज्ञः' – इति तैत्तिरीयसंहिताश्रुतिः (१ । ७ ।१) ब्रह्मणि हुतत्वादिडायाः पाकयज्ञत्वमाचष्टे ।। अथ त्रयः पाकयज्ञाश्चत्वारो वेत्यत्रापि नास्ति विसंवादः। अहुतानां प्रहुतेष्वन्तर्भावा-नन्तर्भावाभ्यां विवक्षावशात्तथोपपत्तेः ।। अथ हुतप्रहुतब्रह्मणिहुतेषु हुतविशेषाः पशवः स्थालीपाकाश्च । तेषु स्थालीपाका द्वेधा पार्वणस्थालीपाका गृहस्थालीपाकाश्च । तेषु गृह्यस्थालीपाकनामेते भेदा भवन्ति – व्रतं वृद्धिः पित्र्यं चेति । पञ्चसु नवसु वा प्रकारेषु स्थालीपाकपदं पार्वणपरम् । तस्मादविरोधः ।। मानवीये तु गृह्ये वृद्धिपूर्तानां शिशसंस्कारादीनां व्रतेषु पित्र्यपशुस्थालीपाकानां शान्तिकर्मस्वन्तर्भावविवक्षणाद् द्वैविध्योपदेशः ।। सुमन्तुगौतमापस्तम्बबौधायनादीनां तु स्वस्वग्रन्थे व्याख्येयतया पाकयज्ञप्रदर्शनमात्रे तात्पर्य्यं न तु तदियत्तायाम् ।। एवमितरेतरान्तर्भावानन्तर्भावविक्षावशान्न्यूनाधिकविभागोपदेशेऽपि न वस्तुतत्वापलापः क्रियते इत्यदोषः ।।० ।। इह तु वयमाश्वलायनोक्तप्रकारेण त्रैविध्यमास्थाय सर्वं व्याचक्ष्महे ।।

पाकयज्ञस्त्रिविधः – हुतं, प्रहुतं, ब्रह्मणिहुतं च ।। हविर्यज्ञानामनुविधा एकाग्नौ लघुयज्ञाः क्रियन्ते तत्र हुतशब्दः । तेषां हविर्यज्ञप्रत्याम्नायतया तदनुरूपा एव यथायथं सर्वाः संस्था इष्यन्ते । अत एव स हुतपाकयज्ञस्त्रेधा स्थालीपाकः पशुः श्राद्धं च ।। तत्र स्थालीपाकः सप्तधा – आवसथ्याधानम्[१], औपासनम्[२], पार्वणस्थालीपाकः[३], नभ्यकर्म्माणि[४], आग्रयणम्[५], गृह्यस्थालीपाकाः[६], काम्याः पाकश्चेति[७] ।

दारकाले दायकाले वा कुशण्डिकयाऽग्निस्थापनं कृत्वा स्मार्त्तोऽग्निराधीयते तदावसथ्यावधानम् । तस्याप्यग्न्याधेयवद्भेदाः स्युः ।। तस्मिन्नेवाग्नौ सर्वे स्थालीपाकाः क्रियन्ते ।।१ ।। आवसथ्येऽग्नौ सायं प्रातर्नित्यहोमा औपासनम् ।।२ ।। पौर्णमास्यां दर्शे वा क्रियमाणं कर्म्म पार्वणम् ।। तच्च पौर्णमास्यामग्नीषोमीयम्, आमावस्यायां त्वैन्द्राग्नम् ।।३ ।। अथ नभ्यानि त्रीणि । फाल्गुन्यामाषाढ्यां कार्त्तिक्यां च कार्य्यत्वात् ।।४ ।। आग्रयणं नवयज्ञो नवसस्येष्टिरिति चोच्यते ।। तच्च शरदि पर्वणि ब्रीहिभिः, वसन्ते पर्वणि यवैः कुर्य्यात् । वर्षासु तु श्यामाकैः प्रस्तरं करोति इत्याहुः । ।।५ ।। अथेष्ट्ययनवद् गृह्यस्थालीपाककर्माणि बहुधा भवन्ति । तानि त्रेधा – स्वस्तिकानि पौष्टिकानि शान्तिकानि चेति ।। तत्र ब्रह्मचर्य्यम् । अग्निकार्य्यम् । सन्ध्योपासनम् । स्वाध्यायः । उपाकर्म्मोत्सर्गौ । अनध्यायाः । अवकीर्णि प्रायश्चित्तादीनि प्रायश्चित्तकर्म्माणि । अन्तरकल्पः । उपनिषदर्हाः । ऋत्विग्वरणम् । मधुपर्कः । उपायनम् । दीक्षाः । इत्येवमादीनि स्वस्त्ययनानि । तेषां व्रतशब्देन व्यवहारः ।।० ।। अथ विवाहः । गर्भाधानम् । गर्भालम्भनपुंसवनानवलोभनानि । सीमन्तोन्नयनम् । जातकर्म । नामकर्म । आदित्यदर्शननिष्क्रमणे । अन्नप्राशनम् । चूडाकरणम् । गोदानं केशान्तापरपर्य्यायम् । उपनयनम् । समावर्त्तनम् । प्रयाणगृहप्रवेशादिवैदेशिकम् । वस्तुपरीक्षा । वास्तुकर्म्म – वंशाभिमन्त्रणमणिकावधान – गृह – प्रपदनादीनि शालाकर्म्माणि । आयोजनपर्य्ययन – प्रवपन – प्रलवन – सीतायज्ञ – खलयज्ञ –तन्त्रीयज्ञान-डुद्यज्ञात्मकानि कृषिकर्म्माणि । रथारोहण – हस्त्यारोहण – नावारोहणादीनि आरोहणकर्माणि । शयनार्थं खट्वारोहणात्मकं चैत्र्यामुद्रोहणकर्म्म । आयतीकर्म्म । उतूलपरिमेहः । सभाप्रवेशनम् । राजसंनाहनम् । एवमादीनि संस्कारकर्माणि पौष्टिकानि । तान्याभ्युदयिकानि वृद्धयश्चोच्यन्ते ।। उभयविधयोरपि मानवीये गृह्ये व्रतचर्य्यास्वेनैव व्यवहारः ।। अत्र विवाहे चौले उपनयने केशान्ते सीमन्ते चेति पञ्च कर्मसु बहिःशालायां लौकिकेऽग्नौ कर्म्मेष्यते इति पारस्करीये जयरामः । आवसथ्ये वा लौकिके वेति हरिहरः ।। चैत्र्यामुद्रोहणे स्थालीपाको नास्तीति बहवः ।।० ।। अथ शालकटंकट कूष्माण्डराजोस्मितदेवयजनाख्यचतुर्विधविनायकशान्तयः । ग्रहशान्तयः ।

अद्भुतशान्तयः। दुःस्वप्नदुर्ज्ञानदुष्क्रियाशान्तयः। दुर्योगशान्तयः। दुर्जननाशान्तयः। कपोताधिशान्तयः। नष्टवस्तुशान्तिः। प्रतिपदि प्रतिपदि षाडाहुतम्। नैजमेषमित्येवमादीनि शान्तिकानि।। तदित्थं व्रतं वृद्धिः शान्तिरिति त्रिधा भिन्ना गृह्यापाकाः व्याख्याताः ।।६।।

अथ काम्यपाकाः।। ते चतुर्विधाः – उपयाचितकाः, अष्टकाः, साध्याः, हविर्यज्ञाश्च।। तत्र चैत्ययज्ञा ग्रहयज्ञाश्चेत्येवं द्विधा भिन्ना उपयाचितकाः। द्विविधा अप्येते पुनस्त्रिविधाः – शान्त्यर्थाः पुष्ट्यर्थाः, स्वस्त्ययनार्थाश्चेति। अथाष्टकाः। ताश्चतस्रः कार्त्तिक्या ऊर्ध्वाः कृष्णाष्टम्य इत्याश्वलायनीये। पारस्करीयादिषु तु तिस्र एवेष्टका इष्यन्ते। ताश्चोर्ध्वमाग्रहायण्याः प्राक् फाल्गुन्यास्तामिस्राणामष्टम्यः।। तत्राग्रहायण्याः ऊर्ध्वं प्रथमाष्टम्यामैन्द्री। सापूपैः क्रियते। पौष्या ऊर्ध्वमष्टम्यां वैश्वदेवी।। माघ्या ऊर्ध्वमष्टम्यां प्राजापत्या। सा कालशाकैः। तिस्रोऽप्येतास्त्र्यहसाध्याः। तत्र सप्तम्यष्टमीनवम्यः क्रमेण–पूर्वेद्युरष्टका, अष्टका, अन्वष्टका, इत्युच्यन्ते।। अष्टकासु चैतासु चतुर्धा प्रयोगविकल्पा भवन्ति। पशुः, स्थालीपाकः, यवसदानं कक्षदहनं वेति। तत्र पशौ पश्ववदानं च स्थालीपाकहोमश्च। द्वितीये विकल्पे स्थालीपाकहोममात्रम्। तृतीयेऽनडुद्भ्यो यवसदानम्। चतुर्थेऽग्निना कक्षदाह इति भगवानाश्वलायनः प्रहि।। अथ साध्याः।। श्रावणीकर्म तत्र श्रावणीमारभ्य चतुरो मासान् सर्पबलिं हरति।। एतच्च श्रवणाकर्म्म। सर्पकर्मेति चोच्यते।। अथाग्रहायणीकर्म। तत्र सर्पबलीनामुत्तरकालं स्थालीपाकेन सर्पयागः क्रियते, एतच्च मार्गशीर्षीकर्म, प्रत्यवरोहणं चोच्यते। आश्वयुज्यां पृषातककर्म। 'दधिघृतमिश्रः पृषातक' इति मानवगृह्यटीका। पयस्याज्ये निषिक्ते तु तत्पयः स्यात् पृषातक मित्याश्वलायनगृह्यटीका।। एतच्चाश्वयुजीकर्म शंकरकर्मेति चोच्यते।। आश्वयुज्यां ध्रुवाश्वकर्म। यस्याश्वा न सन्ति तस्याश्वपुष्ट्यर्थमेतत्कर्म क्रियते।।०।।०।। फाल्गुन्यां भगार्यमयागः, अग्नीन्द्रापूपायागः, इन्द्राणीकर्म चेति ।। अथ प्रोष्ठपद्यामिन्द्रयज्ञः।।०।। अथ शुक्लषष्ठ्यां लक्ष्मीप्राप्तिनिमित्तो यागः षष्ठीकल्पो नाम ।।०।। एवमादयः साध्याः काम्यपाका बहवः स्मर्य्यन्ते।।०।। अथ त्रेताग्नौ त्रिविधाः काम्या आम्नाताः– इष्टयः पशवः सोमाश्च। तत्रैता इष्टयस्ते च पशवः सर्वे काम्या इहापि गृह्ये विधीयन्ते। काम्यसोमास्तु नेह भवन्ति। सोमतन्त्रस्य गृह्ये प्रतिषिद्धत्वात्।। तदित्थमेते त्रिधा भिन्नाः काम्यपाका न शक्यन्ते साकल्येन परिसंख्यातुम्।। कामनावैचित्र्येणैषामसंख्येयत्वात् ।। ०।।०।। इति सप्तसंस्थाः स्थालीपाका व्याख्याताः।।०।

अथ पशुयज्ञः। स च शूलगवो नाम रौद्रपशुः कार्त्तिक्यां वैशाख्यां रैवत्यां वा शरदि विधीयते।। शूलगवः पशुबन्ध इति भाष्यम्।। अपूपानेके पाकयज्ञपशूनाहुः। अष्टकास्तिस्रोऽप्येके पशुयज्ञानाहुः।।

अथ श्राद्धम्।। पितृकर्म्म श्राद्धम्। तत् त्रिविधम् – एकोद्दिष्टम् , अनेकदैवत्यम्। अनेकाहं च। तत्रैकोद्दिष्टं सप्तविधम्। पितृमेधः, दशगात्रम्, मासिकम्, सपिण्डीकरणम्, पुराणम्, वृषोत्सर्गः, प्रतिसांवत्सरिकं चेति।। शवदाहात्मकमौर्ध्वदेहिकं कर्म्म पितृमेधः। स एकाहो वा अस्थिसंचयनावसानत्वादहीनो वा।। अथ दशभिरहोभिः संपाद्य दशगात्रम्।।

अथ मासि मासि कर्तव्यं मासिकम्। तच्चतुर्धा – आद्यमेकम्। मासिकानि द्वादश, षाण्मासिके द्वे। द्वादशमासिकमेकम् – इत्थं षोडशमासिकानि। अधिकमाससंभवे सप्तदशमासिकानि। अत्र षष्टमासिकं षाण्मासिकं चैकस्मिन्नहनि प्राप्नोति। अतस्तयोर्भिन्नदिनकर्तव्यतामभिलष्यद्भिः पञ्चदशाहेन पञ्चाहेन त्र्यहेणैकाहेन वा न्यूने मासे षष्ठं मासिकं क्रियते तस्मात् तदूनषाण्मासिकमुच्यते। एवं द्वितीय षाण्मासिकपूर्तावूनाब्दिकं क्रियते।। परे त्वाहुः। आद्यश्राद्धं पाक्षिकश्राद्धं चेति द्वे पाक्षिके भवतः। तत्र द्वितीयं पाक्षिकं पञ्चदशेऽहनि वा पञ्चाहेन त्र्यहेणैकाहेन वा न्यूने प्रथममासे वा चत्वारिंशदिने वा क्रियते। तेन तत्पाक्षिकमुच्यते, ऊनमासिकं वा सार्द्धमासिकं

वेति ।। तदित्थं द्वे पाक्षिके द्वे च षाण्मासिके, द्वादश मासिकानीति षोडश श्राद्धानि। युक्तं चैतत्- एतस्माल्लोकादुत्क्रान्तस्यार्चिरभिसंभवतोऽहःपक्षमाससंवत्सरक्रमेणैव चन्द्रप्राप्तेर्गतिविद्यायां श्रूयमाणतया तत्क्रमेणैव तत्स्थानां पिण्डदानसंभवादित्याहुः। यत्वत्रेदानींतनाः केचित्पद्धतिकाराश्चतुर्दशमासिकतया षोडशमासिकतया वा संकल्प्य यजन्ते तदसत्। ''द्वादशमासाः संवत्सरस्त्रयोदशमासाः संवत्सर''- इति श्रुत्या मलिम्लुचमसागणनया त्रयोदशमासंभवेऽप्येकस्मिन् संवत्सरे चतुर्दशपञ्चदशादि मासासंभवात्। चतुर्दशादिव्यपदेशेन मासिकसंकल्पस्यानृतभाषणीयत्वात्। तत्र यर्वाणस्तर्वाणन्यायेन लौकिके व्यवहारेऽनृतभाषणस्यावय लृप्तावपि याज्ञे कर्म्मणि संकल्पवचनादौ अनृतनवचनस्य 'नानृतं वदेत्' इति श्रुत्या निषिद्धस्य दोषाधायकत्वाच्च। तस्मादूनमासिकोनषाण्मासिकोनवार्षिकपदैरेव व्यपदिश्य मासिकयागाः संपाद्या इत्यवधेयम्।

अथ सपिण्डीकरणं नाम श्राद्धं पृथग्भवति। तच्च प्रेतानां प्रेतत्वनिवर्तकं पितृत्वसमर्थकं च। अत एवेदं प्रेतदैवत्यं सत्पितृदैवत्यं च। अनेकदैवत्यमप्येकोद्दिष्टमेवैतत् प्रेतस्यैकस्यैव प्रेतत्वनिवर्तनाय तदाचरणात्। केचित्तु षोडशमासिकेष्वेव सपिण्डीकरणमन्तर्भावयन्ति। तदपि द्वेधा - आद्यश्राद्धस्य मासिकित्वं नास्तीत्यतस्तस्य पृथक्त्वमभ्युपेत्य सपिण्डीकरणेन षोडशमासिकपूर्त्तिरित्येकं मतम्। द्वादशमासिकं नामान्यन्मासिकं नास्तीति तत्परित्यागेन सपिण्डीकरणेन च षोडशपूर्त्तिरित्यपरम्। एतदुभयमप्ययुक्तमित्यन्यत्र विस्तरः ।।०।।

शस्त्रादिहतानामाश्विनकृष्णचतुर्दश्यां कर्तव्यं श्राद्धं पुराणम्।। वृषोत्सर्गो द्विविधः - अदिष्टः काम्यश्च। एतान्येकोद्दिष्टानि प्रेतोद्देश्यकानि। प्रतिसांवत्सरिकं तु क्षयाहश्राद्दं पित्रुद्देश्यकम्।। तदित्थमेकोद्दिष्टान्युक्तानि।।

अथ पार्वणं, पुण्यपर्विकं, नाक्षत्रिकं, माध्यावर्षम्, नित्यं, नैमित्तिकं, काम्यं चेति सप्तविधमनेक-दैवत्यम् । अमायां कर्तव्यं पार्वणम् । युगादिमन्वादिकल्पदिनिमित्तकं पुण्यपर्विकं। आर्द्रागजच्छायादिनिमित्तकं नाक्षत्रिकम्। वर्षर्तुमध्ये आषाढ्या उपरिष्टादमायां कर्तव्यं माध्यावर्षम् । बलिवैश्वदेवादिकं नित्यश्राद्धम्। आभ्युदयिकं तीर्थश्राद्धं चेत्यादिकं नैमित्तिकम् ।। कंचित् काममुद्दिश्य क्रियमाणं काम्यम्। एतत्सर्वं षट्पुरुषत्वादनेकदैवत्यं पार्वणतन्त्रतया पार्वणशब्देनैवोच्यते। एकाहास्ते भवन्ति।। तदित्थमनेकदैवत्यानि पार्वणतन्त्राण्युक्तानि।।

अनेकाहं द्विविधम्-अष्टका महालयश्च। प्रौष्ठपद्या उत्तरमष्टम्यामष्टका, सप्तम्यां पूर्वेद्युरष्टका, नवम्यामन्वष्टका चेति त्र्यहमष्टका पित्र्याशाकैः क्रियते। तदिदं पितृत्रिरात्रम् ।। अथ प्रौष्ठपदीमारभ्या-मावास्यान्तमपरपक्षनिमित्तकं श्राद्धं महालयः।। तदिदं षोडशरात्रं पितृसत्रम्।। तान्येतानि श्राद्धानि।। तदित्थं स्थालीपाकः पशुः श्राद्धमिति त्रिधा भिन्नाहुतपाकयज्ञाः समाप्ताः ।।०।।०।।

अथ यत्र होमो बलिहरणं च, बलिहरणमात्रं वा स प्रहुतः। परे त्वाहुः - इष्टाः पूर्तदत्तान्येवैते हुतप्रहुतब्रह्माणि हुताः। तथा च - देवताप्रतिमा । देवतायतनानि। धर्मशाला। सर्वविधजलाशयाः। वृक्षारामादयः। मार्गसंस्थाः। अन्वावर्तनानि - इत्येवंविधानि पूर्तकर्म्माण्येव प्रहुतपाकाः ।।०।।

अथ दत्तान्येव ब्रह्मणिहुताः पाकाः। ब्रह्मभोजः, अन्नसत्रम्, भिक्षादानमित्येवमादयः। अत्र न ब्राह्मणपात्रापात्रनियमो भवति। अनाथेभ्यो दीनेभ्यो दरिद्रेभ्योऽङ्गहीनेभ्योऽप्यन्नदानं ब्रह्मणि हुतं भवति।। परे त्वाहुः-

अग्निहोत्रं तपः सत्यं वेदानां चानुपालनम् ।। आतिथ्यं वैश्वदेवं च इष्टमित्यभिधीयते ।। १
वापीकूपतडागादि देवतायतनानि च ।। अन्नप्रदानमारामः पूर्तमित्यभिधीयते ।। २
वाटशालां पाठशालां मठं शीतेऽनलं प्रपाम् ।। वाटं वाटीमन्नसत्रं कुल्यां वाट द्रुमास्तथा ।। ३
पण्यशालां च भैषज्यशालां पुस्तकशालिकाम् ।। नौकां सेतुं घट्टबन्धं कुर्य्यादन्यच्च तादृशम् ।। ४
सर्वसाधारणार्थाय प्रवर्तयति यश्चिरम् ।। बहुद्रव्यव्ययापेक्षं कर्म तत्पूर्तमिष्यते ।। ५
शरणागतसंत्राणं भूतानां चाप्यहिंसनम् ।। बहिर्वेदिच यद्दानं दत्तमित्यभिधीयते ।। ६
ससाधनं सोपभोगं स्वमर्थं यत् समर्पयेत् ।। परस्मै तद्दरिद्राय तद्दत्तमिति कथ्यते ।। ७
भूमिं सुवर्णं गां वस्त्रमुद्यानं पुस्तकं गृहम् ।। औषधं भोजनं दद्यात् तद्दत्तमिति कथ्यते ।। ८

इति पाकयज्ञाधिकारः ।

इत्थं चातियज्ञो महायज्ञो हविर्यज्ञो हुतयज्ञः प्रहुतयज्ञो ब्रह्मणि-हुतयज्ञ-इत्येते षोढा विभक्ताः सर्वे यज्ञाः भवन्ति। तेषामाद्यास्त्रयः श्रौताः। द्रष्टुर्वाक्येभ्यस्तेषां ग्रहणात्। अथ परे त्रयः स्मार्त्ताः।। श्रोतुर्वाक्येभ्यस्तेषां ग्रहणात्।।

अथाहुः- सर्वे ह्येते यज्ञा उच्यन्ते। यजतिषु जुहोतिषु चायं यज्ञशब्दः। तत्र पुरोऽनुवाक्या याज्यावन्तस्तिष्ठद्धोमा वषट्कारप्रदाना यजतयः। उपविष्टहोमाः स्वाहाकारप्रदाना जुहोतयः । स इत्थं व्यवस्थितविषयोऽप्ययं यागशब्दः प्रायेण संकीर्ण व्यवहारो दृश्यते। यत्रापि न तिष्ठन् जुहोत न वषट् कुरुते तत्रापि दृश्यते प्रयुक्तो यागशब्द इत्युपेक्ष्यम्।

अथ यत्र सवत्सरकालं कर्तव्यताऽनुवर्तते तत्राध्वर शब्दः। यथा चातुर्मास्यमिष्ट्यध्वरो भवति। सौम्याध्वरश्च वर्षान्तकालः। चयनमप्यध्वरो भवति। अथ यत्र ग्रहप्रचारस्तत्र मखशब्दः। यथा ग्रहयागादिः।। यानि त्वङ्गभूतानि सूक्ष्माणि महान्ति वा कर्म्माणि सर्वे ते क्रतवः। त ते व्यावहारिकाः शब्दास्तत्र तत्रोपेक्ष्याः।।

अत्राहुः - एक एवायं सर्वो यज्ञः स एव खलु वृक्षवन्महापरिणाहः। तस्यायं विटपो य एते सर्वे यज्ञा दृश्यन्ते। स एतैर्भिन्नानेकसंस्थैस्तैस्तेः शाखायज्ञैः। कृतरूपोऽयमेको महायज्ञः प्रत्येतव्यः। स त्रिसंस्थः। तस्यैतास्तिस्रः संस्था इष्यन्ते - इष्टिः पशुः सोम इति। अस्ति स इष्टिमात्रेणायं यज्ञः संतिष्ठते न पशुं सोमं वापेक्षते। स यावदस्य वीर्य्यं तेनैव संपद्यते ।।१ ।। अथवा पशुपर्य्यन्तेन प्रचारितेनासौ संतिष्ठते। न सोमे सज्जते। स इष्ट्या नानिष्ट्वा पशौ प्रभवति। इष्टिपूर्वकत्वात् पशूनाम्। स यावदस्य वीर्य्यं तेन संपद्यते ।।२।। अथवा सोमेन यज्ञः संतिष्ठते स नेष्ट्याऽनिष्ट्वा न वा पशुना विना सोमः कृतो भवति। इष्टिपूर्वकत्वात् पशुपूर्वकत्वाच्च सोमस्य। तथा चायं यज्ञः संपूर्णावयवः पूर्णबलो भवति। स यावदस्य वीर्य्यं तेन संपद्यते। अथवाऽयमेकाहाहीनसत्रात्मके सोमेऽपि यदि कामयते - एकाहस्यैव ज्योतिष्टोमस्य सप्तसंस्थस्य प्रथमायामेव संस्थायां यज्ञं संस्थापयति तृतीयस्यां वा चतुर्थ्यां पञ्चम्यां षष्ठ्यां सप्तम्यां वा। यदि कामयते एकाहेनैव ज्योतिष्टोमादिना संस्थापयति नापेक्षतेऽहीनं सत्रं वा। अथाहीनोन द्वादशाहेन सत्रेण वा संस्थापयति। अथ यदि कामयते सोऽग्निचिद्भवति। स नेष्टिं पशुं सोमं वा तत्राकृत्वा तमग्निं चिनुते। स यावन्त्यत्र वीर्य्याणि सर्वाणि तानि संपादयमानः कृतकृत्यो भवति । स इत्थं कामप्रो यज्ञः सर्वान् कामान् यथायथं दुग्धे। स्मर्य्यते च।

'सहयज्ञाः प्रजाः सृष्ट्वा पुरोवाच प्रजापतिः ।। अनेन प्रसविष्यध्वेमेष वोऽस्त्विष्टकामधुक् ।।
देवान् भावयतानेन ते देवा भावयन्तु वः ।। परस्परं भावयन्तः श्रेयः परमवाप्स्यथ' इति
एतानि चैषां यज्ञानां वीर्य्याणि श्रूयन्ते-

सायं प्रातर्ह वा अमुष्मिन् लोकेऽग्निहोत्रहुदश्नानि। तावतीह तस्मिन् यज्ञे ऊर्क् ।।१।। अर्द्धमासेऽर्द्धमासे दर्शपूर्णमासयाजी ।।२।। चतुर्षु चतुर्षु मासेषु चातुर्मास्यायाजी ।।३।। षट्सु षटसु पशुबन्धयाजी।।४।। संवत्सरे संवत्सरे सोमयाजी।।५।। शते शते संवत्सरेष्वग्निचित् काममश्नाति कामं न।। तद्वैतद् यावच्छतं संवत्सराः - तावदमृतमनन्तमपर्य्यन्तम्। तस्य यदपीषीकयेवीपहन्यात् तदेवास्यामृतमनन्तमपर्य्यन्तं भवति - इति।।०।।

उक्ताः सर्वे यज्ञाः। एतैश्च कृतैः कर्तुरात्मा संस्क्रियते। ते चात्मनः संस्कारा द्विविधाः - दैवसंस्कार आर्षसंस्काराश्च। तत्र अग्निहोत्रादिभ्यो विश्वसृजामयनान्तेभ्यः श्रोतेभ्यो यज्ञेभ्यः साध्या दैवाः। अथ निषेकादिश्मशानान्तेभ्यः स्मार्त्तेभ्यः साध्या आर्षाः।। उभयविधा अप्येतेऽतिशयाधानात्मकाः संस्कारा दोषमार्जनात्मकसंस्कारानन्तरेण नोत्पद्यन्ते।। तैलाक्तमलिने वस्त्रे रञ्जनानुत्पत्तिवत्। तस्मात् स तृतीयः संस्कारः सामयाचारिको नामेष्यते श्रौतस्मार्त्तोपायभूतः। यः समयकृतो यश्चाचारसिद्धः कर्तव्यतानियमः स इहैकशब्देनोच्यते सामयाचारिक इति।। तत्र समयः, संकेतः, संवित्, संप्रतिपत्तिरित्येकार्थाः। स च सामयिको राजधर्मादिः समयेभेदाद्भिद्यते। अथाचारधर्मः शरीरकुलदेशभेदात् त्रिधा भिन्नः। तत्र शरीराचारः शुद्धिः। सा पञ्चधा भिद्यते देहशुद्धिः। द्रव्यशुद्धिः। अघशुद्धिः। एनःशुद्धिः। भावशुद्धिश्चेति। एवं कुलाचारः कुलपरम्परानियतः कर्तव्यताविशेषः। देशाचारोपि तत्तदेशे परम्परा सिद्ध प्रचारविषयोऽर्थः। न चानाचारस्याशुद्धात्मनोऽन्ये संस्काराः श्रौताः स्मार्त्ता वा अभ्युपपद्यन्ते। तस्मादाचारः प्रधानम्। तान्येतानि सर्वाणि कर्म्माण्युच्यन्ते। ये चैतेभ्यः कृतेभ्यः कर्तुरात्मन्यपूर्वा अतिशया उत्पद्यन्ते तान्यपि कर्म्माविनाभूतानि कर्माण्युच्यन्ते कर्म्माण्येव धर्माः। अदृष्टा अपूर्वाः आधेयातिशयाः आत्मनः संस्कारा भावनाख्या धर्माः। आहिताश्चातिशया वासनाख्या धर्माः। ये चातिशयाधायकाः व्यापारस्तेऽपि कर्तव्यतया विहिता आधिकारिका धर्माः। यद्व्यतिरेकेण चैषां सर्वेषामनुत्पत्तिस्ते सामयाचारिकाः परमा धर्माः। तदित्थं धर्मश्चतुर्धा- श्रौतधर्मः। स्मार्तधर्मः। आचारधर्मः। समय-धर्मश्चेति। तत्र समयधर्मेणाचारधर्मः संपद्यते। आचारेण स्मर्त्ताः। स्मार्तेन श्रौतः। श्रौतेनाभ्युदयः संपद्यते निःश्रेयसं च। स पुरुषार्थः सर्वेषां पौरुषणामानन्दपरमत्वात्।।

यज्ञःस्वयम्भूर्वरुणः सूर्य्यः पृथ्वी च चन्द्रमाः ।। पशुर्यज्ञोऽत्र यज्ञोऽहं यज्ञैर्यज्ञोऽयमिज्यते ।। १
यज्ञस्य यज्ञतां ज्ञात्वा यज्ञैर्यज्ञं यजेत यः ।। यद्यदिच्छति तत्सर्वं स साधयति यज्ञतः ।। २

इति श्रीमहामहोपदेशक-समीक्षाचक्रवर्ति

श्रीमधुसूदन विद्यावाचस्पति प्रणीते


यज्ञमधुसूदनाभिधे यज्ञशास्त्रे


यज्ञविटपाध्यायोऽयं

संपूर्णः ।।


उपकरणाध्याय – संबन्धि चित्राणि

१ अहवनीय कुण्डम्
२ आवसभ्य कुण्डम्
३ सभ्यकुण्डम्
४ गार्हपत्यकुण्डम्
५ दक्षिणाग्निकुण्डम्
६ ब्रह्मासनम्
७ यजमानासनम्





























शम्या
१४


स्फ्यः
१५


शृतावदाम्
१६


उपवेशः
१७


मकराकारः कूर्चः
१८


दृषत्
१९


उपलः
२०



षड्वर्तम्
२१


अभ्रिः
२२



अधरारपिः
२३


उत्तरारपिः
२४


ओविली
२५


प्रमन्थः
२६


२७ नेत्रम्



अन्तर्धानकटः
२८



हविर्धानपात्री
२९


प्राशित्रहरण
३०



३१
चमसाः


३२
हडापात्री


३३ यजमानासनम्



३४
पत्न्या आसनम्


३५
होत्रासनम्


३६
ब्रह्मासनम्


३७
यजमानपात्री


३८
पत्नी पात्री


३९ कृष्णाजिनम्

अथ
श्रीयज्ञमधुसूदने

कर्म्मानुक्रमणिकाध्यायः
(पञ्चमः)

अग्न्याधेयकर्म्मणामनुक्रमं दर्शयामः–

१ कूष्माण्डहोमः
२ गणहोमः
३ नान्दीश्राद्धम्
४ उदकशान्तिः
५ प्रतिसरबन्धः
६ पवनाचमनमार्जनानि
७ पुण्याहवाचनम्
८ मातृकापूजा चेत्येतानि बहिरङ्गाणि गुणकर्म्माणि ।।

इति प्रथमं पर्व ।।१।।

१ अथ सङ्कल्पः
२ ऋत्विग्वरणम्
३ मधुपर्कः
४ देवयजनयाचना
५ अग्न्यायतनसंस्कारः
६ सम्भारसम्भरणम्
७ गोपितृयज्ञः
८ औपासनाग्नौ सर्वोषधिहोमः
९ ब्रह्मौदनप्राशनं सदक्षिणादानं चेत्येतानि अन्तरङ्गाणि गुणकर्म्माणि पौर्विकाणि ।।

इति द्वितीयं पर्व ।।२।।

१० अथ मन्थनेनाग्निसंपादनम्
११ अग्नित्रयाधानम्
१२ त्रेताग्नौ उत्तरः सर्वोषधिहोमः
१३ पञ्चसमिद्धोमः
१४ आहितसर्वाग्न्युपस्थानम्
१५ आहितसर्वाग्निजपः
१६ आहितप्रत्येकाग्न्युपस्थानम्
१७ पूर्णाहुतिः
१८ उत्तरः कूष्माण्डहोमः

इति तृतीयं पर्व ।।३।।

तदित्थं कूष्माण्डहोमादि–कूष्माण्डहोमान्तं कर्म्माग्न्याधानमुच्यते–इत्येकः पक्षः। सङ्कल्पादिपूर्णाहुत्यन्तमेवेद-मग्न्याधानमित्यन्यः पक्षः।।

वसन्ते ब्राह्मणोऽग्नीनादधीत, ग्रीष्मे राजन्यः, शरदि वैश्यः। वर्षासु निषादस्थपतीन् याजयेत् । सूर्य्यनक्षत्रेऽग्नी-नादध्यात्। अथ आषाढ्या उत्तरस्याममायां पुनर्वस्वोः पुनराधानमादध्यादित्याहुः। तदिदमग्न्याधानमध्यात्मं याज्ञिकदैवात्म संपत्यर्थमनुष्ठीयते।।

अथाग्निहोत्रकर्म्मानुक्रमणी।

१ होमारम्भः
२ विहरणोद्धरणम्
३ अच्छिन्नधारा
४ पूर्वाहुतिः

५ उत्तराहुतिः
६ शेषप्राशनम्
७ उदकाहुतिहोमः
८ समिदाधानम्
९ उद्धरणम्

इत्थं विहरणाद्युद्धरणान्तं कर्म्माग्निहोत्रमुच्यते। उदितेऽनुदिते समयाध्युषिते वा प्रातः सायं च तदग्निहोत्रं यावज्जीवनमहरहः कुर्य्यात्। सोऽयमग्निहोत्रयागोऽहोरात्र विभक्तपाक्षिकाग्निसंस्कारार्थो विधीयते।।

अथ दर्शपूर्णमासेष्टिकर्म्मानुक्रमणी।

१ अन्वारम्भणीयेष्टिः
२ पुनराधानम्
३ अग्न्युद्वासनीयेष्टिः
४ अग्निशालापात्राणां संस्काराः
५ गोपितृयज्ञो विकल्पितः
६ संभारसंभरणम्
७ ब्रह्मौदनपाकः
८ अग्निमन्थनम्

इत्यपूर्वेष्टिप्रयोगे पूर्वाङ्गानि।।

९ अग्नित्रयपुनराधानम्
१० पुनराधानहोमः
११ पुनराधेयेष्टिः
१२ अन्वाधानम्
१३ अग्निवारुणीष्टिः
१४ द्वितीयपुनराधानम्
१५ विच्छिन्नाग्न्याधानम्
१६ प्रवासोपस्थानम्
१७ आहिताग्नेः प्रवासविधिः
१८ प्रवासादागमनविधिः

इति नैमित्तकाङ्गानि।।

शुक्लप्रतिपदि दर्शेष्टिः कृष्णप्रतिपदि पूर्णमासेष्टिः ततः पूर्वेद्युः पर्वदिनमुपवसथाहः

१ उपवसथाहे व्रतोपायनं प्रथमविकल्पः आरण्याशनम्, आहवनीयागारे गार्हपत्यागारे वा दम्पत्योरधः शयनम्।
२ दर्शेष्टौ सांनाय्यदधिसंपादनम्
२ इध्माबर्हिः संपादनम्

इति प्रथमे पर्वण्युपवसथाहकर्म्माणि।।

१ ब्रह्मवरणम्
२ अपां प्रणयनम्
३ पात्रासादनप्रोक्षणादिपात्रसंस्काराः
४ वाग्यमः
५ पुरोडाशसंपादनम्
६ वाग्विमोकः व्रतोपायनं द्वितीयविकल्पः।
७ वेदीनिर्म्माणम्
८ इध्माबर्हिःस्रुचां प्रोक्षणादितन्त्र-मन्तर्वेदिद्रव्यसंस्काराः
९ अग्निसंस्काराय सामिधेनीकर्म्म
१० आज्यहविः पूर्णानां स्रुचां पुरोडाश सांनाय्ययोश्च वेद्यामासादनम्। व्रतोपायनं तृतीयविकल्पः।

इति पूर्वाङ्गकर्म्माणि प्रथमं पर्व।।१।।

११ पुरः स्वस्त्ययनम्
१२ पश्चानुवचनानि
१३ पूर्वाधाराग्निसंमार्गोत्तराधाराः
१४ होतृत्रयप्रवरणम्
१५ पुनः स्वस्त्ययनम्

इति पूर्वाङ्गकर्म्माणि द्वितीयं पर्व।।२।।

१६ स्रुगादापनकर्म्म
१७ सामिधेन्यकर्म्म

१८ पञ्च प्रयाजयागाः

१९ आज्यभागौ द्वौ

इति पूर्वाङ्गकर्म्माणि तृतीयं पर्व ।।३ ।।

अथेह त्रयः प्रधानयागाः-

एतदेव च प्रकृतिविकृतीनामावापस्थानम् ।।

२० स्विष्टकृद्धोमः

इत्युत्तराङ्गकर्म्म प्रथमं पर्व ।।१ ।।

२१ इडाभागभक्षणं नाम हविःप्राशनम्

२२ त्रयोऽनुयाजयागाः

इत्युत्तराङ्गकर्म्म द्वितीयं पर्वं ।।२ ।।

२३ पत्नीसंयाजः

२५ याजमानं कर्म्म

२६ पिण्डपितृयज्ञः

इत्युत्तराङ्गकर्म्म तृतीयं पर्व ।।३ ।।

इत्थं व्रतोपायनादिपिण्डपितृयज्ञान्तं याजमानान्तं शंयुवाकान्तं वा कर्म्म दर्शपौर्णमासमित्युच्यते। शुक्लप्रतिपदि दर्शेष्टिं कृष्णाप्रतिपदि पूर्णमासेष्टि यावज्जीवनं त्रिंशद् वर्षाणि वा कुर्य्यात्। सोऽयं दर्शपूर्णमासयागः पक्षद्वयविभक्तमासिकाग्निसंस्कारार्थो विधीयते ।।

आग्रयणम् ।

अथाग्रयणं नामेष्टित्रयं भवति ।

१ शरदि व्रीह्याग्रयणम् = शारदनवान्नेष्टिः

२ वर्षासुश्यामाकाग्रयणम् = वार्षिकनवान्नेष्टिः

३ वसन्ते यवाग्रयणम् = ग्रैष्मनवान्नेष्टिः । इति

अस्य चाग्रयणस्य पौर्णमासतन्त्रत्वात् सर्वं पौर्णमासवत्। किन्तु प्रधानयाग - स्विष्टकृद्धोमयोर्मध्ये उपहोमो विशेषः । सर्वान्ते च ब्राह्मणतर्पणं विशेषः । नवान्नानां व्रीहिश्यामाकयवानामग्निहोत्रहोमानन्तरं समन्त्रकं भक्षणं भवति । अथवा नवान्नं व्रीह्यादिकं गां भक्षयित्वा तत्पयसाऽग्निहोत्रहोमं नैत्यकं कृत्वा समन्त्रकं भक्षणं भवति । इयं नवान्नेष्टिरप्युच्यते । एवं सवनेष्टिकाम्येष्टयस्तत्तद्विकृतिविशेषैरनुसन्धेयाः । एतच्चेष्टित्रयमृतुसन्धिषु त्रिषु नवससस्योत्पत्तौ प्रथमप्राशननिमित्तं कुर्य्यात् ।।

चातुर्मास्यम् ।

अथ चातुर्मास्ययागो नामाध्वरश्चतुः पर्वा भवति-

१ फाल्गुन्युत्तरप्रतिपदि वैश्वदेवीष्टिः

२ आषाढ्यत्तरप्रतिपदि वरुणप्रघासः

३ कार्त्तिक्युत्तरप्रतिपदि साकमेधः

४ कार्त्तिक्युत्तरप्रतिपदि शुनासीरोयम्

एषां कर्म्मानुक्रमण्यो यथा-

वैश्वानरपार्जन्येष्टिः-

१ शाखाहरणम्

२ अन्वाधानम्

३ पञ्चहोत्राहुतिः

४ वाजिनयागः

५ समिष्टयजुः

इति वैश्वदेव पर्व ।।१ ।।

१ पशुबन्धवेदिः

२ उत्तरवेदिनाभिः

३ चात्वालः

४ उत्करः

५ मारुतीवेदिः = प्रतिप्रस्थातृवेदिः

६ औत्तरवेदिकम् । तत्र उत्तरवेदिसंस्कारश्चात्वा-
लसंस्कारश्च

७ अग्निप्रणयनम्

८ प्रणीताग्न्यभिहोमः
९ मारुतीप्रचारः (यागः)
१० वारुणीप्रचारः (यागः)
११ एककपालयागः
१२ अवभृथेष्टिः
१३ व्रतविसर्गः

इति वरुणप्रघास पर्व।।२।।

१ अग्निहोत्रहोमः
२ अनीकवतीष्टिः
३ सांतपनेष्टिः
४ गृहमेधेष्टिः
५ पौर्णदर्वहोमः
६ क्रीडीयेष्टिः
७ महाहविर्यागः
८ पैतृकवेद्यां महापितृयज्ञो नाम पित्र्येष्टिः
९ त्र्यम्बकयानः = तत्र प्रसिद्धेष्टिः, आदित्येष्टिश्च

इति साकमेध पव।

१ शाखाहरणम्
२ अन्वाधानम्
३ शुनासीरीययागः

इति शुनासीयर्थ पर्व।

स एष चातुर्मास्यनामाध्वरयागश्चतुर्भिर्मासैः परिवर्तमानानामग्निवायुसोमाना- मृतुसन्धिषु त्रिषु तत्तद्देवतासन्धानार्थश्चातुर्मास्यविभक्ताग्निसंस्कारतया विधीयते ।।

अथ पशुः।

पशुबन्धो नाम यागश्चतुर्धा व्याख्यायते-निरूढपशुबन्धः, चरकसौत्रामणीपशुबन्धः, कौकिलसौत्रामणी पशुबन्धः, आश्वलायनसौत्रामणीपशुबन्धश्चेति।

तत्रादौ निरूढपशुबन्धस्यानुक्रमणी भवति

(१) - १ नान्दीश्राद्धम्
२ उदकशान्तिः
३ प्रतिसरबन्धः
४ स्नानादिपञ्चकम्
५ पुण्याहवाचनम्

इत्यङ्गकर्म्माणि प्रथमं पर्व ।।१।।

(२) - ६ सङ्कल्पः
७ ऋत्विग्वरणम्
८ उदवसानम्
९ अग्निमन्थनम्
१० अग्निविहरणम्
११ यूपाहरणम्
१२ पाशुकवेदिः
१३ उत्तरवेदिस्तन्नाभिश्च
१४ चात्वालः
१५ उत्करः
१६ यजमानसंस्कारः
१७ पात्रसंभारसंस्काराः

इत्यङ्गकर्म्माणि द्वितीयं पर्व।।२।।

(३) - १८ अग्निहोत्रहोमः
१९ आग्नेयोष्टिः पशुपूर्वेष्टिर्वा

(४) सद्यस्कालपशुप्रकारभेदे-
१ पशुदेवतासंकल्पः
२ पाशुकपात्रासादनम्
३ यूपावटपरिलेखनम्
४ पाशुकस्त्रुगासादनम्

इति पश्वङ्गप्राकृतम्।१।।

(५) अथ केवलपाशुके-

१ यूपप्रोक्षण-शकलप्रक्षेपादि भिर्यूपसंस्कारः।
२ पशुप्रायश्चित्ताहुतयः
३ पशुपाककरणम्
४ अग्निमन्थनम्
५ पशुसंज्ञपनम्
६ वाशनादिनिमित्ताहुतिः
७ संज्ञप्ताहुतिः
८ वपासाधनम्
९ स्तोकाहुतिः
१० वपासंस्कारः
११ आज्याभागौ
१२ वपाप्रचारः (याग):
१३ पशुपुरोडाशसंपादनम्
१४ अङ्गयागः
१५ दिग्घोमः
१६ वनस्पतियागः
१७ पश्विडाप्राशनम्
१८ उपयाजहोमाः
१९ स्वरुहोमः
२० समिष्टियजुः
२१ पाशुकसक्तुहोमः
२२ उपस्थानानि
२३ पाशुकाग्नेयेष्टिः
२४ पाशुकाग्नावैष्णवेष्टिः
२५ अनुवचनम्
२६ सामिधेन्यम्
२७ षट्प्रवृत्ताहुतयः
२८ मैत्रावरुणदण्डप्रदानम्
२९ प्रयाजयागः
३० आज्यभागौ
३१ पशुपुरोडाशप्रचारः
३२ पशुस्विष्टकृद्यागः
३३ अनुयाजः
३४ पाशुकसमिदाधानम्

एतावत् सर्वं पाशुकं कर्म्मोच्यते।

इति निरूढपशुकर्म्माणि।।१।।

अथ चरकसौत्रामणीपशुबन्धपदार्थसूची प्रारम्भ्यते -

१ फाल्गुन्युत्तरासु नवमीदशम्येकादशीषु सुरासन्धनादिकर्म्माणि
२ द्वादश्यां नान्दीश्राद्धमुदकशान्तिः, प्रतिसरबन्धः, इत्यादीनि बहिरङ्गकर्म्माणि
३ त्रयोदश्याम्-ऐन्द्रपशुयागः, आदित्यचरुश्च।

इत्यङ्गकर्म्म, प्रधानं वा।

४ चतुर्दश्यां त्रिपशूपवसथः।
५ पर्वण त्रिपशुः। अवभृथः

इति प्रधानमेव कर्म।

६. महापितृयज्ञः पर्वणि प्रतिपदि वा विकल्पेन कार्य्यः।
७ प्रतिपदि वायोधसपशुयागः। आदित्यचरुश्च।

इत्युत्तराङ्गकर्म, प्रधानं वा।

८ यदि चयनमपि चिकीर्षति, तदा प्रधानभूते त्रिपशावेव कुर्य्यान्नत्वाद्यन्तयोः पश्वोः। तयोरङ्गत्वात्। समप्राधान्यपक्षे तु तयोरपि यथेच्छं चयनं कुर्य्यात्।

९ ऐन्द्रपशु-त्रिपशु-वायोधसपशूनामेकप्रयोगत्वादुदवसानमृत्विग्वरणकूष्माण्डहवनादीनि च कर्म्माणि सर्वपश्वर्थं सकृदेव कार्य्याणि। एको विहारः। एको च दक्षिणतः पैतृकी वेदिः। पाशुकी तु वेदिर्भिद्यते। तत्राद्यन्तयोर्द्वादशपदा वेदिः कार्य्या, त्रिपशौ त्वष्टादशपदा सा भवति।

इति चरकसौत्रामणीविशेषविधिः।

(३)- १ कौकिलसौत्रामणीसङ्कल्पः
२ ऋत्विग्वरणम्
३ इडाजपः
४ अन्वारम्भणीयेष्टिः
५ उदवसानम्
६ अग्निमन्थनम्
७ मनस्वत्याहुतिः
८ ऐन्द्रपशुसङ्कल्पः
९ पक्षान्तरे त्वत्रैवाग्निचयनसङ्कल्पो वा।
१० अग्निविहरणम्
११ षड्ढोतृकूष्माण्डसारस्वतहोमाः
१२ पश्विष्टिः।
१३ वेदियूपसंस्कारो निरूढपशुबन्धवत्।

इति कौकिलसौत्रामण्यां पूर्वपशुविधिः

१४ पुनर्विहरणम्
१५ आदित्येष्टिः
१६ यजमानानुमन्त्रणम्

इति सौत्रामणीपूर्वेष्टिविधिः।।

ततो द्व्यहो वा सद्यो वा त्रिपशुः।।
१ त्रिपशुसङ्कल्पः
पक्षान्तरे त्वत्रैवाग्निचयनसङ्कल्पो वा।
२ पाशुकवेदिनिर्म्माणम्
३ अग्निविहरणम्
४ अन्वाधानादि व्रतोपायनम्
५ शाकाहरणादि
६ यूपावटपरिलेखादि
७ चात्वाललेखनादि
८ उत्तरवेदिनाभिप्रच्छादनान्तम्
९ खरद्वयनिर्म्माणम्
१० तयोः स्रुगासादन-ग्रहासादने
११ अभ्यादानादियूपावटकरणान्तम्
१२ संस्रावाभिघारणादि
१३ सिकतासमीकरणान्तम्
१४ शाखापवित्रमुपवेषश्च
१५ अग्निप्रणयनम्
१६ ब्रह्मयजमानयोः स्वे उपवेशनम्
१७ पात्रसंस्कारासादने
१८ अपकृष्य महारात्रेऽग्निहोत्रम्
१९ आग्नेयी पश्विष्टिः

इति त्रिपशौ पूर्वकर्म्माणि।

अथ संमर्शनादि
१ सुरापयसोरुत्पवनान्तं कर्म्म।
२ पयोग्रहासादनम्
३ सन्नग्रहोपस्थानम्
४ सौत्रामणीपशुकर्म्म
५ वपाप्रचारान्तं पाशुकम्
६ वपामार्जनान्तम्
७ सुराग्रहहोमः
८ सुराग्रहभक्षणम्
९ सुरोपस्थानम्
१० पितृतर्पणम्
११ पित्रुपस्थानम्
१२ पैतृकहोमः

इति त्रिपशौ सुराग्रहप्रचारः।

१ आश्विनकुष्ठिकशफहोमाः
२ सारस्वतकुष्टिकशफहोमाः
३ ऐन्द्रकुष्ठिकशफहोमाः
४ आसन्द्यां यजमानाभिषेकः
५ व्यस्तव्याहृतिहोमः
६ मङ्गलाह्वानम्
७ चयनपक्षे मृत्युग्रहहोमः
८ मृत्युग्रहभक्षः
९ उपयाजप्रचारः
१० समिष्टयजुः
११ विष्णुक्रमः
१२ व्रतविसर्गः
१३ अवभृथः
१४ ब्राह्मणतर्पणम्

इति प्रधानत्रिपुरुषविधिः।

१५ अग्निविहरणम्
१६ महापितृयज्ञः

इति पर्वदिनाङ्गकर्म्मविधिः।

१७ अथोत्तराङ्गमैन्द्रपशुर्वायोधसः
१८ पुनरादित्येष्टिः
१९ पुनरग्निमन्थनविहरणे
२० अग्निहोत्रम्

इति कौकिलचरकाभ्यां द्वेधा विभक्तः सौत्रामणी प्रयोगः।

(४) - आश्वलायनीये तु-

१ पश्विष्टिः, अग्निप्रणयनं, मन्थनञ्च।
२ आवाहनादि
३ एकादश प्रयाजाः
४ आज्यभागप्रचारः
५ वपायागः
६ पुरोडाशयागः
७ स्विष्टकृद्यागः
८ मनोतानामाङ्गयागः
९ वनस्पतियागः
१० अनुयाजाः

इति सौत्रामणीपूर्वाङ्गमैन्द्रपशुः

११ आदित्येष्टिः=ऐन्द्रपश्वङ्गम्।
१२ पश्विष्टिः, अग्निप्रणयनं, मन्थनञ्च।
१३ आवाहनादि प्राग्वत्
१४ सौत्रामण्याश्विनयागः।
१५ सौत्रामणीसारस्वतयागः।
१६ सौत्रामणीप्रधानैन्द्रवपायागः
१७ आश्विनसौत्रामणीग्रहप्रचारः।

अथाङ्गयागे पुनः--

१ आश्विनहविःप्रचारः
२ सारस्वतहविःप्रचारः
३ ऐन्द्रहविःप्रचारः
४ वनस्पतियागः
५ स्विष्टकृद्यागः
६ देवतानिगमः

अथ सौत्रामण्यङ्गतया त्रयो यागा विधीयन्ते -

१ ऐन्द्रपुरोडाशयागः
२ सावित्रपुरोडाशयागः
३ वारुणपुरोडाशयागश्चेति

अथानुयाजाः

१ सूक्तवाकः
२ सौत्रामण्यङ्गं पशुयागः
३ आदित्येष्टिः

इति सौत्रामणीप्रयोगः समाप्तः। इत्थं चतुर्धा पशुबन्धपदार्था दर्शिताः।

सोऽयं पशुबन्धयागः संवत्सरावयवयोरुत्तरायणदक्षिणायनयोः षाण्मासिकयोरुपक्रमे षाण्मासिकाग्नि-संस्कारतया विधीयते।

अथाग्निष्टोमपदार्थानुक्रमणी भवति।

पौर्विकबहिःकर्म, पौर्विकमन्तःकर्म, दीक्षा, सोमसंपत्तिः, प्रवर्ग्यम्, पशुः ग्रहाः इति अष्टपर्वा ह्ययमग्निष्टोमः। तद्यथा-

१ पूर्वदिने नान्दीश्राद्धम्
२ रात्रावुदकशान्तिः
३ प्रतिसरबन्धश्च
४ आरम्भदिने यजमानपत्नीषोड-शर्त्विजां स्नानादिपञ्चकम्।
५ गार्हपत्यस्य पश्चाद्यजमानोपवेशः।
६ विष्णुसंस्मरणम्
७ अग्निष्टोमसङ्कल्पः
८ सोमप्रवाकवरणम्
९ ऋत्विगाह्वानम्
१० ऋत्विग्वरणम्
११ शालाप्रवेशः

इति पौर्विकबहिः कर्म्माणि ।।१।।

१ ऋत्विक्कर्तृकः शान्तिजपः
२ अध्वर्य्युकर्तृकं मन्थनम्
३ मनस्वतीहोमः
४ पूर्वशान्तिपाठः
५ प्रवर्ग्यसंभरणम्
६ उत्तरशान्तिपाठः
७ देवयजनाध्यवसायः
८ मानसहोमः
९ आहवनीये होमः
१० कूष्माण्डहोमः
११ उपस्थानं वरदानञ्च
१२ यूपाहुतिर्यूपाहरणञ्च
१३ व्रतभक्षणम्

इति पौर्विवकाण्यन्तः कर्म्माणि ।।२।।

१ दीक्षाङ्गवपनादि संस्काराः
२ दीक्षणीयेष्टिः
३ दीक्षाहुतयः
४ दीक्षोपवेशनम्
५ दीक्षाङ्गमेखलाबन्धनम्
६ दीक्षाङ्गपत्नीसंनहनम्
७ उष्णीषवेष्टनम्
८ कुम्बकुरीराध्यूहनम्
९ दीक्षाङ्गं कृष्णविषाणदण्डयोर्गहणम्
१० दीक्षितत्वज्ञापनम्
११ सनियाचनम्
१२ पत्नीयजमानव्रतपयःसाधनम्
१३ दीक्षाव्रतभ्रेषप्रायश्चित्तानि
१४ अन्त्यभिमुखशयनम्
१५ व्रताख्यपयोभक्षणम्

इति दीक्षाकर्म्माणि ।।३।।

अथ सोमक्रयातिथ्येष्टिभ्यां सोमसंपत्तिर्यथा-

१ सोमक्रयाहुतिः
२ सोमक्रयण्यनुमन्त्रणम्
३ सोमक्रयण्यनुगमनम्
४ पद्धरणीग्रहणम्
५ क्रयणाङ्गसोमोपस्थानम्
६ क्रयणाभिमर्शनम्
७ सोमविमानम्
८ सोमवेष्टनम्
९ सोमावेक्षणम्
१० सोमक्रयणम्
११ शकटे सोमस्थापनम्
१२ शकटपरिवहनम्
१३ शकटोपस्थानम्

१४ आतिथ्येष्टिः
१५ सोमासन्दीप्रतिष्ठापनम्
१६ अन्तरागमननिषेधः
१७ सोममधुपर्कः

इति सोमसंपत्तिः ।।४।।

अवान्तरदीक्षारौहिण-महावीरधर्मयागोपसद्यागवेदीसंस्कारोत्तरकर्म्मभिः सप्ताङ्गं प्रवर्ग्यं यथा-

१ तानूनप्त्राज्यग्रहणम्
२ तानूनप्त्रावमर्शनम्
३ तानूनप्त्रावघ्राणम्
४ मदन्तीपचनम्
५ सोमाप्यायनम्
६ द्यावापृथिवीनिह्नवः
७ अवान्तरदीक्षा
८ आहवनीयापस्थानम्
९ यजमानशासनम्
१० शान्तिजपः

इत्यवान्तरदीक्षाकर्म्माणि ।।१।।

११ प्रवर्ग्यसामग्रीसंपादनम्
१२ प्रवर्ग्यारम्भः
१३ प्रवर्ग्यपात्रसंभारप्रोक्षणम्
१४ रौहिणपुरोडाशश्रपणम्
१५ रौहिणपुरोडाशासदनम्

इति रौहिणम् ।।२।।

१६ प्रवर्ग्यारम्भहोमः
१७ महावीराञ्जनम्
१८ रुक्मोपगूहतम्
१९ महावीरसादनम्
२० महावीराज्यपूरणम्
२१ महावीरप्रादेशकरणम्
२२ महावीराङ्गारपरिश्रयणम्
२३ महावीरदक्षिणतोवैकङ्कतपरिधि-परिधानम्
२४ घर्मोपस्थानम्
२५ महावीरप्रदक्षिणगमनम्
२६ महावीराप्यायनम्
२७ महावीरप्रेक्षणम्
२८ घर्मोपस्थानम्

इति महावीरः ।।३।।

२९ प्रवर्ग्याङ्गार्हपत्योपस्थानम्
३० दक्षिणरौहिणहोमः
३१ धर्मदुघादोहनम्
३२ महावीरे गोपयःप्रक्षेपः
३३ धर्मोष्मान्वीक्षणम्
३४ सिद्धघर्ममहावीरग्रहणम्
३५ महावीरोत्थापनम्
३६ महावीरप्राङ्नयनम्
३७ घर्महोमार्थं दक्षिणात्याक्रमणम्
३८ घर्मयागः
३९ घर्मस्रावणम्
४० उद्वासनीये महावीरसादनम्
४१ शकलक्षारणम्
४२ शकलानुप्रहरणम्
४३ गार्हपत्यादिपरिषेचनम्
४४ उपयमनपर्य्यग्निकरणम्
४५ उपसादनाङ्गजपः
४६ प्रवर्ग्योत्तरप्रथमाहुतिहोमः
४७ पूर्वाहुत्यङ्गगार्हपत्यावेक्षणम्
४८ द्वितीयाहुतिहोमः
४९ कूर्चे लेपमार्जनम्
५० घर्मभक्षणम्
५१ प्रवर्ग्यप्रायश्चित्ताहुतिः
५२ घर्मोत्सादनम्

५३ शान्तिजपः

इति घर्मयागः ।।४।।

उपसद् यथा–

१ उपसदिष्टिः
२ उपसद्धोमः
३ त्रिस्तनव्रतप्रैषः।
४ त्रिस्तनव्रतदोहनम्
५ द्विस्तनव्रतदोहनम्
६ मध्यमोपसद्धोमः

इत्युपसत् ।।५।।

१ महावेदिः
२ सौमिकी उत्तरवेदिः
३ उपरवाणां कालः
४ सौमिक उत्करः
५ स्तम्बयजुर्हरणम्
६ पाणिसंमर्शनादि–पशुबन्धवत् कर्म्माणि
७ वेदिकारप्रैषः
८ चात्वालपरिलेखः
९ उत्तरनाभिप्रच्छादनान्तं कर्म्म

इति वेदीसंस्कारः

१ प्रवर्ग्योद्वासनम्
२ प्रवर्ग्यात्तरशान्तिपाठः
३ परिघर्म्यपात्रसादनम्
४ इध्मप्रदीपनहोमः
५ महावेदिगमनम्
६ प्रचरणीयमहावीरपरिपूरणम्
७ घर्मपात्रोत्सादनर्थसादनम्
८ घर्मपात्राच्छादनम्
९ आसादितघर्म्मोपकरणोपस्थानम्
१० घर्मोद्वासनसाम
११ घर्मोपस्थानं यजमानेन
१२ अपां प्रक्षेपः। जलस्पर्शः
१३ आदित्योपस्थानम्
१४ गोत्रादेशः
१५ उत्तरशान्तिः
१६ शालामुखीयोपस्थानम्

इत्युत्तरकर्म ।।

इत्यग्निष्टोमे प्रवर्ग्यं कर्म्म संपूर्णम् ।।

महावेदिकरणं, हविर्धानसदोमार्जालीयाग्नीध्रीयनिर्माणं, खरनिर्म्माणम्, उपस्थानं, वसतीवर्य्यादिसादनं, पाशुकप्राकृतम् = इत्यग्नीषोमीयपशुकर्म्माण्यष्टपर्वाणि। तद्यथा–

(१) १ पूर्वाङ्गकर्म
२ महावेदीकरणम्
(२) ३ दक्षिणहविर्धानोत्तरवर्त्तनीहोमः
४ दक्षिणधूरञ्जनम्
५ उत्तरहविर्धानोत्तरवर्त्तनीहोमः
६ उत्तराक्षधूरञ्जनम्
७ हविर्धानप्रवर्तनम्
८ अनसोरुपस्तंभने स्थापनम्
९ मेथ्यां हविर्धानबन्धनम्
१० हविर्धानगृहनिर्म्माणम्
(३) ११ औदुम्बर्यवटखननप्रैषः
१२ उपरवखननप्रैषः
१३ सदोनिर्म्माणम्
१४ सदोऽभिमर्शनम्
(४) १५ महावेद्या दक्षिणतो मार्जालीयगृहम्
१६ उपरवसंस्काराः
१७ उपरवेषु फलकप्रतिष्ठापनम्
(५) १८ आग्नीध्रीयखरकरणम्
१९ होतृखरी = होतृधिष्ण्यम्
२० मैत्रावरुणधिष्ण्यं खरः
२१ ब्राह्मणाच्छंसिधिष्ण्यं खरः
२२ पोतृखरः

२३ नेष्टृधिष्ण्यं खरः
२४ अच्छावाकधिष्ण्यं खरः
२५ मार्जालीयधिष्ण्यं खरः
(६) २६ औत्तरवेदिकाग्न्युपस्थानम्
२७ आस्तावचात्वालयोरुपस्थानम्
२८ पशुश्रपणाग्न्युपस्थानम्
२९ सदसः पश्चिमद्वारे औदुम्बरी
३० ब्रह्मसदनोपस्थानम्
३१ शालामुखीयोपस्थानम्
३२ गार्हपत्याद्युपस्थानम्
३३ अध्वर्योः प्रत्यक् सदोऽतिक्रमणनिषेधः
३४ प्राग्वंशे पात्रासादनम्
३५ अग्नीषोमप्रणयनप्रैषः
३६ सोमोपस्थानम्
३७ आहवनीयोपस्थानम्
(७) ३८ वसतीवरीग्रहणम्
३९ वसतीवरीसादनम्
(८) ४० आज्येडान्तं निरूढपशुवत्
४१ उपयाजाः
४२ पुरोडाशयागः
४३ अङ्गयागः

इत्यग्नीषोमीयपशुः ।।

अथ प्रातः सवनमाध्यन्दिनसवनतृतीयसवनविधानभेदात् त्रेधा ग्रहसुत्याऽनुक्रम्यते–

१ बहिर्वेदिभवनम्
२ वसतीवरीस्थापनम्
३ सुत्यासामग्रीसंपादनप्रैषः
४ सौत्यं सायंदोहकरणम्
५ सौत्यमिध्माबर्हिः संभरणम्
६ सुब्रह्मण्याह्वानम्
७ सुत्यासङ्कल्पः
८ अम्भ्रणासादनम्
९ सुत्यार्थप्रबोधनम्
१० सुत्यारम्भप्रैषः
११ हविर्धाने वायव्यादि सादनम्
१२ आग्नीध्रीयादिपंचकसंमर्शनम्
१३ सौमिकपरिधिस्रुगभिमर्शनम्
१४ सोमराजोपावरोहणम्
१५ उद्गातृनिवेदनम्
१६ सवनीयपञ्चहोतृहोमः
१७ प्रातरनुवाकादिपरैषः
१८ सौत्यपुरोडाशीयपात्रासादनम्
१९ पवित्रकरणादि
२० उत्तरवेदिसमीपे प्रणीतासादनम्
२१ अग्निहोत्रहवण्यादानादि
२२ सवनीयपुरोडाशनिर्वापः
२३ उभयोर्द्रव्ययोः प्रोक्षणम्
२४ कृष्णाजिनादानादि
२५ व्रीह्येकभागावघातः
२६ हविष्कृदाह्वानम्
२७ तन्दुलप्रक्षालननिनयनान्ते प्रातर्दोहः सवनीयः
२८ धानाकपालोपधानम्
२९ परिवापकपालोपधानम्
३० आमिक्षाकुम्भ्युपधानम्
३१ सौत्यपुरोडाशीयसंवापः
३२ सवनीयधानाश्रपणम्
३३ करम्भसंपादनम्
३४ परिवापश्रयणम्
३५ आमिक्षावाजनाधिश्रयणम्
३६ खरेऽतिग्राह्यग्रहादिसादनम्
३७ ग्रहाभिमर्शनम्
३८ आपोनप्त्रीयारम्भकहोमः
३९ आपोनप्त्रीयानुवचनप्रैषः
४० पन्नेजनीग्रहणार्थं पत्न्यामयनम्
४१ एकधनाग्रहणार्थहोमः

१५ दधिघर्मप्रचारः
१६ दधिघर्मभक्षः
१७ माध्यन्दिनसवनीयप्रचारः
१८ माध्यन्दिनसवनीयचमसोन्नयनप्रैषः
१९ माध्यन्तिनसवनीयशुक्रामन्थिप्रैषः
२० माध्यन्दिनप्रस्थितयाज्याप्रचारः
२१ इडोपह्वानप्राशित्रहरणे
२२ प्रणीताविनयनम्
२३ इडोपहूतचमसभक्षणम्
२४ नाराशंससादनम्
२५ हविःशेषप्राशनम्
२६ दक्षिणारम्भकहोमः
२७ दक्षिणानयनभजने
२८ सौमिकदक्षिणादानम्
२९ वैश्वकर्मणहोमः
३० उत्तराङ्गहोमोपस्थानम्
३१ दक्षिणासमनुदेशः
३२ मरुत्वतीयग्रहद्वयप्रचारः
३३ तृतीयमरुत्वतीयपात्रे सोमग्रहणम्
३४ मरुत्वतीयग्रहप्रचारः
३५ माध्यन्दिनसवनीयनराशंससादनाम्
३६ माहेन्द्रग्रहणम्
३७ माहेन्द्रपवमानस्तोत्रोपाकरणम्
३८ अभिषवप्रैषः
३९ माहेन्द्रग्रहप्रचारः
४० आग्नेयातिग्राह्यग्रहप्रचारः
४१ ऐन्द्रातिग्राह्यप्रचारः
४२ सौर्य्यातिग्राह्यप्रचारः
४३ अतिग्राह्यभक्षणम्
४४ आत्माभिमर्शः
४५ मैत्रावरुणादिचमससादनम्
४६ आधवनीयोत्तानकरणम्
४७ वसतीवर्येकधनावनयनादि
४८ सवनप्रायश्चित्तहोमः

इति माध्यन्दिनसवनकर्माणि ।।

१ तृतीयसवनारम्भकप्रैषः
२ तृतीयसवनसम्बन्ध्यभिषवः
३ आदित्यग्रहे शृतातङ्क्यग्रहणम्
४ आदित्यग्रहप्रचारप्रैषः
५ आग्रयणे तृतीयसवनीयसोमग्रहणम्
६ तृतीयसवनीयहोमः
७ स्तोत्रोपकरणम्
८ हविर्द्धानं प्रविश्य सोमोपस्थानम्
९ धिष्ण्याधारणं, पृष्ठयास्तरणं च
१० तृतीयसवनीयप्रचारः
११ उत्तरवेद्यां चमसासादनम्
१२ तृयीयसवनीयहोतृचमसप्रचारः
१३ तृतीयसवनीयप्रस्थितयाज्याप्रचारः
१४ होतुरग्रे उपवेशनादि = इडोपहूत – चसभक्षान्तम्
१५ सौमिकपुरोडाशशकलदानम्
१६ वैश्वदेवग्रहप्रचारः
१७ चमसभक्षः
१८ घृतयाज्यासंपुटितसौम्यचरुयागः
१९ पात्नीवतग्रहणम्
२० पन्नेजनीजलस्रावणम्
२१ शंसन–प्रतिगरे
२२ चमसभक्षणम्
२३ आहवनीयोत्तरतश्चमससादनम्
२४ आशिरोपवेषनिरसनं, हवनं च
२५ निःसर्पणाहुतयः । प्रायश्चित्तम्

इति तृतीयसवनकर्म्माणि

१ नवसमिष्टयजूंषि
२ अवभृथस्नानम्
३ अनुबन्ध्याप्रायश्चित्तम्

इत्यग्निष्टोमयज्ञस्य कर्मानुक्रमणी संपूर्णा ।

अथाग्निचयनम् ।

गार्हपत्यो नैर्ऋत्यमाहवनीयोऽष्टौ धिष्ण्याश्चेत्येतेषामेकादशानामग्नीनां सोमसम्बन्धिनां संस्कार-विशेषोऽग्निचयनं नामातियज्ञः।। अन्तरेणाप्यग्निचयनं सोमः क्रियते । इच्छतस्तु स महाव्रते सोमेऽग्निचय-नामावश्यकमाहुः।।

स्वातन्त्र्येणाप्यग्निचयनमिच्छन्ति । तत्रेदं द्विविधं भवति- अध्वरकर्म्म चाऽग्निकर्म्म चेति।।

तत्र प्रथमायां फाल्गुन्यां पश्वालम्भो, माघामावास्यायामिति केचित् । फाल्गुन्या अनन्तरायामष्टकाया-मुखासंभरणम्। ततोऽनन्तरायाममावास्यायां दीक्षा ।।

ततः संवत्सरं यावदुख्याग्निधारणविष्णुक्रमवात्सप्रादिकर्म्माणि। संवत्सरान्ते फाल्गुन्या अनन्तरायमा-वस्यायां सोमक्रयः। सोमक्रयात् प्रागेव गार्हपत्यचयनम्।।

सोमक्रयादूर्ध्वं चैत्रशुक्लेऽन्तरोपसादवाहनीयचयनम्। ततः शतरुद्रियहोमः। अग्निविकर्षणम् , प्रवर्ग्योत्सादनम् , वसोर्धारा, यजमानाभिषेको, धिष्ण्याग्निचयनं, पयस्या इत्येतावानयमत्र कर्म्मक्रमः।।

इति मधुसूदनविद्यावाचस्पतिप्रणीतःङ्कर्म्मानुक्रमणिकाध्यायः समाप्तः ।।

Chapter VII - अथ शतसूत्री देवतानिवित्

देवानां भद्रा सुमतिर्ऋजूयतां देवानां रातिरभि नो निवर्तताम् ।।
देवानां सख्यमुपसेदिमा वयं देवा न आयुः प्रतिरन्तु जीवसे ।।१ ।८९ ।२ ।।

तान् पूर्वया निविदा हूमहे वयं विश्वे नो देवा अवसा गमन्निह ।।
भद्रं कर्णेभिःशृणुयाम देवा आनो भद्राः क्रतवो यन्तु विश्वतः ।।१ ।८९ ।

बालानां ब्रह्मविज्ञानप्रवेशाय वितन्यते ।
शतसूत्री निविद्दैवी स्वल्पव्याख्यानुगर्भिता ।।१ ।।

यो विद्यान्निविदं दैवीं वेदविद्यां सुवेद सः ।।
एषामेव हि देवानां विज्ञानं वेद उच्यते ।।२ ।।

एको देवः

१) प्रजापतिरेवैको देवः ।तत् प्रभूतत्वात् सर्वेषाम् ।। प्रजापतिस्त्वेवेदं सर्वमसृजत यदिदं किञ्च ।।श ६ ।१ ।२ ।११ ।। प्रजा वै भूतानि । देवाः पितरो मनुष्याः पशवोऽसुरा इति पञ्चभूतानि ।।श.२ ।३ ।४ ।१ ।। प्रजापतिर्वै देवानां वीर्य्यवत्तमः।।श.१३ ।१ ।२ ।५ ।। एष ह वै प्रजापतिः ।।

द्वौ देवौ

१) द्यावापृथिव्योर्वै सर्वा देवताः प्रतिष्ठिताः ।।श.१३ ।२ ।९ ।१ ।।

२) अग्निः सोमः – इति द्वौ रेतोधसौ देवौ ।।अग्निर्वै रेतोधाः । सोमो वै रेतोधाः । अग्नीषोमात्मकं जगत् । इन्द्राग्नी वै देवानामोजस्वितमौ ।।श.१३ । द्वया वै देवाः । देवा अहैव देवाः । अथ ये ब्राह्मणाः शुश्रुवांसोऽनूचानास्ते मनुष्यदेवाः ।। श. ।। तत्रैते प्राणदेवा ईडेन्याः । मनुष्यदेवास्तु सपर्य्येण्या इत्याहुः ।।

त्रयो देवाः

१. अग्निः ,इन्द्रः, सूर्य्यः -- इत्येते त्रयो ऽतिष्ठावानो देवाः । अग्नौ वर्चः ।इन्द्रे ओजः । सूर्य्ये भ्राजः । एतानि ह वै तेजांसि । एतानि वीर्य्याणि ।।श.४.४.५ ।।

२. वीर्य्यं वा अग्निः । वीर्य्यमिन्द्रः । वीर्य्यं विष्णुः ।। तै.ब्रा.१.७.२ ।। त एते त्रयो देवा वीर्य्याणि । ब्रह्मक्षत्रं विडिति वीर्य्याणि । ब्रह्म वा अग्निः । क्षत्रमिन्द्रः । तै.ब्रा.३.९.१६ ।।

३.अग्निः सोमो विष्णुरित्यमी त्रयो देवा उपसदां रूपम् ।। ऐ.१३ ।३१ ।।श.३ ।३ ।५ ।९ ।।

४.अग्निः , वायुः, सूर्य्यः --- इति वाजिनो देवाः । तै.ब्रा.१ ।६ ।३ ।। वाजिन एवैते त्रयः केशिनो देवाः ।। ऋ.सं.२ ।३ ।२२ ।४ ।। अथ . ९ ।२९ ।६ ।।''त्रयः केशिन ऋतुथा विचक्षते संवत्सरे वपते एकएषाम् ।।विश्वमेको अभिचष्टे शचीभिर्ध्राजिरेकस्य ददृशे न रूपम् '' ।।

५. मित्रः, वरुणः,अर्य्यमा – इति प्रचेतसो देवाः ।।ऋ.सं.१ ।४१ ।१ ।।

६.अग्निः,यमः,सोमः -- इत्येते त्रयः पितृदेवाः ।। सर्वेषां पितॄणामेतन्मयत्वात् ।।

७. त्रया वै देवाः -- वसवो रुद्रा आदित्याः -- इति श्रुतिः ।।श.४ ।३ ।२ ।१ ।।

चत्वारो देवाः

१. अग्निः, रुद्रः,वरुणः,इन्द्रः --- इतीन्द्रतुरीयाश्चत्वारोमी ऐन्द्राग्नदेवाः। तत्राद्यास्त्रयोऽग्निभागा अग्नयः । तेष्विन्द्रस्तुरीयो भागः संसृष्टः ।तै.ब्रा.१ ।७ ।१ ।।श.५ ।२ ।३ ।१२ ।।तेनैताविन्द्राग्नी द्वौ देवौ संभवतः ।। याज्ञिके तु विधावयमिन्द्रो रुद्रं वरुणं चान्तारा प्रयुज्यते ।।

२. अग्निः,इन्द्रः, वायुः, मखः – इति चत्वारो यशःसत्रिया देवाः तां.७ अ. ।५खं ।। ६ ।।

पञ्चदेवाः

१. अग्निः , वायुः , आदित्यः, चन्द्रमाः , दिशः --इति पञ्चलोकपा देवाः। तत्रादितस्तत्रयाणामग्नित्वं शेषयोस्तु द्वयोः सोमत्वं विद्यात् ।।

२. अग्निः, सोमः,इन्द्रः वरुणः बृहस्पतिः -- इत्येते तानूनप्त्रियाः पञ्चदेवाः। अग्निर्वसुभिः सोमो रुद्रैः, इन्द्रो मरुद्भिः, वरुण आदित्यैः, बृहस्पतिर्विश्वैर्देवैः सह व्युत्क्रम्य वस्त्वादीनेतान् वरुणगृहे विनिधाय च तानूनप्रमकुर्वन्।।

३. अग्नीसोमौ । अग्निः । मित्रावरुणौ । ता वा एताः पञ्च पशुयागीयाः ।।

४. अग्निः पवित्रं स मा पुनातु। वायुः सोमः सूर्य्य इन्द्रः पवित्रं ते मा पुनन्तु इति पञ्चैते पवित्रदेवाः ।।

षड् देवाः

१. इन्द्रवायू । मित्रावरुणौ । अश्विनौ -- इति षट्क्रमभक्ष्या देवाः । यथा पूर्वं हीमे सोमस्य भक्षयन्ति ।।

२. अग्निः ,वायुः,आदित्यः,विद्युत्, चन्द्रमाः,आपः,– इति षट् ब्रह्मद्वारदेवाः ।।श.११ ।३ ।२ ।१ ।

३. अग्निः ,वायुः,वरुणः,इन्द्रः,प्रजापतिः,ब्रह्म– इति षड् देवयानदेवाः ।।

४. अग्निः,इन्द्रः,विश्वेदेवाः वाक् ,गौः,द्यौः, -- इति षट् पृष्ठ्या देवाः ।। रथन्तरस्याग्निरिन्द्रो बृहतः । वैरूपस्य विश्वेदेवा । वाग् वैराजस्य । शाक्वरस्य गौर्द्यौ रैवतस्य – इत्येवं षण्णामह्नं क्रमेणैते देवा नियन्तारो भवन्ति ।।

५. अग्निः,वायुः,इन्द्रः,बृहस्पतिः,प्रजापतिः,ब्रह्म – इति षट् सावित्रा देवाः ।।

सप्तदेवाः

१. वायुः, इन्द्रवायू ,मित्रावरुणौ, अश्विनौ, इन्द्रः, विश्वेदेवाः, सरस्वती – इति सप्तैताः प्रउग देवताः। प्रउगशस्त्रं होत्रा शंसनीयम् ।।

२. अग्निर्गृहपतीनां सुवते । सोमो वनस्पतीनाम् । रुद्रः पशूनाम् । बृहस्पतिर्वाचाम् । इन्द्रो ज्येष्ठानाम् । मित्रः सत्यानाम् । वरुणो धर्म्मपतीनाम् । एतावन्तो वै देवानां सप्तसवाः । एतदेव सर्वं भवति ।। तै.ब्रा.१.७.४ ।। तेनैते सर्वसूदेवाः ।।

३.अग्निः। सोमः, सविता, मित्रः, बृहस्पतिः, ब्रह्मणस्पतिः,सरस्वती,-इति सप्तैता ब्राह्मणानां देवताः। ब्रह्मवीर्य्यप्रदानव्रतैरेतैर्देवैर्यस्यात्मा संस्क्रियते स श्रोत्रियो ब्राह्मणो भवति ।।

अष्ट देवाः

१. इन्द्रः,वरुणः,सोमः,रुद्रः,पर्जन्यः,यमः,मृत्युः, ईशानः--इत्यष्टौ देवत्रा क्षत्राणि। क्षत्रवीर्यप्रदानव्रतैरेतैर्देवैः संस्कृतात्मा क्षत्रियो भवति ।।

२. वसवो, रुद्राः ,आदित्या,विश्वेदेवाः,मरुतः--इत्येतानि यानि देवजातानि गणश आख्यायन्ते तेभ्यो विड्वीर्य्यमाप्यते ।उपलक्षणमेतत्साध्यानामाप्त्यानामृभूणाञ्च ।। तैः संस्कृतात्मा वैश्यो भवति ।।पूषैष शूद्राणां देवता भवति। पशुदेवतायाः पूष्णोऽस्या विशेषेण सर्वत्रोपपत्तेः ।।

३. अग्निः,वायुः,आदित्यः,दिशः,औषधिवनस्पतयः,चन्द्रमाः,मृत्युः,आपः इत्येतेऽष्टौ देहापित्वानो देवा अशनायापिपासासभागिन ऐतरेयोक्ताः ।।

नवदेवाः

१. अग्निः । सोमः ।सूर्य्यः इति त्रयो वसव्या देवाः । मित्रो वरुणोऽर्यमेति त्रयः शर्मण्या देवाः । अपांनपात् आशुः हेमा -- इति त्रयः सपीतयो देवाः। अपांनपादाशु हेमन् य ऊर्मिरिति यजुर्मन्त्रे (तै.सं.१ ।७ ।७) ।।आशुहेमेत्येकं पदमाह सायणः।। वसव्याः शर्मण्याः सपीतयः - इत्येते देवाः प्रवर्षणाः। तेहि वृष्ट्या ईशते ।।

दश देवाः

१. अग्निः सोमः सविता सरस्वती वरुणपूष्णौ त्वष्टा ।।
अथ विष्णुश्च बृहस्पतिरिन्द्रो वरुणस्य संसृपो देवाः ।।१ ।।
तेजो द्युम्नं प्रसवं वाचमथौजः पशूंश्च रूपाणि ।।
यज्ञं ब्रह्म तथेन्द्रियमिति ते देवाः सुवन्ति धर्म्माणि ।।२ ।।
तेनैते सृप्तिसूदेवाः ।। तदुक्तं यजुर्मन्त्रे -

" सवित्रा , प्रसवित्रा, सरस्वत्या वाचा , त्वष्ट्रा रूपैः पूष्णा पशुभिः, इन्द्रेणास्मे , बृहस्पतिना ब्रह्मणा, वरुणेनौजसा, अग्निना तेजसा, सोमेन राज्ञा, विष्णुना दशम्या, देवतया प्रसूतः प्रसर्पामि ।।' य. सं. ।। ता दशैताः संसृपो देवता वारुणतन्त्रानुगता इष्यन्ते ।।

एकादश देवाः

१) 'ये देवासो दिव्येकादशस्थ पृथिव्यामध्येकादशस्थ । अप्सुक्षितो महिनैकादशस्था ते देवासो यज्ञमिमं जुषध्वम्' ऋ. १ ।१३९ ।११ ।।

द्वादश देवाः

१) अग्निः । वायुः । इन्द्रः। सूर्य्यः। बृहस्पतिः। ब्रह्मणस्पतिः। चन्द्रमाः। सोमः। वरुणः। मृत्युः। प्रजापतिः। ब्रह्म। इत्येते द्वादशतिस्तुतयो । देवाः । देवेष्वेषामतिष्ठावत्वात् ।।१ ।।

इति प्रथमः पाठः ।।

भागिनो देवाः

१) आहुति भागाः । स्तोमभागाः । छन्दोभागाः । इत्येवं त्रिविधाः सर्वे देवाः। तत्राहवनीया इष्धिभिः पशुभिः सोमैरिज्यन्ते । स्तोम्याः स्तोत्रैः स्तूयन्ते । छन्दस्याः शस्त्रैः शस्यन्ते ।।

२) अष्टौ वसवः । एकादशरुद्राः । द्वादशादित्याः । प्रजापतिश्च वषट्कारश्च। इति सोमपास्त्रयस्त्रिंशत् ।। एकादश प्रयाजाः ।। एकादशानुयाजाः । एकादशोपयाजाः । इत्यसोमपाः पशुभाजनास्त्रयस्त्रिंशत् ।। स्तोत्रियाण्यहानि त्रयस्त्रिंशत् स्तोम्या देवाः ।। इतरे छन्दस्या उक्थ्याः ।।

स्थानिनो देवाः

१) आम्भसा नाभसा माहसाः -- इत्येवं त्रिविधाः सर्वे देवाः ।। अयं वै लोकोऽम्भांसि। तस्य वसवोऽधिपतयः।अग्निर्ज्योतिः।। अन्तरिक्षं वै नभांसि। तस्य रुद्रा अधिपतयः । वायुर्ज्योतिः । असौ वै लोको महांसि तस्यादित्या अधिपतयः । सूर्यो ज्योतिः । सुवर्गो वै लोको महः ।। तै.ब्रा.३-८-१८।।

२) अग्निः सर्वा देवता आम्भसाः । वायुः सर्वा देवता नाभसाः । सूर्य्यः सर्वा देवता माहसाः ।।देवाः मनुष्यः पितरोऽसुराः - इति चत्वार्य्यम्भांसि। तेषु सर्वेष्वम्भो नभ इव भवति।।

क्रमवास्तव्या देवाः

१) इन्द्रः । यमोराजा । नडो नैषधः । अनश्नन् सांगमनः । असन् पांसवः । इत्येते देवा योऽस्ति तस्मिन् वसन्ति।आहवनीयो गार्हपत्योऽन्वाहार्यपचनः सभ्याग्निः आवसथ्याग्निः - इति हि ता एताः पञ्चदेवताः प्रत्यर्थं वसन्ति। इति नित्यावासा देवाः ।।

२) त्रय एवाद्याः प्रत्यर्थं क्रमेण वसन्तीति लौकिका वास्तुशास्त्रविदः पश्यन्ति।।

यावानो देवाः

१) अग्निः । उषाः । अश्विनौ। यमः । सविता - इति प्रातर्यवाणो देवाः । इन्द्रश्छन्दांसि , ऋभवः, वृषाकपायी - इति सायं यावानः ।। पृश्निमातरो मरुतः शुभं यावानः।। ऋ.सं.१ ।८९ ।७।।

नपातो देवाः

अपां नपात् । तनूनपात् । शवसो नपात् । तेजो नपात् । ऊर्जो नपात् । ऋषीणां नपात् । तै.ब्रा. २ ।६ ।१५ ।।
इति सप्त नपातो देवाः ।।

अर्थपतयो देवाः

१) प्रजापतिः , वाचस्पतिः , बृहस्पतिः,ब्रह्मणस्पतिः- इति ब्रह्मविशेषाः ।।१ ।।(४) गृहपतिः, भूपतिः, भुवनपतिः, भूतानां पतिः । शतिनस्पतिः - इत्यग्निविशेषाः ।।२ ।। (९) सदसस्पतिः, गणपतिः, प्रियपतिः, वास्तोष्पतिः, गवां पतिः, विशांपतिः,- इतीन्द्रविशेषाः । (१५)

२) दिवस्पतिः, देवपतिः, शचीपतिः- इतीन्द्रस्य नामानि ।।४ ।।(१८) धर्म्मस्य पतिः , अपां पतिः , यादसां पतिः - इति वरुणस्य नामानि ।।५ ।। (२१) वास्तोष्पतिः, पशुपतिः,भूतपतिः, क्षेत्रस्य पतिः- इति रुद्रनामानि ।।६ ।। (२५) ब्रह्मणस्पतिः,वनस्पतिः,नक्षत्रपतिः,ओषधिपतिः- इति चन्द्रनामानि ।।७ ।।(२९) गवां पतिः, ज्योतिषां पतिः,त्विषां पतिः,अहर्पतिः- इति सूर्य्यनामानि।८ ।।(३३)सरितां पतिः , अपां पतिः , यादसां पतिः- इति सरस्वतो नामानि ।।९ ।।(३६)

३) सत्यस्य पतिर्मित्रः ।।१० ।।दानपतिरर्य्यमा ।।११ ।।क्षेत्रस्य पतिः पर्जन्यः ।।१२ ।। अध्वनां पतिर्यमः ।।२३।।(४०) अग्निवाय्वादित्याः व्रतपतयो लोकपतयश्च ।।२४ ।। विश्पतिः , विशांपतिः , राजेति ।।२५ ।।

कार्म्मनामिको देवाः

१) सत्यः । वैश्वानरः । जातवेदाः, द्रविणोदाः ।।१ ।। अज एकपात् । अहिर्बुध्न्यः, वायुः,मातरिश्वा, पवमानः, वातः, अथर्वा ।।२ ।। दध्यङ् । दधिकाः, दधिक्रावाः, रोहितः, वाजिनः, वृषाकपिः, मरुत्वान् । शिपिविष्टः, धाता, विधाता, मृत्यः, यमः, मनुः, मन्युः,केशी,विश्वकर्म्मा,विश्वानरः,त्र्यम्बकः,वाचस्पतिः,वास्तोष्पतिः, क्षेत्रस्यपतिः,वनस्पतिः,सरस्वान् ,समुद्रः,कः,तार्क्ष्यः,सुपर्णः,श्येनः,पुरूरवा, आयुः असुनीतिः, वेनः, ऋतः, इंदुः ।। इति कार्म्मनामिका देवाः ।।

इति द्वितीयः पाठः ।।२ ।।

देवताद्वन्द्वानि

१) अश्विनौ । द्यावापृथिव्यौ । अहोरात्रे ।।१ ।। अग्नीषोमौ ।अग्नापूषाणौ ।अग्नाविष्णू । अग्नी पर्जन्यौ ।।२ ।। वातापर्जन्यौ ।।३ ।। इन्द्राग्नी । इन्द्रवायू । इन्द्रापर्वतौ । इन्द्राकुत्सौ ।इन्द्रापूषणौ । इन्द्रविष्णू । इन्द्राबृहस्पती । इन्द्राब्रह्मणस्पती । इन्द्रासोमौ । इन्द्रावरुणौ ।।४ ।। मित्रावरुणौ । विष्णूवरुणौ । बृहस्पतिवरुणौ ।।५ ।।बृहस्पतिसोमौ ।।६ ।। सोमारुद्रौ । सोमापूषणौ ।।७ ।। इत्येतानि देवता द्वन्द्वानि ।

गणदेवता:

१) वसव:, रुद्रा:, आदित्या:, विश्वेदेवा:, मरुत:, साध्या:, आप्त्या:, ऋभव:, वाजिन:, केशिन:, देविका:, देविका:, देवपत्न्य:, देवस्त्रिय:, सप्तर्षय:, भृगव:, अंगिरस:, अथर्वाण:, पितर:, यमा:, नक्षत्राणि, गन्धर्वा:- इत्येते गणदेवा: ।। वसुरुद्रादित्या आरण्यका:

१) अग्निश्च जातवेताश्च सहोजा अजिर: प्रभु: ।
वैश्वानरो नर्य्यमाश्च पंक्तिराधाश्च सप्तम: ।।१ ।।
विसर्प्पे वाष्टमोऽग्नीनामेतेऽष्टौ वसव: क्षितौ ।

२) प्रभ्राजमाना व्यवदाता याश्च वासुकि वैद्युता: ।।२ ।।
रजता: परुषा: श्यामा: कपिला: अतिलोहिता: ।
ऊर्ध्वा अवपतन्त्यश्च रुद्रा एकादश द्यवि ।।३ ।।

३) सविता वरुण: सूर्य्य: पूषा विश्वानरो भग: ।
यमो वृषाकपि: केशी समुद्रोऽप्यज एकपात् ।।४ ।।
विष्णुश्च द्वादशादित्या इति केचित् प्रचक्षते ।
तेऽमी आग्नेयवायव्यजयौतिषप्राणजातय: ।।५ ।।

वसुरुद्रादित्या आध्यात्मिका:

१) अग्निश्च पृथिवी च । वायुश्चान्तरिक्षं च । आदित्यश्च द्यौश्च ।चन्द्रमाश्च नक्षत्राणि च । इत्येतेऽष्टौ वसव: ।। दशेमे पुरुषे प्राणा: । आत्मैकादश: । इत्येकादशरुद्रा: ।। द्वादशरुद्रा: ।। द्वादशमासा: संवत्सरस्य । ते ऽमी द्वादशादित्या: ।। इत्थमध्यात्मम् ।।

वसुरुद्रादित्या अधिदैविका:

१) (१)पृथिवी,जलम् , तेज:, वायु:,आकाश:, चन्द्र:, सूर्य्य:, आत्मा, इत्यष्टौ वसव: । तत्रात्मा मन: ।चन्द्रसूर्य्यौ प्राणौ । आकाशादय: पञ्चवाचो भेद: । आत्मन: स्थाने विद्युतमाह याज्ञवल्क्य: ।।

२) (२) अथ गार्हपत्याग्नि: , आहवनीयाग्नि:, अष्टौ धिष्ण्याग्नय:, नैर्ऋत्याग्निश्चेत्येकादशरुद्रा: ।।

(३) विभु:, वहि:,प्रचेता:,विश्ववेदा:,कवि:,बम्भारि:, दुवस्वान् , शुन्ध्यु: - इत्यष्टौ धिष्ण्याग्नय: ।।

(४) प्रवाहण:, हव्यवाहन:, श्वात्र:, तुथ:, उशिक्,अङ्गारि:, अवस्यु:, शुन्ध्युरित्येतेषामन्यानि नामानि ।।

(५) आग्नीध्रीय:, होत्रीय:, मैत्रावरुण:, ब्राह्मणाच्छंसी, पोत्रोय:, नेष्टीय:, अच्छावाकीय:, मार्जालीय:- इत्यष्टौ धिष्ण्याग्नीनामेषां याज्ञिकानि नामानि ।।

(६) अग्नय एवैतेऽन्तरिक्षभाजना: सन्तो रुद्रा उच्यन्ते । तेषां द्वे तन्वौ घोरा चान्या शिवा चान्या ।।

३) (७) अथ धाता ,अर्य्यमा, मित्र:,वरुण: अंश:,भाग:,पूषा,त्वष्टा, पर्जन्य:, सविता, विवस्वान्, विष्णु:- इत्येते द्वादशादित्या: ।। इत्यधिदैवतम् । (मै.सं १ ।६ ।१२)

वसुरुद्रादित्या पौराणिका:

१) (१) ध्रुवः धर, सोमः, आपः,वायुः,अग्निः,प्रत्यूषः,प्रभासः। इत्यष्टौ वसवः ।।
२) (२) अज एकपात् , अहिर्बुध्न्यः,विरूपाक्षः, त्वष्टा वा अयोनिजो वा गर्भो वेति ।। रैवतो भैरवो वा कपर्द्दी वा वीरभद्रो वेति ।।हरो नकुलीशो वा पिङ्गलो वा स्थाणुर्वेति ।। बहुरूपः सेनानीर्वा गिरिशो वेति ।। त्र्यम्बको भुवनेश्वरो वा विश्वेश्वरो वा सुरेश्वरो वेति ।। सावित्रो भूतेशो वा कपाली वेति ।। जयन्तो वृषाकपिर्वा शम्भुर्वा सन्ध्यो वेति ।। पिनाकी मृगव्याधो वा लुब्धको वा शर्वो वेति ।। अपराजितो महातेजा वा ।। इत्येकादशरुद्राः ।।
३) (३) इन्द्रः , धाता ,भगः, पूषा, मित्रः, वरुणः,अर्य्यमा, अंशुः,विवस्वान् , त्वष्टा, सविता, विष्णुः- इत्येते द्वादशादित्याः ।। ते चामी पुराणोक्ता नाक्षत्रिका देवाः ।।

विश्वेदेवा:

१) विश्वे वै देवा देवानां यशस्वितमाः । (श.१३ ।१ ।२ ।८) ।। ते चैते द्विविधाः । नियतगणाः। अनियतगणाश्चेति । तत्र नियतगणास्त्रयोदशधा वसवः, रुद्राः, आदित्याः, भृगवः, अङ्गिरसः, ऋतवः, अथ सप्तविधा मरुतां गणाश्चेति ।। वसवो रुद्रा आदित्या इत्येते संहता विश्वेदेवा इष्यन्ते । तेऽमी संस्रावभागास्तैत्तिरीयकैरुक्ताः (तै.ब्रा ३ ।३ ।९ ।) । आपो वायुः सोम इत्येते खल्वशरीरा भृगवः । अग्नियमादित्याः सशरीरा अङ्गिरसः । भृगवोऽङ्गिरसश्च विश्वेदेवाः।। ऋतवो वै विश्वेदेवाः(श.७ ।१ ।।) मरुतो विश्वेदेवाः । तत्र ऋतुभिन्ना द्वादश विश्वेदेवा वैश्यानां देवताः प्रतिपत्तव्याः ।।

(२) अथ अनियतगणा विश्वेदेवा अनेकधा श्रूयन्ते । तद्यथा ऋतवः , आपः प्राणः, संवत्सरः, अश्विनौ - इत्येते सयुजो भूता विश्वेदेवाः ।। (शत ८ ।१ ।६ ।७) ।। ते चित्याः ।। इत्येते देवाः सहिता विश्वेदेवाः । ते ऋतव्याः ।।३ ।।

(३) (३)अग्निः सोमो विष्णुः मित्रावरुणौ - इत्येते वा सजुषः सन्तो विश्वेदेवा नाम ।।१ ।। इन्द्राग्नी । मित्रावरुणौ । नासत्यौ । भगपूषणौ । विष्णुः । मारुतः । रुद्रः । गौः । सरस्वती । इत्येते वा सयुजो विश्वेदेवाः ।।२।। इन्द्रानि । मित्रावरूणौ । नासत्यौ । भगपूषणौ । विष्णुः। मारुतः । रुद्रः । गौ : । सरस्वती। इत्येते वा सयुजो विश्वेदेवाः ।।२।।
इन्द्राग्नी । मित्रावरुणौ । भगपूषणौ । विष्णुः । सविता । ब्रह्मणस्पतिः । मरुतः । पर्वतः । श्रापः । द्यावापृथिवी- इत्येते वा सयुजो विश्वेदेवाः ।।३।। अन्येऽप्येवं विजातीयाः कतिचिद्देवाः संवर्गीकरणादेकभाविताः सन्तो विश्वे-देवा उच्यन्ते । तेषां चान्यत्रान्यत्र सृष्टावुपयोगः । तथा च श्रूयते - 'प्रजापतिः प्रजा असृजत ।। ता वैश्वदेवेनैवासृजत । तस्मादिमा वैश्वदेवीः प्रजाः । स्तोका वै विश्वेदेवाः ।।'(मैत्रि.१ ।१० ।६) ।।(४ ।७ ।१) ।। इति ।।तेऽमी सर्व्याः स्तोका वाभिधेयाः । तदित्थं सजातीयानां विजातीयानां वा । देवानामावापोद्वापाभ्यां कृतः संघो विश्वेदेवाः ।।

४) (४) क्रतुर्दक्षौ , वसु:.सत्य:,कालकामौ, धुरिलोचनौ ।। पुरूरवो माद्रवसौ विश्वेदेवा: प्रकीर्तिता: ।।१ ।। इष्टिश्राद्धे क्रतुर्दक्षो वसु: सत्यश्च दैविके । काल: कामोऽग्निकार्येषु काम्येषु धुरिलोचनौ ।।२ ।। पुरूरवो आर्द्रवाश्च पार्वणेषु नियुज्यते। पुरूरवो माद्रवसौ विश्वेदेवा इति स्थिति: ।।३।। दैविकं वृद्धिश्राद्धम् ।। अग्निकार्य्यं सपिण्डीकरणम्। काम्यं काम्यश्राद्धम् । पार्वणं पार्वणश्राद्धम् । इति स्मार्त्ता विश्वेदेवा: ।।

मरुतो देवा:

१) मरुतो ह वै देवविशोऽन्तरिक्षभाजना: । ते चैते मरुतस्त्रिविधा: – ऐन्द्रा:,सौम्या:,वारुणाश्च । तानेतान् क्रमेण नरो नियुत: पारावता इत्याहु: । नर: सुदानव: । नरो वै देवानां ग्राम: । इति ताण्ड्यम् ।६ ।९ ।२ ।। पृश्निमातरो द्युतानामारुता धर्म्मसुव इति नरादीनां नामान्तराणि ।। प्रथमा रोदस्यां द्वितीयास्तृतीयाश्च क्रन्दस्यामुपपद्यन्ते । प्रत्येकं सप्तका: सप्तगणा भवन्ति ।

२) पृथ्वीमारभ्य सूर्य्यपर्यन्तं विततो बाणो यज्ञौपशम् ।। सेन्द्रप्रतिष्ठा ।। तत्रेन्द्रसहचारित्वादैन्द्राणां रुद्रपुत्राणां नृणां नामान्याह भगवान् वसिष्ठो महर्षिर्ऋक्संहितायाम् – ७ ।५६ ।।तुविष्मान् । शुभ्र: ।शुष्म: । क्रुध्मी । धुनि: ।असुर: ।विधर्ता – इति ।। तुविष्मन्तं तविषीयुमाह पुनर्वत्स: काण्व: । अथ प्रतिगणं चैषां सप्तानां नामान्याहतुर्वसिष्ठकाण्वौ ।।

३) १ वातस्वनस: । येष्ठा: । शोभिष्ठा: । संमिश्ला: उग्रा: । इष्मिण: । ऋतसाप:– इति प्रथमा: ।।७ ।५६।। २ बुध्न्या: । प्रयज्यव: । गृहमेधा: । स्वश्व: । प्रक्रीडिन: । दशस्यन्त: । वरिवस्यन्त: – इति द्वितीया: ।।७ ।५६ ।। ३ मध्व: । पिप्रियाणा: । विश्वपिश: ।पिशाना: । उपस्तुता: । आस्तुता: । शतिन: । इति तृतीया: ।।७ ।५७ ।। ४ तुविमन्यव: । धूतय: । प्रधास्या: । तुरा: । भीमास: । अयास: । सस्वार्ता: । इति चतुर्था: ।। ७ ।५८ ।। ५धृष्विराधस: । अस्रेधन्त: । हंसा: ।नीलपृष्ठा: । सान्तपना: । गृहमेधा: । स्वतवस: । इति पञ्चमा: ।।७ ।५७९।। ६ पर्वता: । सिन्धव: । अरुणप्सव: । ऋभुक्षण: । पृश्नय: । सुम्नायन्त: । प्रचेतस: – इति षष्ठा: ।।८ ।७ ।१ ।१७ ।। ७वृक्तबर्हिष: ।अभिद्यव: । हिरण्यवाश्य: । प्रयज्यव: । चित्रवाजा: ।पर्शाना: । अक्षणयावान:– इति सप्तमा: ।।८ ।७ ।२०–३५ ।।

१ तेषामेषां सांतपना: , गृहमेधा: , प्रक्रीडिन:, प्रधास्या:, स्वतवस:,प्रयज्यव:,ऋभुक्षण: – इत्येते प्रसिद्धा: सप्त मरुतो भवन्ति ।। इन्द्रप्रियतमत्वात् ।।

२ इन्द्रो वै मरुत: सांतपना: । इन्द्रो वै मरुत: क्रीडिन: ।। गो. उ. १ ।२३ ।। इत्येवं हि श्रुतयो भवन्ति ।।

४) अथ क्रन्दस्यां पारमेष्ठ्यमण्डले सौम्या औदुम्बरीसहचारिणो मरुतो द्युतानमारुता: स्यु: । समुद्रस्य हृदये वरुण: प्रतितिष्ठति । पृथ्वीमारभ्य वरुणपर्य्यन्तं प्रतायमानो यो बाण: स उदुम्बर: । उदुम्बरपर्वानुगता वायुप्रभेदा द्युतानमारुता: स्यु: । तेषां सप्तगणानां नियुतां नामान्याह । भगवानात्रेय:, श्यावाश्व:; ५ ।५२ । तविषीमान् तविषो

वा । त्वेष रथस्त्वेषो वा । तवसः । खादिहस्तः । धुनिव्रतो धुनिर्वा । मायी । दातिवारः- इति ।। अथ प्रतिगणं चैषां सप्तानां सप्तानां नामान्याह -

(५) १ ऋक्कानः । धृषद्विनः । स्पन्द्राः । नोक्षणः । अर्हन्तः । ऋष्वाऋष्टिविद्युतः । शुन्ध्यवः-इति प्रथमाः ।। (५। ५२। १-९)

२ आपथयः । विपथयः । अन्नस्पथाः । अनुपथाः ।छन्दःस्तुभः । कुभन्यवः । कीरिणः - इति द्वितीयाः ।। (५ ।५२ ।१०)

३ कवयः । वेधसः ।शिक्कसः । अरेपसः । जीरदानवः । ततृदानाः । भोजाः - इति तृतीयाः ।। (५ ५३।१-१६)

४ स्वभानवः । धर्म्मस्तुभः । पृष्ठयज्वानः । द्युम्नश्रवसः । परिज्रयः । अरुषाः । सुवृधः ।। इति चतुर्थाः ।। (५ । ५४ ।१)

५ विद्युन्महसः । अश्मदिद्यवः । वातत्विषः । पर्वतच्युतः । ह्रादनीवृतः । रभसाः । उदोजसः । इति पंचमाः ।। (५ ।५४ ।३)

६ नियुत्वन्तः । ग्रामजितः । कवन्धिनः । मध्वः । सभरसः । ऋतायवः । विचेतसः - इति षष्ठाः ।। (५ ।५४ ।३)

७ प्रयज्यवः । भ्राजदृष्टयः । विरोकिणः । तुविराधसः । उदवाहाः । उपमाः । रभिष्ठाः - इति सप्तमाः (५ ।५५ ।१- ३ ।५ ।५८ ।२-५)

६) अथ क्रन्दस्यामेव पारमेष्ठ्यमण्डले वारुणामरुतो धर्म्मसुवो नाम ।। तेषां नामानि ब्राह्मणेष्वारण्यकेषु कानिचिद्दर्श्यन्ते । (तैत्तिरीयारण्यकेषु)

७) १ ईदृङ् ।अन्यादृङ् । एतादृङ् । प्रतिदृङ् । मितः । संमितः । सभराः- इति प्रथमाः ।।

२ ... ...

३ ... ...

४ धुनिः । ध्वान्तः । ध्वनः । ध्वनयन् । निलिम्पः । विलिम्पः । विक्षिपः-- इति चतुर्थाः ।।

५ ऋतः । सत्यः । ध्रुवः । धरुणः । धर्त्ता ।विधर्त्ता । विधारयः--इति पञ्चमाः ।।(मै.सं २ ।६ ।६)

६ ऋतजित् । सत्यजित् । सेनजित् । सुषेणः । अन्तिमित्रः । दूरेऽमित्रः । गणः-इति षष्ठाः ।।(मै.सं २ ।६ ।६)

७ शुक्रज्योतिः । चित्रज्योतिः । सत्यज्योतिः । ज्योतिष्मान् । सत्यः । ऋतपाः-अत्यंहा ।। इति सप्तमाः ।। (तै.सं १ ।८ ।१३)

८) अथ मरीच्यादयः स्मार्त्ता मरुतः पौराणिकैः स्मर्य्यन्ते ।।

साध्या देवाः

इमे वाव लोका यत् साध्यादेवाः – इति गोपथश्रुतिः ।।२।८।।

साध्या – मान्ता मनः प्राणोऽपानो विश्वोऽथ वीर्य्यवान् नरो नारायणो हंसः प्रभवो निर्भयो नयः १ मन्ताऽनुमन्ता वा ।अपानो नरयानो वा । विश्वो वृषो वा । प्रभवः प्रभुर्वा । इति पौराणिकाः ।।

आप्त्याः देवाः

एकतो द्वितस्त्रित इत्याप्त्याः ।।आप्त्या आत्म्या– इत्येकोर्थः ।। तेऽमी देवानां दिक्काला भवन्ति । तथा च श्रूयते– 'अथैते दैवा आशापालाः– आप्त्याः साध्या अन्वाध्या मरुतः' – (श.१३।२।१६–१५) इति ।।

ऋभवो देवाः

ऋभुः,विभ्वा,वाजः–इति त्रयोऽमी ऋभवः ।। तेषां प्रथमोत्तमाभ्यां बहुवन्निगमा भवन्ति न मध्यमेन ।।

देविकाश्चतस्रः

राका ।अनुमतिः ।सिनीवाली ।कुहूः– इति देविकाः । कलाहीनचंद्रा पूर्णमासी – अनुमतिः । पूर्णचन्द्रा राका । दृष्टचन्द्राऽमावास्या सिनीवाली । नष्टचन्द्रा कुहूः ।। या पूर्वा पौर्णमासी साऽनुमतिः । योत्तरा सा राका ।। या पूर्वाऽमावास्या सा सिनीवाली योत्तरा सा कुहूः ।। चन्द्रमा एव धाता च विधाता च (गोप. १।१०) ।।

यो धाता , स वषट्कारः स सूर्य्यः ।। याऽनुमतिः सा गायत्री सा द्यौः । या राका सा त्रिष्टुप् । सा उषाः ।। या सिनीवाली सा जगती सा गौः ।। या कुहूः साऽनुष्टुप् सा पृथिवी ।। या इम ास्ता अमूः । या अमूस्ता इमाः ।।ऐत. ।।

देवपत्न्यः

१) पृथिव्यग्नेः पत्नी ।वाग् वातस्य ।वागिन्द्रस्येत्येके सेनेन्द्रस्येत्येके । धेना बृहस्पतेः । पथ्या पूष्णः । गायत्री वसूनाम् । त्रिष्टुप् रुद्राणाम् । जगती आदित्यानाम् । अनुष्टुप् मित्रस्य । विराड् वरुणस्य । पंक्तिर्विष्णोः ।दीक्षा सोमस्य ।।इत्येता द्वादश देवपत्न्यः(गोप.२।९५) ।।

२) अग्नायी अग्नेः । इन्द्राणीन्द्रस्य । वरुणानो वरुणस्य । रोदसी रुद्रस्य ।अश्विन्यश्विनोः इत्येवमाद्या देवपत्न्यः(ऋ.सं.४.२.२८।८) ।।

३) इन्द्रस्य सुनीतिः । सोमस्य स्वस्तिः ।वरुणस्य समीची ।यमस्य प्रमृणापः । जातवेदसो भूर्जयन्ती ।। इत्यपि श्रूयते ।।

देवस्त्रियः

अदितिः ।पथ्या स्वस्तिः ।पृथिवी ।सार्पराज्ञी ।सरमा ।यमी ।उर्वशी । जुहूर्ब्रह्मजाया ।श्रद्धा ।रात्रिः ।उषाः । सूर्य्याः ।सरण्यूः । वृषाकपायी । भारती ।इडा । सरस्वती । वाक् । गौरी । गौः । धेनुः । अघ्न्या । अप्वा । निर्ऋतिः । इत्येता देवस्त्रियश्चतुर्विंशतिः ।।२४ ।।

इति तृतीयः पाठः ।।३ ।।

ऋषयः

ऋषिरिति यजुर्मन्त्राणां संज्ञा । यजुरिति प्रचरतो द्विभक्तिकस्य ब्रह्मणः संज्ञा । एकैकस्य यजुषो मन्त्रस्य द्वे भक्ती भवतो यच्च जूश्चेति । गतिप्रकृतिकममृतं ब्रह्म यत् । स प्राणः , स वायुः । स्थितिप्रकृतिकममृतं ब्रह्म जूः । सा वाक् । स आकाशः । बलप्राणः संचरन् वायुरुच्यते ।। सत्या हीयं वागवच्छेदानपेक्षायां अन्योन्यमविनाभूतौ भवतः । तदुभयमेकीभूतह यजुः स ऋषिः । स वाङ्मयः प्राणो वा, आकाशमया वायुर्वा प्रतिपत्तव्यः ।।

ब्रह्मसृष्टं जगत् । ब्रह्मदृष्टं विज्ञानम् । ब्रह्म वा आत्मा ब्राह्मणः । त्रयाणामेषां ब्रह्मणां यत उपक्रमः स ऋषिः । यत्र ध्रुवे ब्रह्मणि प्रथमा प्रवृत्तिक्रिया स ऋषिः । जगत् सृष्टेर्वा विज्ञानदृष्टेर्वा ब्रह्मगोत्रस्य वा यदुपज्ञं प्रवृत्तिः स ऋषिः । गोत्रं वंशपरम्परागिरिः । तथा चायमृषिस्त्रिविधः – सृष्टिप्रवर्त्तकः, वेदप्रवर्त्तकः, गोत्रप्रवर्त्तकश्चेति ।।

तत्र सृष्टिप्रवर्त्तकानां त्रिविधा वर्गा भवन्ति । एकर्षयः,सप्तर्षयो,दशर्षयश्चेति । असङ्गस्वाभाव्यादन्यैरसंसृज्यमानाः केचिदेकर्षयः स्युः । येषां तु सप्त सप्तैव सहकृतास्तिष्ठन्ति न न्यूनाधिकतामायान्ति ते सप्तर्षयः । ते चानेकधा संसृज्यन्ते । तद्यथा – अग्निविधाः, साकंजविधाः, गोविधाः, स्वसृविधाश्च ।। चत्वार आत्मा द्वौ पक्षौ पुच्छमेकमित्येकः क्रमः । सोऽग्निविधः ।।१ ।।– ''साकंजानां सप्तथमाहुरेकजं षडिद्यमा ऋषया देवजा इति । तेषामिष्टानि विहितानि धामशः स्थात्रे रेजन्ते विकृतानि रूपशः'' – ।। इत्यन्यः क्रमः ।। स साकंजविधः ।।२ ।। कालधूमलशोणा हिरण्यपीतहरितनीलानां सूर्य्यरश्मौ संनिवेशवदन्यः क्रमः । स गोविधः ।।३ ।। ''सप्तस्वसारः सुविताय सूर्य्यं वहन्ति हरितो रथे '' । इति छन्दसामिवान्यः क्रमः । स स्वसृविधः ।।४ ।। अथ येषां पुनरेको द्वौ त्रयो बहवो वा समस्ता व्यस्ता यथासंभवमिलिता वा संयुज्यन्ते अपि च – आवापोद्वापाभ्यां रूपान्तरतामापद्यन्ते ते दशर्षयः स्युः । ते वैराजाः – उच्यन्ते ।।

परमेष्ठी विष्णुर्यज्ञः । तमागतऋषिर्विराड् भवति । दशाक्षरा विराट् । वैराजो मनुः । स मनुरेतान् दशर्षीनुद्भावयति ।। – भृग्वङ्गिरसौ ।। अत्रिमरीची । पुलस्त्यपुलहौ । क्रतुदक्षौ ।। वसिष्ठागस्त्यौ चेति ।। शुनकजमदग्नो भुगुभेदौ । अथर्वा दध्यङ् । कण्वः । घोरः । अयास्यः । गौतमः । वामदेवः । भरद्वाजः ।

उचथ्यः । बृहस्पतिः । संवर्तः । इत्येवमादय एकविंशिनोऽङ्गिरसः । अनन्तविद्या वा अङ्गिरसः । तथा च श्रूयते – " विरूपास इद् ऋषयष त इद्गम्भीरवेपसः । ते अङ्गिरसः सूनवस्ते अग्नेः परिजज्ञिरे" ।१०।६२।५। ये अग्नेः परिजज्ञिरे विरूपासो दिवस्परि ।। नवग्वो नु दशग्वो अङ्गरस्तमः स चा देवेषु मंहते (१०।६२।६) इति ।।'

अथ ये ये विद्वांसस्तानेतानृषीनपश्यन् – ते ते विद्वांसोऽपि तत्तद्ब्रह्मनाम्नैव व्यपदिष्टा अभवन् । भृगुः , अङ्गिराः , अत्रिः , वसिष्ठ इत्यादयः । जमदग्निः ,गौतमो , भरद्वाज इत्यादयः ।। ये तावदेते प्राणा ऋषयस्ते मन्त्रास्तानि ब्रह्माणि ते वेदाः । तानि विज्ञानानि । विज्ञानान्येव वेदाः । वेदप्रवर्त्तका एवैते ऋषयो मन्त्रद्रष्टार इत्याहुः ।। स यो ऽयमेकर्षिर्भगवान् प्रजापतिः , ये वा सप्तर्षयो ये दशर्षयो ये वा तद्वंशधरा ब्राह्मणास्ते हीमे वेदप्रवर्त्तका ऋषयः । तत एव हि प्राणानां विज्ञानानि सर्वाणि प्रवृत्तानीति विद्यात् ।।

यै चैते प्रथमा मन्त्रद्रष्टारो ब्राह्मणा बभूवुस्ते नूनं तेन तेन ब्रह्मणैव कृतात्मान आसन् ।। तत्तदात्मानुस्रवादेव च तत्तदपत्यपरम्परायामपि सर्वेषां संतानानामात्मानस्तेन तेनैव ब्रह्मणा कृतरूपा अभवन् ।। एकैकस्य ब्राह्मणस्य ऋषेरात्मनि य ऋषिप्राणस्तस्योत्तरमुत्तरं ब्रह्म संतानेष्वनुस्रवो गोत्रम् । ऋषिभेदाच्च तान्येवैतेषां ब्राह्मणानामिमानि सप्तैव गोत्राणि ।। तदवान्तरभेदाद् बहूनि गोत्राणीति प्रतिपत्तव्यम् ।।

भृग्वङ्गिरसः

वायुरापश्चन्द्रमा इत्येते भृगवः । अग्निरादित्या यम इत्येतेऽङ्गिरसः । विश्वेदेवा ऋक्वानः । पौराणिकानां शुक्रतारागता भृगवः प्राणा द्वादशी – भुवनः ,भावनः,सुजन्यः,सुजनः,ऋतुः,सुवः,स्वसुः, व्यजः, व्यमुनः, प्रसवः, अव्ययः,दक्षः--इति ।। अथ वृहस्पतिताराकताः--अङ्गिरसः प्राणा दश । आत्मा, आयुः, मनः, दक्षः, परप्राणः,हविष्यः,गविष्ठः,ऋतः,सत्यः,तैजस इति भविष्योत्तरे ।। एतेषां च रूपकर्म्मविज्ञानानि कालादिपातान्नोपलभ्यन्ते ।।

अथर्वाणः

भृगवश्चाङ्गिरसश्चाथर्वा चेत्यथर्वाणः । भृग्वङ्गिरोभ्योऽतिरिच्यतेऽथर्वा ।। अथर्वाभ्यस्तु नातिरिच्यन्ते भृग्वङ्गिरसः ।।

पितृकल्पे पितृदेवाः

अग्निः,यमः,सोमः– इत्येते पितृणां वर्गविभाजका देवाः ।। आग्नेयाः, पितरा, याम्याः पितरः, सौम्याः, पितरश्च भिद्यन्ते ।। ऊर्वाः, अवमाः, काव्याः, इत्येताः पितृणां जातयः ।। विश्वेदेवाः, अङ्गीसः, भृगवः, इत्येते पितृणां गणभेदाः ।। बृहस्पतिः,यमः,मातली– इत्येते पितृणां सहचारिणो देवाः ।। मातलीदेवः काव्यैः, यमोऽङ्गिरोभिः, बृहस्पतिर्विश्वेदेवैः, सह संचरतीति तैत्तिरीयसंहितायाम् ।। २।६।१२।।

अमूर्तास्त्रयो दिव्यपितरः

परा मध्यमा अवराश्चेति त्रिविधाः सर्वे पितरो भवन्ति । देवपितरः, ऋतुपितरः, प्रेतपितरः, इत्येवं ते पितरस्त्रेधा विभक्ता नेयाः । परा मध्यमा अवरा - इत्येवं त्रिविधा दिव्यपितरः क्रमेण सोमसदो बर्हिषदोऽग्निष्वात्ता इत्युच्यन्ते । तेषामेषां क्रमेण सोमो यमोऽग्निरित्येते त्रयो देवाः । अत्रिः अङ्गिरा भृगुरित्यमी ऋषयः । पितृमन्तः, अङ्गिरस्वन्तः, कव्यवाह इत्यार्षेयाः । अत्र्यङ्गिरोभृगुभिः संपरिष्वक्तानां सोमयमाग्नीनामेवेदं पितृत्वमुपकल्पते । तथा चात्रेः सोमपितृत्वात् पितृमन्तं सोमं पितृशब्देनाहुः । अथैषां सनातनाः संतानका वा । सोमपथाः सोमपदा वा । वैभ्राजाः विभ्राजमाना वा लोकाः । उत्तरा अन्तरा दक्षिणा चैषां दिशः स्युः । शीताः, शीतोष्णा, उष्णाश्चैषां प्रकृतयः । साध्यानां देवयोनीनां देवानां चैते विशेषतो जनका भवन्ति ॥

साध्याः देवयोनयः देवाः	पराः मध्यमा अवराः	सोमसदः बर्हिषदः अग्नि-ष्वात्ताः	पितृमन्तः अङ्गिरस्वन्तः कव्य-वाहनाः	अत्रयः अङ्गिरसः भृगवः	सोमः यमः अग्निः	सनातनाः सोमपथाः वैभ्राजाः	संतानकाः सोमपदाः विभ्राज मानाः	उत्तरा अन्तराः दक्षिणाः	शीताः शीतोष्णः उष्णाः
प्रजननीया ९	अवकाशः १	नामानि २	आर्षेयाः ३	ऋषयः ४	देवाः ५	लोकाः ६	लोकाः ६	दिशः ८	प्रकृतयः ९

मूर्ताश्चत्वारो दिव्यपितरः

अमूर्तास्त्रयो दिव्यपितरोऽमी आख्याताः । अथ दिव्यपितरश्चत्वारो भवन्ति । सोमपा हविर्भुजः,आज्यपाः,सुकालिनश्चेति । सोमवन्तः, हविष्मन्तः सुस्वधासुकालाः- इत्येतेषामन्यानि नामानि । काव्या वैराजा वा सोमपाः । आङ्गिरसाः पौलहा वा हविर्भुजः । पौलस्त्याः कार्दमा वा आज्यपाः । वासिष्ठाः , सुकालिनः । तेषामेषां चतुर्णां ज्योतिर्भासाः, मारीचाः, तेजस्विनः, मानसाः- इत्येते क्रमेण लोकाः स्युः ॥ ते चैते पितरः क्रमेण ब्राह्मणानामाग्नेयानां क्षत्रियाणामैन्द्राणां वैश्यानां वैश्वदेव्यानां शूद्राणां पौष्णानां जनका भवन्ति ॥

	पितॄणां नामानि	पितॄणां लक्षणानि	पितॄणामृषयो योनयः	पितॄणां लोकाः	पितॄणां प्रजननीयाः
	सोमपाः हविर्भुजः आज्यपाः सुकालिनः	सोमवन्तः हविष्मन्तः सुस्वधा सुकालाः	काव्या वैराजा वा आङ्गिरसःपौलहा वा पौलस्त्याः कार्द्दमा वा वासिष्ठाः	ज्योतिर्भासाः मारीचाः तेजस्विनः मानसाः	ब्राह्मणानामाग्नेयानाम् क्षत्रियाणामैन्द्राणाम् वैश्यानां वैश्वदेव्यानाम् शूद्राणां पौष्णानाम्

अथर्वणामतिरिक्तपितृत्वाभावः

ननु – ' अजीजनो हि वरुणस्वधावन् अथर्वाणं पितरं देवबन्धुम् ' ।।० ।० ।। इत्यथर्वमन्त्रेऽथर्वाणो नामान्ये पितरः श्रूयन्ते – इति चेत्तत्र ब्रूमः – नैतेऽथर्वाणो भृगुभ्योतिरिच्यन्ते । व्यपदेशसामान्याद् जनकसामान्यादयोनिसामान्याच्च ।भृग्वङ्गिरस एवाथर्वाङ्गिरस इत्येवमभेदेन व्यपदिश्यन्ते । भृगुर्वारुणिरथर्वाऽप्ययं वारुणिरित्येकत्वं संभाव्यते । भृगोरेव शरीराच्चतुर्णां वायूनामुत्थाने परिशिष्येण भृगोरथर्वत्वमाथर्वणिका आमनन्ति। तस्माद् भृगव एवैतेऽथर्वाणः सिध्यन्तीति नातिरिक्तोऽर्थः । ननु भृग्वथर्वणोरेकत्वे– 'अङ्गिरसो नः पितरो नवग्वा अथर्वाणो भृगवः सोम्यासः' – इति मन्त्रे भृगूणामथर्वाणं च पृथक्त्वेनोपादानं विरुध्यते । इति चेन्न। भृगुविशेषणतयैवाथर्वाणां तत्रोपात्तत्वात् । अथर्वलक्षणानामेव भृगूणां तत्र विवक्षितत्वात् ।। अथवा सन्तु सर्वविधा भृगवस्तत्र विवक्षिताः । ब्राह्मणवसिष्ठन्यायेन तत्र भृगुविशेषाणामथर्वणां भृगुसामान्यतः पृथक्त्वेनोपादानादविरोधात्। ननु – ''ब्रह्मा देवानां प्रथमः संबभूव विश्वस्य कर्ता भुवनस्य गोप्ता । स ब्रह्मविद्यां सर्वविद्याप्रतिष्ठामथर्वाय ज्येष्ठपुत्राय प्राह'' – इति मन्त्रेऽथर्वणो ब्रह्मपुत्रत्वमाख्यायते । तथा चायं द्विविधोऽथर्वा स्यात् । ब्रह्मपुत्रो वरुणपुत्रश्च। तत्र वारुणे भृगुत्वोपपत्तावपि स ब्रह्मपुत्रोऽन्यः स्यादिति चेन्न । वरुणपुत्रस्य भृगुष्वन्तर्भावाद् ब्रह्मपुत्रस्याङ्गिरस्स्वेवान्तर्भावेणातिरिक्तत्वाभावात् । अथवैक एवायमथर्वा स्यात् । वरुणौरसपुत्रस्यैव ब्रह्ममानसपुत्रत्वेनाभ्युपेतत्वात् । सोऽयं भृगुष्वङ्गिरः सु च पर्य्यायेणान्तर्भाव्यते। तस्मात् सप्तैव ते दिव्यपितरः सिद्धाः ।।

ऋतव्याः पितरः

अथर्तुपितरो वक्तव्याः। ऋतं च सत्यं चेति सोमं चाग्निं चाहुः । अग्नीषोमौ परस्परव्यासक्तौ संवत्सरस्य रूपम् । सोमकाले दक्षिणामनु सूर्य्यश्चरति। उत्तरातश्चायं सोमो दक्षिणामनुयाति । अथाग्निकालेऽयमुत्तरामनु

सूर्य्यश्चरति । दक्षिणतश्चाग्निरुत्तरामनुयाति । अग्निमनु सर्वे देवा: सोमं त्वनु सर्वेऽसुरा: । विरुद्धप्रकृतित्वादहर्निशं ते परस्परतो विस्पर्द्धन्ते । तत्रैते देवा वृत्रं जघ्नु: । तेऽमी विजयिनो देवा: वसन्तग्रीष्मवर्षा: । विजिनांस्तु पितृयज्ञेन पुन: समैरयन्त । तेऽमी शरद्धेमन्तशिशिरा: । त एवामी सोमसदो बर्हिषदो अग्निष्वात्ता: । इह वा यत्रैतयो:- सोमस्याग्नेश्च यजनं वायुना व्याहन्यते । बलवतोर्विरुद्धयोर्विषम: संयोगो भवति स यम: । वैवस्वत: प्राणविशेष यम: । अग्नियमसोमानां संवत्सरकालं भोग: संवत्सर: । फाल्गुनीमारभ्याषाढीं यावच्चातुर्मास्यं वैश्वदेवपर्व तौ च वसन्तग्रीष्मावृत् अग्नि: । तेऽवरा: पितर: ।। आषाढीमारभ्य कार्त्तिकीं यावच्चातुर्म्मास्यं वरुणप्रघा- सपर्व । तौ च वर्षाशरदावृत् यम: । ते मध्यमा: पितर: ।। कार्त्तिकीमारभ्य फाल्गुनीं यावच्चातुर्म्मास्यं साकमेधपर्व । तौ च हेमन्तशिशिरौ – ऋतू सोम: । ते परा: पितर: । तानेतान् चातुर्म्मास्यपर्वणि पित्र्येष्टौ यजन्ते । सोमायोत्तरतं जुहोति । अग्नये दक्षिणत: । अथैतयोरन्ते यमायेति ।। तेऽमी अग्नियमसोमा: षड् ऋतव: पितर: । ऋतुभिरेवैषं अग्नीषोमौ दिवस: स पिता । पूर्वपक्षापरपक्षौ अग्नीषोमौ मास: स पितामह: । उत्तरायणदक्षिणायने अग्नीषोमौ संवत्सर: स प्रपितामह: ।।

प्रेतपितर:

अथ ये तृतीया: पितरस्ते मनुष्यपितर: प्रेता उच्यन्ते । सप्त सपिण्डा: पितर: प्रेता: । ते द्वेधा विभज्यन्ते । पिण्डभाजोऽवरा अश्रुमुखा नाम पिण्डलेपभाजस्तु परा नान्दीमुखा नाम । पिता पितामह: प्रपितामह: । इति त्रय: पिण्डभाज: । तेषु सतां सप्तषट्पञ्चमात्राणां पित्र्याणां सहसामधिकतया पिंडसंभवात् । ते चैते क्रमेण वसुरुद्रादित्यैरग्निभि: सहचारितयाऽग्निलोकस्था स्यु: । वसवोऽवरा: । रुद्रा मध्यमा आदित्या: परा: स्यु: । अथ येऽत ऊर्ध्वं चत्वारस्ते लेपभाजो द्रष्टव्या: । चतुस्त्रिद्व्येकमात्राणां पित्र्याणां सहसामत्यल्पतया तेषु पिण्डरचनाय असंभाव्यमानत्वात् । ते चैते पुनराप्यैर्विश्वैर्देवै: सहचारितया सोमलोकस्था: स्यु: । ' ये वैके चास्माल्लोकात् प्रयन्तिचन्द्रमसमेव ते सर्वे गच्छन्तीति कौषीतकिश्रुतौ श्रूयते ।।'

यस्मिन् वा ऋतौ पुरुष: प्रमीयते सोऽस्यामुष्मिन् लोके भवति यदि वसन्ता प्रमीयते वसन्तो भवति । यदि ग्रीष्मे ग्रीष्म: ।। संवत्सरो वै सोम: पितृमान् । मासा वै पितरो बर्हिषद: । अर्धमासा वै पितरोऽग्निष्वात्ता: ।। (तै.ब्रा.१ ।६ ।८ ।।)

अपि चाहु: संवत्सरो वै सोम: पितृमान् । ये वै यज्वानस्ते पितरो बर्हिषद: । ये वा अयज्वानो गृहमेधिनस्ते पितरोऽग्निष्वात्ता: ।। (तै.ब्रा.१.६.९ ।।)

उपक्षिप्ता: पितर:

कव्यवालोऽनल: सोमो यमश्चैवार्य्यमा तथा ।।
अग्निष्वात्ता बर्हिषद: सोमपा: पितृदेवता: ।।१ ।।

इति वचनादष्टौ पितर इति केचिदाहुस्तदसत् अत्र वचने त्रयाणामेव पितृणामुपदिश्यमानत्वात् । तथा हि – कव्यवाहोऽनल इति वा कव्यवाडनल इति वा वक्तव्ये कव्यवाल इत्येवं तावत् प्रामादिक: पाठ: ।

काव्यवाट्त्वं चाग्नेर्विशेषणं भवति ।। अर्य्यमा चायं न यमादतिरिच्यते । तेषां चाग्नियमसोमानां देवानां सतामिह अग्निष्वात्तादिभिरभेदेन पितृव्यपदेशो विधीयते । तथा चेह त्रय एवैते पितरो वाक्यार्थः ।

अथ नागरखण्डे स्कान्दे रश्मिपाः , उपहूताः , आयन्तु नः, स्वादुषदः इत्यमी चत्वारः पितरोऽतिरिक्ताः स्मर्य्यन्ते ।। ते चामी प्रक्षिप्तपाठोपक्षिप्तत्वादनादेयाः । उपहूतादीनां पितॄणां श्रुतिषु पुराणेषु चान्यत्रानुपलब्धेः ।।

'उपहूताः पितरो ये मघासु ।' तै.ब्रा.२।१।१ ।।

'उपहूताः पितरः सोम्यासो बर्हिष्वेषु निधिषु प्रियेषु ।'

'आयन्तुनः पितरः सोम्यासोऽग्निष्वात्ताः पतिभिर्देवयानैः ।'

इत्येवं मन्त्रश्रुतौ - आहूता आगच्छन्तु - इत्येवमर्थकपदानामर्थानभिज्ञैर्भ्रान्त्या तथोपकल्पितत्वादप्रमाण्यम्।।

अथ विष्णुधर्म्मोत्तरे - सुभास्वराः बर्हिषदः ,अग्निष्वात्ताः, - इत्यमूर्ताः । एवं कव्यादाः उपहूताः आज्यपाः सुकालिनः इति मूर्ताः । इत्थं सप्तगणाः प्रदर्श्यन्ते । तत्र सोमसदः सुभास्वराः । सोमपास्तु कव्यादा इति पर्य्यायवाचितया नेयाः । हविष्मतां तूपहूतत्वं पर्य्यायवाचितयोक्तं भ्रान्तम् ।।

नन्दिपुराणे - अग्निष्वात्ता बर्हिषदः काव्याः सुकालिनो यामाः - इत्येवं बर्हिषदो भेदेन यामा उच्यन्ते तदप्यज्ञानात् ।। बर्हिषदामेव यमानुगत्या यामत्वेन प्रतिपत्तव्यत्वादिति बोध्यम् ।। एवं पुराणान्तरप्रक्षिप्तपाठा अपि यथायथमुपक्षेप्याः ।।

चतुर्दश यमाः

धर्म्मराजो यमो मृत्युः सर्वभूतक्षयोन्तकः । कालो वैवस्वतो ब्रध्नः परमेष्ठी वृकोदरः।। नील औदुम्बरश्चित्रश्चित्रगुप्त इमे यमाः । अग्नौ हि ते हूयमानं सोमं यच्छन्ति वायवः ।।२ ।।

नक्षत्रविद्यायां देवनक्षत्राणि

कृत्तिका ।रोहिणी।मृगशीर्षम् ।आर्द्रा।पुनर्वसू ।पुष्यः ।श्लेषा।मघा ।पूर्वफल्गुन्यौ ।उत्तरफल्गुन्यौ। हस्तः । चित्रा । स्वाती । विशाखा । इत्येतानि चतुर्दशदेवनक्षत्राणि । तत्रापूर्य्यमाणपक्षान्तः पौर्णमासी ।।

यमनक्षत्राणि

अनुराधा ।ज्येष्ठा ।मूलः ।पूर्वे आषाढे ।उत्तरे आषाढे ।अभिजित् ।श्रवणः ।धनिष्ठा ।शतभिषक् ।पूर्वे प्रोष्ठपद ।उत्तरे प्रोष्ठपदे ।रेवती ।अश्विनी ।भरणी ।इत्येतानि चतुर्दश यमनक्षत्राणि ।तत्रापक्षीयमाणपक्षान्तः। साऽमावास्या।। देवनक्षत्राणि दक्षिणेन परीयन्ति, यमनक्षत्राण्युत्तरेण ।। तदित्थमेतान्यष्टाविंशतिर्नक्षत्राणि ।।

पर्य्यायशब्दा:

अम्बा । दुला । नितत्नी । भ्रमयन्ती । मेघयन्ती । वर्षयन्ती । चुपुणीका – इत्येतासां सप्ततारकाणां कृत्तिकेति साधारणं नाम ।।

रोहिण्यो वा रोहिणी वा । मृगशिरा इन्वका इल्वला वा । आद्रा बाहुर्वा । पुष्यस्तिष्यो वा । श्लेषा आश्लेषा वा । स्वाती निष्ट्या वा । ज्येष्ठा रोहिण्या रोहिणी वा । मूला मूलबर्हिणी वा । श्रीणा श्रवणा वा । धनिष्ठा श्रविष्ठा वा । प्रोष्ठपदे भाद्रपदे वा । अश्विनी आश्वयुजी वा ।। भरणी अपभरणी वा – इति केषांचिन्नक्षत्राणां पर्य्यायवाचिन: शब्दा: ।।

नक्षत्रदेवता:

अग्नि: । धाता प्रजापति: । चन्द्रो मरुतो वा । रुद्र: । अदिति: । बृहस्पति: । सर्पा: । पितर: । अर्यमा तैत्तिरीयाणां भगोऽन्येषाम् । भगस्तैत्तिरीयाणामर्य्यमान्येषाम् । सविता । त्वष्टा । कौशिकेन्द्रो वा । वायु: । इन्द्राग्नी । मित्र: । इन्द्रो वरुणो वा । निर्ऋति: प्रजापतिर्वा । आप: । विश्वेदेवा: । ब्रह्मा । विष्णू: । वसव: । वरुण इन्द्रो वा । अज एकपाद् अहिर्बुध्न्यो वा । अहिर्बुध्न्यो अजएकपाद्वा । पूषा । अश्विनौ । यम: । इत्यष्टाविंशतिर्नाक्षत्रिकदैवतानि ।।

नाक्षत्रिकेष्टिसिद्धय:

अन्नादत्वं कृत्तिकायाम् ।१ । प्रियोपावर्तनप्रियसंगमौ रोहिण्याम् ।२ । समानानां राज्यमभिजयतीति मृगशीर्ष्णि ।३ । पशव आद्रायाम् १४ । भूतिप्रजापत्यो: पुनर्वस्वो: प्रजापशुलाभ: ।५ । पुष्ये ब्रह्मवर्चसलाभ:।८ । फाल्गुनीनां पूर्वयो: पशव उत्तरयो: श्रैष्ठ्यम् ।१० । हस्ते श्रद्धेयत्वसवितृत्वे ।११ । चित्रायां चित्रप्रजालाभ: ।१२ । स्वात्यां कामचाराभिजय: ।१३ । विशाखयो: समानेषु श्रैष्ठ्याभिजय: ।१४ । अनुराधायां मित्रधेयाभिजय: ।१५ । ज्येष्ठायां ज्यैष्ठ्याभिजय: ।१६ । मूले प्रजा ।१७ । आषाढानां पूर्वयो: समुद्रकामाभिजय: । उत्तरयोरनपजय्यजिति: ।१९ । अभिजिति ब्रह्मलोकाभिजय: । धनिष्ठायां समानमग्रं पर्य्येति ।२२ । शतभिषज्यशैथिल्यदृढत्वे ।२३ । प्रोष्ठपदानां पूर्वयोर्ब्रह्मवर्चसतेज: । उत्तरयो: प्रतिष्ठालाभ: । २५ । पशुलाभो रेवत्याम् ।२६ । अश्विन्यामवाधिर्य्यदीर्घश्रुत्वे ।२७। भरण्यां समानानां राज्यमभिजयति ।२८ ।।

स्थिरचतु:स्वस्तिकानि

एषां नक्षत्राणां चत्वारि नक्षत्राणि नवत्यंशान्तरितानि चतु:स्वस्तिकान्याख्यायन्ते । चित्रारेवत्यौ श्रवणापुष्यौ चेति । तथा च मन्त्र: श्रूयते – 'स्वस्ति न इन्द्रो वृद्धश्रवा: स्वस्ति न: पूषा विश्ववेदा: । स्वस्ति नस्ताक्ष्यों अरिष्टनेमि: स्वस्ति नो बृहस्पतिर्दधातु' इति । वृद्धश्रवा इति चित्रास्थं बृहत्कर्णं कौशिकपक्ष्याकृतिमिन्द्रमाह । तेनेतरा दिविष्ठा इन्द्रतारीं व्यावर्त्यन्ते । विश्वेदेवा इति ज्योतिश्चक्रप्राथम्यं रेवत्या आह । पूष्णो हि तारामारभ्य विश्वं ज्योतिश्चक्रं विदन्तीति स विश्ववेदा उक्त: । अनेन सूर्य्यपृथ्वीपशूनां पूष्णां

व्यावृत्तिः ।। अथ त्रयाणामृक्षाणां समाहारस्तृक्षम् । तृचशब्दवदिह यलोपश्छान्दसः । तृक्षे क्लृप्तः सुपर्णस्ताक्ष्यः। स हि श्रवणापतिविष्णुरथः । स च पक्षी अरिष्टाख्यस्य ग्रहसंचारप्रदेशस्याष्टचत्वारिंशव्याप्तिकस्य प्रान्तेऽस्तीत्यरिष्टनेमिरुच्यते । अथाद्यत्वे लुब्धकबन्धुनाम्ना प्रसिद्धा पुनर्वसुपुष्यगता तारा बृहस्पतिर्नामोपपद्यते । स च पारमेष्ठ्यमण्डलस्थात् सूर्य्यमण्डलस्थाच्च बृहस्पतेरतिरिच्यते । तैरेतैश्चतुर्भिः स्वस्तिकैः सर्वमिदं व्योममण्डलं चतुर्धा विभज्यते व्यवहारार्थम् ।।

पथ्यास्वस्तिः

"एष वा अपरिपरः पन्था अरक्षस्यो येनासा आदित्य एति ।" इति मैत्रिश्रुतिबोधिते (४।८।५)।। यस्मिन् पथि सूर्य्यः परिक्रममाणे दृश्यते सोऽयमस्याः परिभ्रमन्त्याः पृथिव्याः पन्था भवति । तत्र चत्वारश्चरस्वस्तिका उपपद्यन्ते । तस्मिन् पथि यत्र यत्र विषुवसंगरो भवति तत्र तत्रायं सूर्य्यः पृथिव्या उपरिष्टादभिक्रमते वा अधस्तादपक्रमते वा ।। उत्तरगोलं दक्षिणगोलं वा गतो भवति । ते द्वे विषुवदहनो उच्येते । तयोश्चायं सूर्य्यो यत उत्तरगोलमायाति तद्दिवाकीर्त्यं नामाहः । अथ यत्रायं सूर्य्योऽतितमामुत्तरां गतो भवति दक्षिणां वा तत्रायं विषुवतश्चतुर्विंशतिदेशीयांशान्तरितो भवति । स यतः स्वमयनं परिवर्तयते उत्तरं वा दक्षिणं वा ते द्वे स्वस्ती भवतः। ता वैताश्चतस्रः पथ्याः स्वस्तयः । तत्र दिवाकीर्त्यं यजति, पथ्यां स्वस्ति वा देवयजनीयां यजति ।। वाग्वै पथ्या स्वस्तिर्बृहती नाम । सूर्य्यो हि बृहतीमध्यूढस्तपति ।। तामेतां वाचमेव तद्यजति ।।

अदितिः

पुनर्वसुपुष्ययोरन्तरतो या तारकाद्यत्वे लुब्धकबन्धुनाम्ना प्रसिद्धा दृश्यते तमाङ्गिरसं बृहस्पतिं प्राहुः। स एष देवानीकप्रमुखस्थो देवानां पुरोहितोऽभिज्ञायते। अङ्गिरसो हि ते सर्वे देवाः । ततः षड्भान्तरे तारकात्रयक्लृप्तस्ताक्ष्योऽरिष्टनेमिर्नामैको विष्णुरथः सुपर्णो नाक्षत्रिको देवः प्रकल्प्यते तत्पृष्ठस्था लुब्धकबन्धुसमज्योतिष्का या तारका विद्योतते स परमेष्ठी हंसो वा विष्णुरिति विद्यात् । तत्संघस्थो वा कश्चिदन्यः परमेष्ठी स्यात् ।। तद्वक्षसि भृगुपादमयः श्रीवत्सो विज्ञायते । विष्णुसंघस्थो हि स भृगुरुशना कविरसुराणां पुरोहितोऽसुरानीकप्रमुखस्थः प्रतिपत्तव्यः । भृगवो हि ते सर्वेऽसुराः । तथा चैताभ्यां भृग्वङ्गिरोभ्यामुशनोबृहस्पतिभ्यां व्योम्नो द्वे अर्द्धे लक्ष्येते – दैवं चासुरं चेति । अस्ति हि तदाङ्गिरसं दैवमण्डलं यस्य नाभौ बृहस्पतिरङ्गिराः प्रतपति। तदुपलक्षितो दैवमण्डलनभ्यो बिन्दुरदितिः तदनुबद्धाः प्राणा आदित्याः ।। अस्ति च तद्भार्गवमासुरं मण्डलं यस्य नाभौ कविरुशना भृगुः प्रतपति ।। उशना वै काव्योऽसुराणां पुरोहित आसीत् । तां. ७।५।२० ।। तदुपलक्षितश्चासुरमण्डलनभ्यो बिन्दुर्दितिः। तदनुबद्धाः प्राणा दैत्याः ।। ते हैते दित्यदिती अविचालिन्यौ नित्ये भवतः । तन्नियामकयोः कविबृहस्पत्योरविचालित्वात् ।। यावता च तयोरुभयोर्मण्डलयोरन्योन्याभिनिवेशस्तन्मध्ये समुद्रमण्डलशायी भगवान् परमेष्ठी विष्णुः प्रतपति । अन्तः समुद्रं चैकतो भृगुर्वारुणिर्दैत्याभिधानानसुरप्राणान् प्रचारयन्नभिशेते । अथान्यतो बृहस्पतिरादित्याभिधानात् देवप्राणान् प्रचारयन् प्रतपति । बृहस्पतिर्वै देवानामुदगायत्।।तां. ६।७।१।१ ।। तस्यैतस्य देवमण्डलस्याङ्गिरसस्य

हस्तनक्षत्रगतेन सवित्रा प्रारम्भो विज्ञायते। रेवती नक्षत्रस्थेन पूष्णाश्विभ्यां चाश्विनीनक्षत्रस्थाभ्यां तदवसानं लक्ष्यते । तथा च श्रूयते - " देवस्य त्वा सवितुः प्रसवेऽश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्याम् । आददे नार्य्यसीति ।।" ।।० ।।० ।।० ।। रेवत्यादिहस्तान्तनक्षत्रान्तराले पुनर्वसुनक्षत्रं दैवमण्डलस्यैतस्य नाभिर्भवति तत्र योऽयं दैवमण्डलमध्यबिन्दुस्तामदितिं समाचक्षते । न च तत्र काचित्तारा संप्रति लक्ष्यते । तेनैतां मारुतीं सतीं नारीत्याचक्षते ।। मरुद्विशेषस्य हि नर इत्येषा संज्ञा ।। नरो वै देवानां ग्राम इति ताण्ड्यम् ।।६ ।९ ।२ ।। देवानां ग्रामे हीयमदितिरस्तीति नारीत्याख्यायते ।। तत उभयतो नवत्यंशान्तरितं मण्डलमादित्यं भवति ।। तत् क्षेत्रज्ञाः प्राणा आदित्या नाम देवाः स्युः । ते चैतस्य मण्डलस्य द्वादशमासैर्विभक्तत्वाद् द्वादशेष्यन्ते । मण्डलार्द्धे वेते रेवत्यादि हस्तान्ते सप्तादित्या उपपद्यन्ते मध्यमश्चायं मार्त्तण्डो विवस्वानष्टमः संभवति। तथा च श्रूयते - "अष्टौ पुत्रासो अदितेर्ये जातास्तन्वं परि। देवाँ उपप्रैत् श्रूयन्ते - मित्रावरुणौ धात्रर्य्यम्णौ अंशभगौ इन्द्रविवस्वन्तौ चेति" ।। तत्रायं मार्तण्डः सूर्य्यबिम्बः। परमेष्ठिनं परितश्चङ्क्रममाणोऽयं सूर्यः संप्रत्यस्मिन्नदितिमण्डलगर्भे प्रतपतीति स आदित्य उच्यते । यत्रार्द्धे सूर्य्यस्तत्रैव दिवा । तत्रैवायं संवत्सरो नामाग्निः । अथान्यार्द्धे रात्रिः । सोऽपां समुद्रोऽर्णवः तत्र सोमः । अग्नौ च सोमाहुतिर्यज्ञः। स चास्यामदित्यामेवाधिक्रियते। अदित्या देवयजनस्थानोपपादकत्वात् । द्यावापृथिव्यौ सान्तरिक्षे चेदं देवयजनं स्थानं भवति । श्रूयते च -

"अदितिर्द्यौरदितिरन्तरिक्षमदितिर्माता स पिता स पुत्रः ।
विश्वेदेवा अदितिः पञ्चजना अदितिर्जातमदितिर्जनित्वम् ।।" इति ।।

तथा चायं यज्ञोऽदित्युपलक्षितेऽस्मिन्नादित्यमण्डले विधीयमानः स्वर्गाय संपद्यते न त्वासुरमण्डले । गोपथश्रुतौ यज्ञस्योर्द्धवगामित्वश्रवणादासुरमण्डले त्वङ्गिरसोऽप्रसिद्धयोर्द्धवगमनासंभवात् । तेनैतामदितिं यजति ।। अत्रेयं मैत्रिश्रुतिर्भवति "अक्लृप्तं वा इदमासीत् - दिशो वा इमा न प्राजानन् । ते देवा अदितिमुखेनेमा दिशः प्राजानन् अदितिं वा एतदनुप्रयन्ति - अदितिमनूद्यन्ति । ततो वा इमा दिशः प्राजानन् । पथ्यां यजति - इमामेव तेन दिशः प्राजानन् यदग्निम् । इमां तेन यत् सोमम् । इमां तेन यत् सवितारम् । इमां तेन यददितिम् । इयं वा अदितिः । ऊर्ध्वा वा अस्या दिक् । ऊर्ध्वामेव तेन दिशं प्रजानन् । ततो वा अकल्पत। (।।३ ।७ ।१ ।।)

गन्धर्वाः

गन्धर्वा द्विविधाः - दिव्या मर्त्याश्च । तत्र दिव्याः सप्तैकेषाम्। एकादशान्येषाम् । सप्तविंशतिरन्येषाम्।। सुवाङ्, नभ्राट्, अङ्गारिः, बम्भारिः, अस्तः, अहस्तः, कृशानुः इति सोमक्रयणा मैत्रायणसंहितायाम् । (१। २। ५ ।।)। सुवर्चा, अभ्राज्ञः, अङ्गारिः, बम्भारिः, हस्तः, सुहस्तः, स्वाश्विः, मूर्धन्वान, विश्वावसुः. कृधुः, कृशानुः इत्येकादशगन्धर्वाः पौराणिकानाम् ।। "वातो वा त्वा मनो वा त्वा गन्धर्वाः सप्तविंशतिः तेऽग्रे अश्वमयुञ्जन्" ।। ९ ।७ ।। इति यजुःसंहितायाम् ।। गन्धर्वा वारुणा ज्ञेयाः स्वर्ग्यज्ञानप्रकाशकाः। सूर्य्याश्ववाहकाः सोमरक्षका रुक्चिकित्सकाः ।।१ ।। एते नक्षत्रचक्राणामपि सन्ति प्रवर्तकाः। देवा विजित्य गन्धर्वान् पृथिव्यां सोममाहरन् ।।२।। अथ मर्त्यगन्धर्वा द्विविधाः - प्रतिष्ठिता अप्रतिष्ठिताश्च । तत्र प्रतिष्ठिताः सभ्याः ते

द्विविधाः – मौनेयाः प्राधेयाश्च। भीमसेनः,उग्रसेनः,सुपर्ण :, वरुणः, गोपतिः, धृतराष्ट्रः, सूर्य्यवर्चा, अर्कपर्णः, पर्जन्यः, कलिः, प्रयुतः, भीमः,चित्ररथः, सर्वविद्, वशी, शालिशिराः, नारदः– इति मौनेयाः ।। १७ ।। सिद्धः, पूर्णः,बर्ही,पूर्णायुः, ब्रह्मचारी,रतिगुणः, सुपर्णः, विश्वावसुः, भानुः, चन्द्रः – इति प्राधेयाः (म.भा.१ ।६५) अथ नर्त्तनगायनादिवृत्तयोऽसभ्याः – अप्रतिष्ठिताः । हाहाः, हूहूः, चित्ररथः, हंसः, विश्वावसुः, गोमायुः, तुम्बुरुः, नन्दी– इत्यष्टौ तेषामप्रतिष्ठितानां मर्त्यगन्धर्वाणां कुलशाखा भवन्ति स्म ।।

गणदेवानां व्रतपतयो देवाः

वसवः, आप्रियो, घोरा, घोरतनवो, मनोताः,छन्दांसि, ऋतवः,पशवः, इत्यग्नेः ।। रुद्रा वायोः ।। मरुत, आप्त्या, ऋभवः– इतीन्द्रस्य ।। आदित्याः सूर्य्यस्य ।। विश्वेदेवाः, साध्याः,आप्त्याः – इति बृहस्पतेः ।। पितरो वीर्य्याणीति ब्रह्मणस्पतेः ।। नक्षत्राणि, गन्धर्वाः – इति चन्द्रमसः ।। ऋतवां, रुद्रा, विश्वेदेवाः, साध्याः, आप्त्या. ओषधयो, दिशः – इति सोमस्य ।। आदित्या, आपो, असुराः – इति वरुणस्य ।। पन्थानो मृत्योर्यमस्य। भृगवोङ्गिरस ऋक्कानो यज्ञप्रजापतेः ।। ऋषयो ब्रह्मणः ।। इत्येते देवानां महिमानो गणदेवाः ।। तेषामेषां गणदेवानामिमे देवा व्रतपतयो भवन्ति ।।

देवमहिमानः

ऋषभस्य गावः । वृष्णो वाजिनः । वायोर्ब्रह्म । इन्द्रस्येन्द्रियाणि । सोमस्यौषधयः । सूर्य्यस्य नक्षत्राणि । चन्द्रमसो मासः । वातस्य प्राणाः – महिमानो भवन्ति । श्रूयते हि –

''गोभिष्ट्वा पात्वृषभो वृषा त्वा पातु वाजिभिः ।।
वायुष्ट्वा ब्रह्मणा पात्विन्द्रस्त्वा पात्विन्द्रियैः''।।१९।४।१।।

''सोमस्त्वा पात्वोषधीभिर्नक्षत्रैः पातु सूर्य्यः ।।
माद्भ्यस्त्वा चन्द्रो वृत्रहा वातः प्राणेन रक्षतु''।।१९।४।२।।

इति चतुर्थः पाठः ।।४।।

प्रजापतेस्तनवः

'यावान् वै प्रजापतिरूर्ध्वस्तावांस्तिर्य्यङ् । यावन्त इमे लोकाः ऊर्ध्वास्तावन्तस्तिर्य्यञ्चः' इति ताण्ड्यम् १८।६।। (१) अन्नादाचान्नापत्नी चेति द्वे । भद्रा च कल्याणी चेति द्वे। अनिलपा चापभया चेति द्वे । अनाप्या चानाप्या चेति द्वे। अनाधृष्या चाप्रतिधृष्या चेति द्वे। अपूर्वा चाभ्रातृव्या चेति द्वे। इत्येता द्वादश प्रजापतेस्तन्वो भवन्ति। ताश्च क्रमेणाग्न्यादित्यौ सोमपशू वायुमृत्यू पृथ्वीदिवौ अग्न्यादित्यौ मनःसंवत्सरौ चेति भावयेत् । एष कृत्स्नः प्रजापतिः ।। ''एषा वै प्रजापतिः पशुष्ठा तनूर्यच्छिपिविष्टः।'' (तां० १८।६) यज्ञो वै विष्णुः शिपिविष्टः । (तां० ९।८।३)

अग्नेस्तनवः । तत्राग्नेरष्टदैवत्या तनूः

(२) अग्नेर्वा एताः सर्वास्तन्वो यदेता अष्टौ देवताः – वायुः । इन्द्रवायू । मित्रावरुणौ । मित्रः । अश्विनौ । विश्वेदेवाः । इन्द्रः । सरस्वतीति । स यदग्निः प्रवानिव दहति – तदस्य वायव्यं रूपम् ।।१।। यद्द्वैधमिव कृत्वा दहति तदैन्द्रवायवं रूपम् ।।२।। यदुच्च हृष्यति नि च हृष्यति तदस्य मैत्रावरुणं रूपम् ।।३।। यदग्निर्घोरसंस्पर्शस्तदस्य वारुणं रूपम् । तं यद्घोरसंस्पर्शं सन्तं मित्रकृत्येवोपासते तदस्य मैत्रं रूपम् ।।४।। यदेनं द्वाभ्यां बाहुभ्यां द्वाभ्यामरणीभ्यां मन्थन्ति तदस्याश्विनं रूपम् ।।५।। यदुच्चैर्घोषस्तनयन् बबबा कुर्वन्निव दहति यस्माद्भूतानि विजन्ते तदस्यैन्द्रं रूपम् ।।६।। यदेनमेकं सन्तं बहुधा विहरन्ति तदस्य वैश्वदेवं रूपम् ।।७।। यत् स्फूर्जयन् वाचमिव वदन् दहति तदस्य सारस्वतं रूपम् ।।८।।तदित्थमष्टदैवत्यं रूपमेकोऽग्निः ।।

अग्नेर्घोरास्तनवो येऽमी रुद्रा उग्राः देवाः

(३) रुद्रो वा एष यदग्निः । तस्य द्वे तन्वौ घोराऽन्या च । शिवान्या च । पवमानः पावकः शुचिः – इत्येते त्रयो घोराग्नयः । प्राणो वै पवमानः । अन्नं पावकम् वीर्य्यं शुचि । पवमानः पृथिव्याम् पावकोऽन्तरिक्षे । शुचिर्दिवि इत्याहुर्वाजिनः ।। अप्सु पवमानः । वायौ पावकः ।। आदित्ये शुचिरिति कौषीतकीयाः देवा अग्नौ वामं वसु संन्यदधत । तदग्निस्त्रेधा विन्यदधात् । पशुषु तृतीयमप्सु तृतीयमादित्ये तृतीयम् । पशवो वा अग्निः पवमानः । आपो वा अग्निः पावकः असौ वा आदित्योऽग्निः शुचिः । तनुवो वा वैता अग्न्याधेयस्येति तैत्तिरीयाः। (।।तै०ब्रा०१।१।६।।)

अग्नेः शिवास्तनवो येऽमी शिवाः शान्ता देवाः

(४) गार्हपत्याग्निः । धिष्ण्याग्निः । आहवनीयाग्निः – इत्येते त्रयः शिवाग्नयः।। विराट् च स्वराट् च सम्राट् च । अभिभूश्च विभूश्च परिभूश्च । प्रभ्वी च प्रभूतिश्च ।। एता वा अग्नेयष्टौ शिवास्तनवः । इति तैत्तिरीयाः । (तै ० ब्रा ०१ । १ । ७।।)

अग्नेरौपसदिकास्तनवः

(५) अयःशया रजःशया हरिशया रुद्रिया – इत्यग्नेस्तनवः । ताः क्रमेणायस्मयी रजता हरिणीति विद्यात् (शत०३।३।५।२३) रुद्रिया वैद्युताग्नियुक्ताः – इति सायणः। (तै० ब्रा २। ७।१२)

अग्निरूपाणि – आवतारिकाणि

संवत्सरः, वैश्वानरः,कुमारः, चित्रः, पशुः इत्यमी पञ्चाग्नेरवताराः ।। तत्र संवत्सरोऽमृताग्निः ।। प्राणापानव्यानाग्नित्रययोगादुत्पन्नो मर्त्याग्निर्वैश्वानरः । औषस्यां संवत्सरादुत्पन्नोऽग्निः कुमारः । कुमार एवायमष्टधा परिणममानश्चित्राग्निः । वसव इत्याख्याता अष्टौ भेदाः संहत्यैकश्चित्राग्निरुच्यते । अष्टौ ते चित्राग्नयः परस्परयोगेन रूपान्तरतामागत्य पञ्चपशवो भवन्ति ।। पुरुषः ,अश्वः,गौः अविः,अजः – इति । एतान्येव पञ्चाग्नेः सर्वाणि रूपाणि ।। तथाहि –

बार्हतोऽग्निः प्राणः संवत्सरः । राथान्तरोऽग्निपरपानः संवत्सरः । ऋतुभिः षड्भिर्भर्विभक्तो व्यानाग्निरान्तरिक्ष्यः संवत्सरः । संवत्सराग्नित्रययोगजन्मा त्रैलोक्यव्यापी प्रत्येकशरीरव्यापी चाग्निर्वैश्वानरः । पार्थिवान्तरिक्षाभ्यां वैश्वानराभ्यां कुमारो जायते ।। मृज्जलतेजोवाय्वाकाशसोमसूर्य्यात्मभेदभिन्नेष्वमीष्वर्थजातेषु यः खल्वभिन्न एकविधोऽग्निरनुस्यूतः स कुमारः । यस्यैतानि ध्रुवधर्त्रधरुणानि कर्म्माणि स कुमारः ।। मृज्जालादिरूपैर्विपरिणता अष्टरूपा मूर्तामूर्त्ताः सर्वेऽर्थाश्चित्राग्निः ।अथैतेषामेवाष्टानां संघातजन्मानि तद्वैकारिकरूपाणि त्वङ्मांसमेदोऽस्थिमज्जाख्यानि पञ्च पशवः ससंज्ञाः ।। त्वग्वल्कलकिंशारुदारुसारादयः पशवोऽन्तःसंज्ञाः ।। सूतगन्धकाभ्रकाश्महिरण्यादयोऽसंज्ञाः पशवः । तेषामेषां पशूनां पञ्चैव जातयो भवन्ति ।। पुरुषाश्वगवाव्यजाः ।। तानन्यत्र व्याख्यास्यामः ।।

अग्निरूपाणि कार्म्मिकाणि

त्रयो वा अग्नयो – हव्यवाहनो देवानां, कव्यवाहनः पितॄणां, सहरक्षा असुराणाम् ।।(तै०सं०१ ।९ ।५) रक्षा क्षारो भस्म । तत्सहितोऽग्निः सहरक्षाः ।। सूर्य्यरश्मिषु पृथिव्या अग्निर्हव्यवाहनः । चन्द्रिकायां पृथिव्यग्निः कव्यवाहनः । तमसि पृथिव्यग्निः सहरक्षाः ।।

अग्निरूपाणि सांस्कारिकाणि

अग्निस्त्रिविधः ।। त्रेताग्निः । गृह्याग्निः । लौकिकाग्निश्चेति । त्रेता, वैतानः, वैतानिकः, आरण्यः, संस्कृतः, वैधः, वैदिकः, श्रौतः- इत्येकार्थाः ।। गार्हपत्यः आहवनीयो दक्षिणाग्निरित्येवं वा, गार्हपत्यः आहवनीयो धिष्ण्याग्निरित्येवं वा सहकृताग्नित्रित्वं त्रेता । दारुग्रहणकालो दायग्रहणकालो वाग्निर्गृह्यः । गृह्याग्निः, आवसथ्याग्निः, शालाग्निः,औपासनाग्निः, स्मार्त्ताग्निरित्येकार्थाः ।। आभ्यामन्यः सर्वोऽप्यग्निर्लौकिकः ।। येनाग्निना पाकशालायामन्नं पचन्ति, अन्यानि वा लौकिकानि कर्म्माणि कुर्वन्ति स लौकिकोऽग्निः ।।

अग्निबन्धवः

अग्नेर्बन्धवोऽग्निभेदाद्भिद्यन्ते । स्थित्युपपादका धर्म्मा बन्धवः । अग्निः ,शिक्यं, प्रतिष्ठा, आसञ्जनम्, इत्यग्निबन्धवः ।।

(१) इमौ लोकौ अग्निः । दिशः शिक्यम् । आपः प्रतिष्ठा । आदित्य आसञ्जनम् ।।१ ।।

(२) संवत्सर एषोऽग्निः । ऋतवः शिक्यम् । अहोरात्रे प्रतिष्ठा । चन्द्रमा आसञ्जनम् ।।२ ।।

(३) आत्मैवाग्निः । प्राणाः शिक्यम् । मनः प्रतिष्ठा । अन्नमासञ्जनम् ।।३ ।।

अग्निजा धर्म्माः

भूर्भुवःस्वर्बलं त्वोजो ब्रह्मक्षत्रं यशो महत् ।।
यच्च सत्यं तपो नामरूपं यदमृतं परम् ।।१ ।।
चक्षूः श्रोत्रं मनश्चायुर्यच्च विश्वं यशो महः ।।
सामं तपो हरो भाश्च भवन्त्यग्निवशादिति ।।२ ।।
जातवेदाः पावको वा रूपाण्येतानि भावयेत् ।।
वैश्वानरो वैद्युतो वा शमूर्जं पुष्टिमर्पति ।।३ ।।
तैत्तिरीयब्राह्मणस्य तृतीयदशमस्य हि ।।
पञ्चमे श्रूयते चैतदग्निधर्म्मानुवर्तनम् ।।४ ।।

अथाग्निविशेषाः । तत्र आप्रियो मैत्रेयादीनाम्

बर्हिः, दुरः , उषासानक्ता, जोष्ट्री, ऊर्जाहुती, दैव्याहोतारा । तिस्रोदेवीः, तनूनपात्, नराशंसः, वनस्पतिः त्वष्टा वाजिनः–इत्याप्रियो द्वादशदेवा एकेषाम्। तत्र प्रयाजेषु बर्हिरोषधयः। अनुयाजेषु फलम्।। दुर उपस्थम् ।। उषासानक्ता व्युष्टिर्निम्रुक्तिः । जोष्ट्रीं जातं जनिष्यमाणं च । ऊर्जाहुती यदत्ति च पिबति च । दैव्याहोतारा इमे । तिस्रा देवीवाक् छन्दः । तनूनपादप्रसृतो यज्ञः । नराशंसः प्रसृतो यज्ञः । तनूनपातं प्रयाजेष्वेव ।। अप्रसृतो हि तर्हि यज्ञः। नराशंसमनुयाजेष्वेव । प्रसृतो हि तर्हि यज्ञः । वनस्पतिः, सोमः, सौमीः , प्रजाः , त्वष्टा रूपविकर्ता । वाजिनः पशवश्छन्दांसि ।। इति मैत्रायणी श्रुतिः ।।१ ।१० ।९ ।१० ।।

आप्रिय ऐतरेयादीनाम्

समिधः, तनूनपात्, नराशंसः,इडः,बर्हिः, द्वारः, उषासानक्ता, दैव्याहोतारा, तिस्रो देवीः, त्वष्टा, वनस्पतिः, स्वाहाकृतयः– इत्याप्रियो द्वादशदेवा ऐतरेयतैत्तिरीयादीनाम् ।। तत्र प्राणा वै समिधः । प्राणस्तनूनपात् । प्रजा वै नरो वाक्शंसः । अन्नं वा इलः । पशवो वै बर्हिः । वृष्टिर्वै दुरः । अहोरात्रे वा उषासानक्ता । प्राणापानौ दैव्याहोतारा । प्राणाऽपानो व्यानस्तिस्रो देव्यः । वाग् वै त्वष्टा । प्राणा वनस्पतिः । प्रतिष्ठा स्वाहाकृतयः – इत्यैतरेयश्रुतिर्व्याचष्टे ।।

आप्रियो नैरुक्तादीनाम्

अन्यथाप्याहुरन्ये । तथा हि । इध्मः समिधा । तनूनपादाज्यम् । नराशंसो यज्ञः । इडोऽन्नम् । ईड ईड्य इति दीर्घादिरेकेषां यास्कस्य च निरुक्तकृतः । बर्हिर्दर्भाः । द्वारो गृहद्वारम् । उषासनक्ता अहोरात्रे । दैव्याहोतारा प्रथममध्यमाग्नी । तिस्रो देवीर्भारतीडा सरस्वत्यो वाचो लोकत्रयसंभक्ताः । त्वष्टा माध्यमिको देवविशेषः । वनस्पतिर्यूपः । स्वाहाकारस्तच्छब्दप्रयोगः । इति कात्थक्यादयो नैरुक्ता मन्यन्ते । अथवा समिदादि यज्ञसामग्र्युपलक्षिता अग्निविशेषा एवाप्रियो देवा इति शाकपूण्यादयः प्राहुः । वासिष्ठमात्रेयं बाध्र्यश्वं गार्त्समदमिति

नराशंसवन्ति ।।मैधातिथं, दैर्घतमसं प्रैषिकमित्युभयवन्ति । आगस्त्यं जामदग्न्यं वैश्वामित्रं काश्यपासितीयामिति तनूनपात्वन्ति ।।

प्रयाजानुयाजा:

यज्ञे प्रमुखतो यजनीया आप्रियः प्रयाजाः । पृष्ठतो यजनीया आप्रियोऽनुयाजाः।। तनूनपात्वत्यो निर्नराशंसा आप्रिय एकादश प्रयाजाः । नराशंसवत्यो निस्तनूनपात आप्रिय एकादशानुयाजा: ।।

ये प्रयाजा येऽनुयाजास्त आग्नेया इति स्थितिः ।।
आत्मा प्राणाश्च पशवश्छन्दांसि च तथर्तवः ।।१ ।।

ते चैते यज्ञविशेषे न्यूनाधिका इज्यन्ते । यथा हविर्यज्ञे – समित् , तनूनपात् ,इट् ,बर्हिः, स्वाहा – इत्येते वसन्तादयः पञ्चर्तवः प्रयाजाः । ते च प्राणाः रेतः प्रजाभूमा वशीकार इति विद्यात् ।। अथ बर्हिः, नराशंसः, अग्निरित्येतानि जगतीत्रिष्टुब् गायत्रीछन्दांसि । ते त्रयोऽनुयाजाः ।। एवमन्यत्रान्यत्र द्रष्टव्याः ।।

(१५) सावित्राग्निः षड्दैवतः

प्राणो बलं, तत्र तपस्तत्सत्यं स परोरजाः ।।
सत्ये परोरजस्यस्मिन् सावित्राग्निः प्रतिष्ठितः ।।१ ।।
दय्यां म्यातिर्ऋषिः प्लक्षोऽत्यंहायारुणये पुरा ।।
इत्थं प्रोवाच सावित्रप्रतिष्ठां तैत्तिरीयके ।।२ ।।(३ ।१० ।९)
गोत्रेण गौतमो देवभागः श्रौतर्ष इत्यृषिः ।।
अहीना चर्षिराश्वत्थ्यः साधुसावित्रमग्रहीत् ।।३ ।।
संवत्सर ऋतुर्मासोऽर्धमासोऽहानि रात्रयः ।।
मुहूर्ताश्च मुहूर्तांशा अग्निः सावित्र इष्यते ।।४ ।।
एतानि नामधेयानि ब्रह्मणश्च प्रजापतेः ।।
बृहस्पतीन्द्रवाय्वग्निदेवानामग्निमानिनाम् ।।५ ।।

(१६) चैत्रादयो मासाः साधिमासाः

(१) अरुणः ।अरुणरजाः । पुण्डरीकः ।विश्वजित् ।अभिजित् । आर्द्रः । पिन्वमानः । अन्नवान् । रसवान् । इरावान् । सर्वौषधः । संभरः । महस्वान् । इति चैत्रादिमासानामधिकमासस्य च नामानि ।।

(१७) चैत्रादि शुक्लपक्षाः

(२) पवित्रं । पवयिष्यन् । पूतः । मेध्यः । यशः । यशस्वान् । आयुः । अमृतः । जीवः । जीविष्यन् । स्वर्गः । लोकः । इति चैत्रादिमासानां शुक्लपक्षाणां नामानि ।।

(१८) चैत्रादि कृष्णपक्षाः

(३)सहस्वान् । सहीयान् ।ओजस्वान् ।सहमानः । जयन् ।अभिजयन् । सुद्रविणः । द्रविणोदाः । आदद्रपवित्रः । हरिकेशः । मोदः । प्रमोदः- इति चैत्राद्यपरपक्षनामानि ।। योऽयं सावित्राग्निः सत्ये प्रतितिष्ठति । एष ह्येव ते मासाः । एषोऽर्द्धमासाः ।।

(१९)शुक्लपक्षस्याहानि

(४) संज्ञानं । विज्ञानं ।प्रज्ञानं ।जानत् ।अभिजानत् ।संकल्पमानं । प्रकल्पमानम् ।उपकल्पमानम् । उपक्लृप्तम् । क्लृप्तं ।श्रेयः ।वसीयः ।आयत् ।संभूतं । भूतम् – इति शुक्लपक्षगतानां प्रतिपदादिपौर्णमास्यन्तानामां नामानि ।।

(२०) कृष्णपक्षस्याहानि

(५) प्रस्तुतं ।विष्टुतं ।संस्तुतं । कल्याणं । विश्वरूपं । शुक्रम् । अमृतम् ।तेजस्वि । तेजः । समिद्धम् । अरुणम् । भानुमत् । मरीचिमत् । अभितपत् । तपस्वत् । इति कृष्णपक्षगतानां प्रतिपदाद्यमावास्यांतानामह्नां नामानि ।।

(२१)शुक्लपक्षस्य रात्रयः

(६) दर्शा । दृष्टा । दर्शता । विश्वरूपा । सुदर्शना । आप्यामाना । प्यायमाना । प्याया । सुनृते । इरा । आपूर्य्यमाणा । पूर्य्यमाणा । पूरयन्ती । पूर्णा ।पौर्णमासी । इत्येतानि शुक्लपक्षस्य पञ्चदशानां रात्रीणां नामानि ।।

(२२) कृष्णपक्षस्य रात्रयः

(७) सुता । सुन्वती । प्रसुता । सूयमाना । अभिषूयमाणा । पीती । प्रपा ।संपा । तृप्तिः । तर्पयन्ती । कान्ता । काम्या । कामजाता । आयुष्मती । कामदुघा । इत्येतानि कृष्णपक्षस्य पञ्चदशानां रात्रीणां नामानि ।। योऽयं सावित्राग्निः सत्ये प्रतितिष्ठति । एष ह्येव तान्यहानि । एष रात्रयः ।।१ ।।

(२३) शुक्लपक्षे अह्नो मुहूर्ताः

(८) चित्रः । केतुः । प्रभान् । आभान् । संभान् । ज्योतिष्मान् । तेजस्वान् । आतपन् । तपन् । अभितपन् । रोचनः। रोचमानः । शोभनः । शोभमानः ।कल्याणः । इति शुक्लपक्षे एकैकस्मिन्नहनि प्रातःसायान्तर्वर्तिमुहूर्तानां नामानि ।।

(२४) कृष्णपक्षे अह्नोमुहूर्ताः

(९) सविता । प्रसविता ।दीप्तो । दीपयन् । दीप्यमानः । ज्वलन् । ज्वलिता । तपन्वि । तपन् । संतपन् । रोचनः । रोचमानः । सुम्भूः । शुम्भमानः । वामः । इति कृष्णपक्षे प्रत्यहमुदयास्तमयान्तर्गतमुहूर्तानां नामानि ।।

(२५) शुक्लपक्षे रात्र्या मुहूर्ताः

(१०) दाता। प्रदात। आनन्दः । मोदः । प्रमोदः । आवेशयन् । निवेशयन् । संवेशनः । संशान्तः । शान्तः। आभवन् । प्रभवन् । संभवन् । संभूतः । भूतः। इति शुक्लपक्षे रात्र्या मुहूर्तानां नामानि ।।

(२६) कृष्णपक्षे रात्र्या मुहूर्ताः

(११) अभिशास्ता। अनुमन्ता। आनन्दः ।मोदः ।प्रमोदः ।आसादयन् ।निषादयन्। संसादनः। संसन्नः। सन्नः। आभूः। विभूः। प्रभूः। शंभूः। भुवः ।इति कृष्णपक्षरात्रौ मुहूर्तानां नामानि ।। योऽयं सावित्राग्निः। एष तेऽह्नोमुहूर्ताः एष रात्रेः ।।

(२७) प्रतिमुहूर्तं मुहूर्ताः

(१२) इदानीम् । तदानीम् । एतर्हि। क्षिप्रम् । अजिरम् । आशुः। निमेषः। फणः। द्रवन् । अतिद्रवन् । त्वरन्। त्वरमाणः। आशुः। आशीयान्। जवः–इति मुहूर्तावयवा इष्यन्ते। योऽयं सावित्राग्निः एष ह्येव ते मुहूर्तानां मुहूर्ताः। एष ह्येव ते यज्ञ ऋतवः। एष ऋतवः। एष संवत्सरः। इति विद्यात् ।। अग्नि वाय्विन्द्र बृहस्पति प्रजापति ब्रह्मणां वै देवानामेतानि नामधेयानि। स वा एषोऽग्निरपक्षपुच्छो वायुरेव । तस्याग्निर्मुखम्। असावादित्यः शिरः। स यदेते देवते अन्तरेण तत्सर्वं सीव्यति तस्मात् सावित्रः ।।

(२८) नाचिकेताग्निः

(१) नचिकेता नामोद्दालकस्य ऋषेः पुत्र आसीत् । तेन दृष्टोग्निर्नाचिकेतः ।।

(२) उरवो ह वै नामैते लोका येऽवरेणादित्यम् । अथ हैते वरीयांसो लोका ये परेणादित्यम्। अन्तवन्तं ह वा एष क्षय्यं लोकं जयति योऽवरेणादित्यम् । अथ हैषाऽनन्तमपारमक्षय्यं लोकं जयति यः परेणादित्यम्। अनन्तं ह वा अपारमक्षय्यं लोकं जयति योऽग्निं नाचिकेतं चिनुते य उ चैनमेवेदं वेद (तै०ब्रा० ३।११।७)।।

(३) संवत्सरो वा अग्निर्नाचिकेतः। तस्य वसन्तः शिरः ग्रीष्मो दक्षिणः पक्षः ।वर्षाः पुच्छम्। शरदुत्तरःपक्षःहेमन्तो मध्यमः। एष वाव सोऽग्निरग्निमयः पुनर्नवः(तै०ब्रा०३।११।१०) ।।

(४) अयं वाव यः पवते सोऽग्निर्नाचिकेतः। स यत् प्राङ् पवते तदस्य शिरः। यद्दक्षिणा स दक्षिणःपक्षः। यत् प्रत्यक् तत्पुच्छम्। यदुदक् स उत्तरःपक्षः। अथ यत्संवाति तदस्य समञ्चनं च प्रसारणं च। अथो संपदेवास्य सा ।। हिरण्यं वा अग्नेर्नाचिकेतस्यायतनं प्रतिष्ठा ।। हिरण्यं वा अग्नेर्नाचिकेतस्य शरीरम् ।।

(५) त्रेधा ह्ययमग्निर्नाचिकेतःप्रतिपद्यते। योऽर्वाचीनः सप्तदशाद् – यश्च पराचीनः पञ्चविंशात् ।। तावन्तरेण च मध्यमोऽन्य इति ।। तेनायं त्रिणाचिकेतो नाम व्याख्यातः ।।

(२९)वायुप्रभेदाः

(१) पुरस्ताद्वातःप्राणः। दक्षिणतो वातो मातरिश्वा। पश्चाद्वातः पवमानः। उत्तरतो वातः सविता।। इति तैत्तिरीयाणाम् ।।(तै०ब्रा२।९।)।।

(२) अथ भृगुरेष प्राङेजमानो वायुः।दक्षिणामेजमानो मातरिश्वा।प्रतीचीमेजमानः पवमानः।उदीचीमेजमानो वातः।।

(३) इत्थमुत्क्रान्तेष्वेतेषु सत्सु अथार्वग् योऽवशिष्यते वायौ भृगोर्भागोऽवष्टब्धः सोऽथर्वा नाम इति गोपथीयानाम्(१।१)।।

(३०) ब्रह्मणःपरिमरः

(१) ऐतरेयो महिदासःप्राह- अयं वै ब्रह्म योऽयं पवते। तमेताः पञ्चदेवताः परिम्रियन्ते-विद्युद्, वृष्टि :, चन्द्रमाः, आदित्यः, अग्निरिति।।

(२) विद्युद्वै विद्युत्य वृष्टिमनुप्रविशति । वृष्टिर्वै वृष्ट्वा चन्द्रमसमनुप्रविशति। चन्द्रमा वा अमावास्यायामादित्यमनुप्रविशति। आदित्यो वा अस्तं यन्नग्निमनुप्रविशति। अग्निर्वा उद्वान् वायुमनुप्रविशति। यो योऽनुप्रविशति सोऽन्तर्धीयते तं न निर्जानन्ति।।

ता वा एता देवता अत एव पुनर्जायन्ते। वायोरग्निर्जायते। प्राणाद्धि बलान्मथ्यमानोऽधिजायते। अग्नेर्वा आदित्यो जायते। आदित्याद्वा चन्द्रमा जायते। चन्द्रमसो वै वृष्टिर्जायते। वृष्टेर्वै विद्युज्जायते। स एष ब्रह्मणः परिमरः। स एष प्राणे वायौ सर्वेषां संवर्गः। तमेतं ब्रह्मणः परिमरं मैत्रेयः कौषारवः सुत्वने कैरिशये भार्गायणाय राज्ञे प्रोवाच।।

(संवर्गः) सयुग्वा रैक्को जानश्रुतये पौत्रायणाय प्राह - वायुर्वाव संवर्गः। यदा वा अग्निरुद्वायति वायुमेवाप्येति। सुर्य्योऽस्तमेति वायुमेवाप्येति। चन्द्रोऽस्तमेति वायुमेवाप्येति। यदाऽप उच्छुष्यन्ति वायुमेवापियन्ति। वायुर्ह्येवैतान् सर्वान् संवृङ्क्ते।। इत्यधिदैवतम्। अथाध्यात्मम्। प्राणो वाव संवर्गः। स यदा स्वपिति प्राणमेव वागप्येति, प्राणं चक्षुः, प्राणं श्रोत्रम्, प्राणं मनः।। प्राणो ह्येवैतान् सर्वान् संवृङ्क्ते इति।।

इति पञ्चमः पाठः।।५।।

(१) साहस्रविद्या

प्रजापतिर्वा एतत् सहस्रमसृजत। तद्देवेभ्यः प्रयच्छदिति ताण्ड्यम्। ८। १। ०।। प्रजापतिरेवेदं सर्वं यदिदं किञ्चन दृश्यते। अर्द्धं वै प्रजापतेरात्मनो मर्त्यमासीद्--अर्द्धममृतम्। इति च वाजिश्रुतिः। तस्यैकस्य प्रजापतेरेतौ द्वौ भागौ द्वावग्नी उच्येते। चित्यो मर्त्यः पशुरग्निः। चितेनिधेयममृतं ब्रह्माग्निः। स इत्थं द्विविधः क्षरोऽग्निराख्यातः। तत्रायमेष चित्यःप्रजापतिर्य्यमेतमेकैकं कश्चन पिण्डं कायं पतिपश्यामः। उभयं हैतदग्रे

प्रजापतिरास मर्त्यं चैवामृतं च । तस्य प्राणा एवामृता आसुः । शरीरं मर्त्यम् । इति श्रुतेः । श० १० । १ । ४ । १ ।। स एष पश्वग्निरमृतेन ब्रह्माग्निना प्राणेन नित्यमविनाभूतः संसृष्ट एव रूपं धत्ते । त्रयीं तु विद्यां ब्रह्मेत्याचक्षते । मनः प्राणसगर्भा हीयममृता वाक् त्रयी विद्या धते । सा प्रतिष्ठा । ब्रह्मण्यस्यां प्रतिष्ठायां प्रतिष्ठितो हि स पशुरग्निः परितस्तममृताग्नि स्वां प्रतिष्ठामात्मना धत्ते । सोऽयममृताऽग्निः पुनरितरथा त्रयी विद्या भवति साहस्रं नाम । वेदा लोका वषट्कार इति हि त्रीणि सहस्राणि साहस्रम् । ऋग्यजुःसामानीति त्रयो वेदा अथर्वा चेत्येकं सहस्रम् । पृथिव्यन्तरिक्षं द्यौरिति त्रयो लोकाः- आपश्चेत्येकं सहस्रम् । त्रिवृत्पञ्चदशकविंशास्त्रयः स्तोमाः त्रिणवत्रयस्त्रिंशौ चेत्येकं सहस्रम् ।। एतानि हि त्रीणि सहस्राणि सयुञ्ज्येकं साहस्रम् ।। तदिदं पशुरयमग्निः साहस्रमपुष्यत् । तेनैते वेदा लोका वषट्कारश्चाग्नि भक्तयो भाव्याः । इन्द्रविष्णू सयुजौ चैतत् सहस्रत्रितयं प्रवर्तयतः ।। -''इन्द्रश्च विष्णू यदपस्पृधेथां त्रेधा सहस्रं वि तदैरयेथाम्-'' इतिमन्त्रश्रुतेः । ''किं तत् सहस्रमिति । इमे लोकाः, इमे वेदाः; अथो वागिति ब्रूयात् -'' इति चैतरेयश्रुतिर्भवति । अत्र वागिति मनः प्रणसगर्भाया वाचः षट्कारमहर्गणं प्राह । वौक् षट्कारस्यैव च वषट्कारशब्देनाभिधानात् । लोकानां वेदानामप्येषां वाकृत्वमिदं नापोद्यते तथाप्येषां पृथक्त्वाभिधित्सया ब्राह्मणवसिष्ठन्यायेन पृथगुक्तिः ।।

(२) प्रजापतिरसप्रबर्हणम्

प्रजापतेर्लोकाः । लोकेभ्यो देवाः । देवेभ्यो वेदाः । वेदेभ्यः शुक्राणि ।१ । पृथिव्या अग्निः । अग्नेऋर्चः । ऋग्भ्यो भूः ।२ । अन्तरिक्षाद्वायुः । वायोर्यजूंषि । यजुर्भ्यो भुवः ।३ । दिव आदित्यः । आदित्यात् सामानि । सामभ्यः स्वरिति छन्दोग्योश्रुतिः ।।४ ।।

(३) चतुष्पाद्ब्रह्मणश्चतुष्कलाः पादाः

लोका दिशः देवाः प्राणा इति चतुष्पाद्धीदं ब्रह्म । तस्यैते चतुःकलाः पादाः । प्राचो प्रतीची दक्षिणोदीचीति चतुष्कलो दिक् पादः प्राकाशवान्नाम । १ । पृथिव्यन्तरिक्ष द्यौः समुद्र इति चतुष्कलो लोकः पादोऽनन्तवान्नाम ।२। अग्निः सूर्य्यश्चन्द्रो विद्युत् - इति चतुष्कलो देवतापादो ज्योतिष्मान्नाम । ३ । प्राणश्चक्षुः श्रोत्रं मन इति चतुःकलः प्राणः पदि आयतनवान्नाम । ४ । इति ।।

(४) पञ्चाध्यात्मिकप्राणाः

अध्यात्मं पञ्चानां प्राणानां प्राणो ज्येष्टः ।। वाग् वसिष्ठः । चक्षुः प्रतिष्ठा । श्रोत्रं सपत् । मन आयतनम् । एषु वागाद्युत्क्रमणे मूका अन्धा बधिरा बाला जीवन्ति ।। प्रणोत्क्रमणे तु सर्वे प्राणा उत्क्रामन्ति तस्मात् प्राणा एवैतेषां श्रेष्ठः । प्राणा एवायं वसिष्ठः प्रतिष्ठासंपदायतनम् । तस्मादिमे सर्वे वागादयः प्राणा उच्यन्ते इति भाव्यम् ।। अद्भ्यः प्राणः । स ओपामयः प्राणः । तमेता आपः पुरस्ताच्चोपरिष्टाच्च ।।

(५) चातु:प्राश्यं ब्रह्मौदनम्

चतुर्लोकं चतुर्देवं चतुर्वेदं चतुर्होत्रमिति चातु:प्राश्यं ब्रह्मौदनमाहु: । पृथिव्यन्तरिक्षं द्यौराप इति चत्वारो लोका: ।। अग्निर्वायुरादित्यश्चन्द्र मा:-इति चत्वारो देवा: ।। ऋग्वेदो यजुर्वेद: सामवेदो ब्रह्मवेद:-इति चत्वारो वेदा: ।। हौत्रमाध्वर्य्यवमौद्गात्रं ब्रह्मत्वमिति चतस्रो होत्रा: ।। १ ।।

(६) परमा विराट्

अर्द्धं मर्त्यम्-अर्द्धममृतम्-इत्येवं द्वेधा विभक्तोऽयमग्नि: प्रजापतिरात्मा । प्रजा पशुर्वित्तमित्यात्मबन्धव: । बन्धुभि: सहितोऽयमात्मा विराडित्याख्यायते । तत्रैते देवाश्च गणदेवाश्च लोकाश्च वेदाश्चेति चतुर्विधा: प्रजा: स्यु: । ऋतव:, छन्दांसि, दिश:, स्तोमा इति चतुर्विधा: पशव: । इन्द्रियाणि तु वीर्य्याणि । तान्यन्तर्वित्तानि । होत्रका यज्ञा: । तानि बहिर्वित्तानि । स दशभिरेतैर्बन्धुभि: कृतरूपो विराडात्मा । तत्रैते बन्धव: प्रत्येकं चतुर्धा व्याक्रियन्ते-भर्ग:, मह:, यश:, सर्वम्-इति ।।

(१) अग्नि:, वायु:, आदित्य:, चन्द्रमा:-इति चत्वारो देवा: ।।

(२) वसव:, रुद्रा:, आदित्या:, विश्वेदेवा:-इति चत्वारो गणदेवा: ।।

(३) पृथिवी, अन्तरिक्षं, द्यौराप:-इति चत्वारो लोका: ।।

(४) ऋग्वेद:, यजुर्वेद:, सामवेद:, ब्रह्मवेद:-इति चत्वारो वेदा: ।।

(५) वसन्त:, ग्रीष्म:, वर्षा, शरद्-इति चत्वार ऋतव: ।।

(६) गायत्री, त्रिष्टुब्, जगती, अनुष्टुब्-इति चत्वारि छन्दांसि ।।

(७) प्राची, प्रतीची, उदोचो, दक्षिणा-इति चतस्रो दिश: ।।+

(८) त्रिवृत्, पञ्चदश:, सप्तदश:, एकविंश:-इति चत्वार: स्तोमा: ।।

(९) वाक्, प्राण:, चक्षु:, मन: -इतीन्द्रियाणि ।।

(१०) होता, अध्वर्यु:, उद्गाता, ब्रह्मा-इति चतस्रो होत्रका: ।।

स वा एष दशधा चतु: संपद्यते । भर्ग:, मह:, यश:, सर्वम्-इति ।। सैषा चत्वारिंशिनी परमा विराट्-इति गोपथश्रुतिर्भवति ।। ब्रह्म क्षत्रं विड्बलम्-इति चत्वारि वीर्य्याणि गायत्र्यादिभिश्चतुर्भिश्छन्दोभिरवरुध्यन्ते-इति दिक् ।।

देव भक्तय:(१)

अयं लोक:, प्रात: सवनम् । वसन्त ऋतु: । गायत्री छन्द: । त्रिवृत्सोम: । रथन्तरं साम । अग्नायी पृथिवी इलेति स्त्रीदेवा: ।वसवो गणदेवा: । इन्द्र: सोमो वरुण:, पर्जन्य: ऋतव इति संस्तविका देवा: । हविर्वहनं देवतानामावाहनं दार्ष्टिविषयिकं चेति कर्म्माणि ।। इतीमान्यग्निभक्तीनि ।।१ ।।

अन्तरिक्षलोको माध्यन्दिनं सवनम् । ग्रीष्म ऋतुः । त्रिष्टुप् छन्दः। पञ्चदशः स्तोमः । बृहत्साम। मध्यस्थानाः स्त्रीदेवाः। रुद्राश्च मरुतश्च गणदेवाः । अग्निः सोमो वरुणः, पूषा बृहस्पतिः ब्रह्मणस्पतिः, पर्वतः कुत्सः विष्णुः वायुरिति संस्तविका देवाः । रसानुप्रदानं, वृत्रवधः, बलप्रयोगश्चेति कर्म्माणि ।। इत्येतानीन्द्रभक्तीनि।।२ ।।

असौ लोकः, तृतीयसवनम् । वर्षा ऋतुः । जगतीच्छन्दः । सप्तदशस्तोमः । वैरूपंसाम । उत्तमस्थानाः स्त्रीदेवाः । आदित्या गणदेवाः । चन्द्रमा, वायुः, संवत्सरः – इति संस्तविका देवाः । रसादानं, रश्मिभिश्च रसाधारणं, सर्वं च प्रवह्लितमिति कर्म्माणि ।। इत्यमून्यादित्यभक्तीनि ।। एतेष्वेव स्थानव्यूहेषु ऋतुच्छन्दः स्तोमपृष्ठानां भक्तिशेषमनुकल्पयीत । अनुष्टुप् शरत्, एकविंशः स्तोमः, वैराजं सामेति पृथिव्यायतनानि । हेमन्तः पङ्क्तिः, त्रिणवः, स्तोमः, शाक्वरं, सामेति अन्तरिक्षायतनानि ।। शिशिरः, अतिछन्दाः, त्रयस्त्रिंशस्तोमः । रैवतं सामेति द्युभक्तीनि । इत्याह यास्को निरुक्तकारः ।। अनुपपन्नं तु तन्मान्यामहे । बन्धुसंपद्विरोधात् ।।

वयं तु पश्यामः । अग्निः, इन्द्रः, सूर्य्यः, वरुणः, चन्द्रमाः – इति पञ्चैते देवाः सन्तीति पञ्चैव ता भक्तयः संभवन्ति ।। तत्र पृथिवी, अन्तरिक्षं, आपः, दिश– इति लोकाः ।।१ ।।

वसन्तग्रीष्मवर्षा इव शरद्धेमन्तशिशिरा अप्येते त्रय ऋतवस्त्रिस्थाना एव स्युः । न चतुर्थे लोके ऋतवः कल्पयाः । यदि वा तत्रोत्तरास्त्रयश्चतुर्थलोकस्थाः स्युः ।।२ ।।

गायत्रीत्रिष्टुबूजगत्यश्छन्दांसि देवत्रयभक्तीनि ।। अनुष्टुप् प्राजापत्या ।। उष्णिहस्तु गायत्र्योपसंग्रहः ।। बृहत्या अनुष्टुभि पङ्क्त्या विराजश्चानुष्टुभ्येवोपसंग्रहः ।।३ ।।
अथवा सर्वाणि च्छन्दांसि स्वस्वदेवता सलोकानि । ताश्च देवताः श्रूयन्ते –

अग्नेर्गायत्र्यभवत् सयुग्वोष्णिहया सविता संबभूव ।

अनुष्टुभा सोम उक्थैर्महस्वान् बृहस्पतेर्बृहती वाचमावत् ।।ऋ० १० ।१३० ।४ ।।

विराण् मित्रावरुणायोरभिश्रीरिन्द्रस्य त्रिष्टुबिह भगो अह्नः ।

विश्वान् देवान् जगत्या विवेश तेन चाक्लृप्र ऋषयो मनुष्याः ।।ऋ० १० ।१३० ।४ ।।

इति । त्रिवृत्पञ्चदशैकविंशत्रिणवत्रयस्त्रिंशाः पञ्चस्तोमाः पञ्चभक्तयो नेयाः ।। सप्तदशस्तु स्तोमो ध्यस्थः प्रजापतिभक्तिः पृथक्षुपपद्यते ।।४ ।। अथ रथन्तरं वैरूपं शाक्वरमिति त्रीणि द्युभक्तीनि ।। वामदेव्यमान्तरीक्ष्यं राजनं चान्द्रम् । वारवन्तीयं श्रायणीयं यज्ञायज्ञीयमित्यादीनि सामानि अग्न्यादिभक्तीन्यपि भिन्नप्रस्थानानि ज्ञेयानि ।।

प्राणविद्या (२)

प्राण एवेदं सर्वमेकं ब्रह्म ।।१ ।। असत् प्राणः । प्राजापत्यप्राणः । वायव्य प्राणः । ऐन्द्रप्राणः। वैराजप्राणः।चित्यप्राणः । अपित्विप्राणः ।। इत्येवं प्राणाः सप्तधा विभज्यन्तें ।।२ ।।

असदिति मृत्योः संज्ञा । बलं प्राणः क्रियेति मृत्यास्तिस्त्रोऽवस्था भवन्ति ।। सुप्तावस्थः स्वरूपसन्मात्रो मृत्युर्बलं ।। कार्य्यावस्थः कूर्वद्रूपः प्राणः । उत्सादावस्थो रसतः पृथग् भवन् मृत्युः क्रियाः । सर्वेऽप्यर्नैं प्राणा अस्यैवासतः प्राणस्य प्रभेदाः स्युः ।।३ ।।

ऋग्यजुःसामानीति त्रयी विद्या ब्रह्म । सेयममृता सत्या वाक् । स प्रजापतिः । सोऽग्निः । स एवैते स्पृत् योऽग्नयस्त्रयः प्राणाः प्राजापत्याः ।।४ ।।

अथ प्राणापानव्यानास्त्रयः प्राणा वायव्याः ।। अपानः पृथ्वीप्राणः । व्यानोऽन्तरिक्षप्राणः । प्राणो दिव्यः स्पृत् प्राणः ।। प्राणापानसमानोदानव्याना इति वा पञ्चवायव्याः प्राणाः । यः प्राणः स उदानो विपर्य्यस्तः ।।५ ।।

अथोमनोवाक्प्राणचक्षुःश्रोत्राणीति पञ्चामी ऐन्द्राः प्राणाः । मनश्चन्द्रमाः सोमः। वागग्निः पार्थिवः । प्राणो वायुरान्तरिक्ष्याग्निः। चक्षुरादित्य इन्द्रो दिव्याग्निः । श्रोत्रं दिशो दिक्सोमः ।।६ ।।

अथ मरीच्यत्री । अथर्वा भृग्वङ्गिरसौ । पुलस्त्यपुलहौ । क्रतुदक्षौ । वसिष्ठागस्त्यौ। विश्वामित्रः - इत्येते द्वादशर्षयो वैराजप्राणः । कश्यपो मारीचः । अथ जमदग्निः । गृत्समदापरनामा शौनक-इति भार्गवौ ।। दध्यङ्ङाथर्वणः उतथ्यो बृहस्पतिः संवर्तो घोरः कण्वो गोतमो भरद्वाजो वामदेव इत्येवमादय एकविंशिनोऽङ्गिरसः।।७ ।।

अथ ऋषयः । पितरो । देवाः । असुराः । मनुष्याः । गन्धर्वाः । पशव इति सप्तैते चित्याः प्राणाः । सप्त ऋषयः । सप्त पितरः । त्रयस्त्रिंशद्देवाः । नवनवतिरसुराः । अण्डजाः पिण्डजा ऊष्मजा उद्भिज्जा इति चत्वारो मनवो मनुष्याः । गन्धर्वाः सप्तविंशतिः पुरुषाश्वगवाव्यजाः पञ्च पशवः । ऋतवश्छन्दांसि। इत्यादयोऽन्येऽपि प्राणा इष्यन्ते ।। तेषां पशुष्वेवान्तर्भावः ।।८ ।।

अथाग्नेयाः सौम्या वायव्याः आप्याः परोरजस इत्येवं चैते प्राणाः पञ्चधा । ते प्राणानां वर्गविशेषाः पूर्वोक्तेष्वेवापित्विनः सन्तीति नातिरिच्यन्ते ।।९ ।।

(७) त्रिविधा विराडात्मानः

अथ यदिदं क्वचित् किञ्चिदेकैकं परिदृश्यते तत्सत्वं स विराडात्मा स प्रजापतिरिति विद्यात् । तथा च श्रूयते - एतद्वा अस्ति, एतद्ध्यमृतम् । यद्ध्यमृतं तद्ध्यस्ति । एतदुतद् - यन्मर्त्यम् । स एष प्रजापतिः । सर्वं वै प्रजापतिः । (शत ०४ ।४ ।८ ।२)।। स च वागधिष्ठितप्राणाधिष्ठितमनोमयस्त्रिवृदयमेकैकः सर्वो विराडात्मा ।

तत्रायं वागग्निर्द्विविधो मत्योऽमृत इति भेदात् ।। चित्याग्निर्मर्त्याग्निः । चितेनिधेयोऽग्निरमृताग्निः । चित्याग्निमयोऽयं दृश्यः स्पृश्यः पिण्डो बिम्बः । तमनुपरितोऽतिदूरमभिव्याप्नुमानोऽमृताग्निरेव साहस्रम् ।। मूर्तिबिम्बः छायामण्डलं साहस्रम् । मूर्तिरात्मा तत्पदम् । छायामण्डलं प्राणाः । तदिदं पुनः पदम् ।। बिम्बभेदात् साहस्राणि भिद्यन्ते ।।

तथा चयमेषा मनः प्राणसगर्भावाक् द्वेधा भूत्वा स्वां संस्थामातनुते। अन्तर्धा बिम्बो बहिर्धा साहस्त्रं चेति।।

अनन्ताश्चैते विराडात्मानः। ते संकलप्य त्रेधा विभज्यन्ते। एकस्तावदीश्वरः। तत्र ये बहवोऽवतारास्ते द्वितीयाः। तेषु येऽमी अनन्ता जीवास्ते तृतीयाः -- इति।। स्वयंभूपरमेष्ठिसूर्य चन्द्रपृथिव्यादयोऽमी ईश्वरगर्भस्था अनुवर्तन्ते। अवतारपृष्ठस्थाश्चामी अनन्ता जीवा बहुधा प्रकल्प्यन्ते। यथैतस्यां पृथिव्यां धातुजीवा मूलजीवाश्चेतनजीवाः स्युः। चेतनेषु चोष्मजाः पिण्डजा जरायुजाः स्युः।।

तेऽमी जीवाश्चावताराश्चेश्वरश्चेत्येते सर्वे वाङ्मयाः प्रणमया मनोमयाः पुरुषा उपपद्यन्ते। सर्वे चैते बिम्बसाहस्त्राभ्यां द्विसंस्था उपपद्यन्ते। तेषां त्रयाणां। विराडात्मनां प्रजापतीनां प्रथमं सर्वव्यापि यदीश्वरसाहस्त्रं तत्रायमोंशब्दः।। अकारो मनः। उकारः प्राणः। मकारो वागिति संकेतः। तेन वाङ्मयः प्राणमयो मनोमयः स विराडात्मा ओमिति व्याह्रियते।। येऽवतारा ये चैते जीवाः सर्वेऽप्यमी ओमिति व्याहृत्या परिगृहीता भवन्ति। तत्प्रविष्टत्वात् सर्वेषाम्। अवतारजीवयोस्तु पृथक्त्वेन प्रतिपत्यर्थं क्रमेणाहः शब्दोऽहं शब्दश्च नियम्येते।। ईश्वरेऽस्मिन्नवतारेषु जीवेषु वा क्रमेणेदं साहस्त्रमह्नोत्यभिव्याप्नोतीति कृत्वा ओमित्युच्यते अहर्वा अहं वा।। त्रयाणामप्येषां पूर्वो भागोऽयमह्नोति सिद्धोऽभिज्ञायते।। तत्र तावत् परब्रह्मविद्यायां प्रथमोऽय ''मः कारः'' पूर्णं पदं भवति। ईश्वरस्यैव स्फोटरूपतया तस्येतरपदगर्भित्वाभावात्। परब्रह्मविद्यानुरूपा हि शब्दब्रह्मविद्या भवति। तेनैतस्यां शब्दब्रह्मविद्यायाममह्नोति हकारः पदान्तोऽभिज्ञायते तत उत्वमापद्यते ओमिति भवति।। इतरयोस्त्ववतारजीवयो रीश्वरादीतरपदगर्भितया पदानतत्वं नास्तीत्यावेदयितुं तद्वाचकशब्दविद्यायां हकारः प्रकृत्यावतिष्ठमानः परेण स्वरेण संयुज्यते।। अहः अहमिति। ईश्वरजीवयोश्चैतन्येन सौसादृश्यमस्तीत्यावेदयितुं तयोरमित्येतेनैकेन निपातेन स्वरूपकरणं क्रियते। ओम् -- अहमिति।। ततोस्ति वैरूप्यं किञ्चिदवतारेष्वित्यावेदयितुमस्मिन्मध्यमेऽवतारे अनूशब्दः प्रयुच्यते अहन्निति ।। तथा च श्रूयते -- ''असौ स आदित्य य एष एतस्मिन्मण्डले पुरुषः। तस्योपनिषदहरिति।। अथ योऽयं दक्षिणेक्षन्पुरूषः तस्योपनिषदहमिति''।। ओम् -- अहः -- अहम् -- इत्येतेषां त्रयाणां बिम्बसाहस्त्राभ्यां कृतरूपतायाः साम्येऽपि सूर्य्यादिष्ववतारेष्वेवेदं साहस्त्रमह्ना परिदृश्यते। तस्मात् तान्येवाहानि विशेषत आदिश्यन्ते। ''अहं सूर्य्य इवाजनीति'' मन्त्रश्रत्या जीवेषु च तान्यतिदिश्यन्ते -- इति बोध्यम्।।

अह्नोमेषां यः परमोऽन्तः स प्रधिः । आबिम्बनाभेराचैतत्साहस्त्र प्रधेश्चायमेको विराडात्मा। यथा सूर्य्योऽयमेक आत्मा। सूर्यस्यायं दिविष्ठो मूर्त्तः पिण्डो बिम्बः। तस्य च परितोऽभिव्याप्तै रश्मिभिः कृतं ज्योतिर्मण्डलमहः। एवं प्रत्यर्थं विद्यात्। तत्र च स्वयं ज्योतिषां ज्योतिष्मत् तदहः। परज्योतिषामद्धमेव ज्योतिष्मत्। अथार्द्धं ज्योतिर्विरुद्धं तमः। रूपज्योतिषां रूपमयमेवाहः। अजयोतिषां त्वज्योतिस्तदहः। यद्यप्यज्योतिषां तदहर्न गृह्यते तथापै तन्न नासतिति विद्यात्। अह्नां वेदत्वाद् वेदस्य च प्रतिष्ठा ब्रह्मणो वस्तुसत्तानित्यत्वात्।।

''एकं वा एतदेवानामहर्यत् संवत्सरः -'' इति (तां ० १६। ६। ११ भाष्ये) श्रुतेः अह्नोऽस्य ज्योतिषएकत्वेऽपि तत्र त्रयस्त्रिशद्विभक्तिव्यवच्छेदकानां सोम वरुणासुरप्राणानां रात्रिः संज्ञा । अह्नां त्रयस्त्रिंशतृत्वात्

त्रयस्त्रिंशदेव तत्रैता रात्रयो भवन्ति। ये चाहोरात्रयोः सन्धयः ते वैष्णवाश्च भवन्ति। ऐन्द्राश्चेति द्विविधा इष्यन्ते। इन्द्रवष्णू हि सयुजौ सहस्त्रं व्यैरयतः। तत्रायं विष्णुस्त्रिविक्रमः पृथिव्याः सकाशादूर्ध्वं त्रीन् विक्रमान् त्रिवृत् पञ्चदशैकविंशान् विकममाणस्तत्र तत्राहोरात्र संधिस्थानमाक्रमते। इन्द्रस्त्वयमस्मात् पृथिवीहृदयादारभ्य त्रयस्त्रिशतं यावदुत्क्रमते तत्रायं विष्णुरापोमयः स्याद् -इन्द्रः पुनरयं वाङ्मय - इति विद्यात्।।

(८) पारिल्पविकाहोरात्रपर्वाणि

अह्नां चैषां त्रेधा विभक्तयो भवन्ति--पारिल्पविका आभिल्पविकाः पृष्ठ्याश्चेति। तिर्य्यग् विभक्तयः परिल्पवाः। तानि च त्रीणि शतानि षष्ट्यधिकान्यहानि स एकः संवत्सरः।। १।। अशीतं शतमह्नामेकं पर्व। तदयनम्। द्वे अयने संवत्सरः।। २।। विशं शतमह्नामेकं पर्व। तच्चातुर्म्मास्यम्। त्रीणि चातुर्म्मास्यान्येकः संवत्सरः।।३।। अह्नां षष्ठिरेकं पर्व। स ऋतुः। षड् ऋतवः संवत्सरः।। ४।। त्रिंशदहान्येकं पर्वसमासः। द्वादरमासाः संवत्सरः।। ५।। पञ्चदशाहान्येकं पर्व। सोऽर्द्धमासः। चतुर्विंशतिरर्द्धमासाः संवत्सरः।। ६।। अह्नां विभाजिकायाः परिश्रितो रात्रिः संज्ञा। अहश्च रात्रिश्चेति द्वे अहनी वासरः। सप्तशतानि विंशतिश्चाहोरात्राण्येकः संवत्सरः।। ७।।

"संवत्सरोऽग्निः। तस्यैतस्याग्नेर्वागिवोपनिषत्"। इति वाजिश्रुतिः। संवत्सरोग्निः। वाक् संवत्सरः। यदग्निर्विभज्यते। वाचमेव तद् विभजन्ति (१०।१२) इति च ताण्ड्यम्। अग्निः संवत्सरः। सूर्य्यः परिवत्सरः। चन्द्रमा इदावत्सरः। वायुरनुवत्सरः। इति च ताण्ड्यश्रुतिः।।१७। १३।।

(९) आभिल्पविकाहोरात्रस्तोमाः

अथोत्तराधरविभक्तयोऽभिल्पवाः। त्रिविधास्तु सूर्य्येऽभिल्पवा भवन्ति ज्योतिर्गौरायुश्चेति। निराकारोऽगिनप्राणो यावदेव सोमं दहति तावज्ज्योतिः।। विष्णुप्राणो गोविन्दः। इन्द्रप्राण आयुरात्मा। ज्योतिषस्तावदस्माद् ज्योतिर्म्मयास्त्रयस्त्रिंशद्देवाः उपपद्यन्ते। अथ शब्दस्पर्शरूपरसगन्धाः सर्वाणि च भूतानि गोभिः सृज्यन्ते। अथ सर्वेषामेषां भूतभौतिकजातानां प्राणिनां विज्ञानान्यात्मानोऽमी आयुषः संभवन्ति। अरा इव रथनाभौ यत्रोपसृष्टेभ्यः पञ्चदेवेभ्यो वाक् प्राणा चक्षुः श्रौत्राणि प्राणा आविर्भवन्तो लक्षयन्ते स आयुरात्मा। स इन्द्रः। यशो वा आयुरिति ताण्ड्यम्।। ६। ४। ४।। त्रयाणामप्येषां सहस्त्रं सहस्त्रभक्तयः कल्प्याः। "यावद्वै सहस्त्रं गाव उत्तराधरा इत्याहुस्तावदस्माल्लोकात् स्वर्गो लोक इति" तां० १६। ८। ताण्ड्यश्रुतौ गवामितरोपलक्षणत्वात्।। अत एवैतं सूर्य्यं सहस्त्रांशुमाचक्षते। सहस्त्रं चैतेऽहर्गणा बिम्बपृष्ठात् प्रधिपर्य्यन्तमातताः परितः संपद्यन्ते। तान्येव च सहस्त्रं पृष्ठानि सहस्त्रवर्त्मा सामवेदो नाम।।

तत्रैताः सहस्त्रं गावो देवेभ्यः सर्वाणि दुग्धानि दुहते। तासु त्रीणि शतानि। त्रिंशञ्च त्रीणि च गावो वसूनाम्। तावदेव रूद्राणाम्। तावदेवादित्यानाम्। अथ या तासामेकाऽवशिष्यते सा प्राजापत्या त्रिरूपा कामगवी।। तथा च श्रूयते--"प्रथमेऽहंस्त्रीणि च शतानि नयति त्रयस्त्रिशसं च। एवं द्वितीयेऽहन्।एवं तृतीयेऽहन्। अथैषा साहस्त्री अतिरिच्यते। सा वै त्रिरूपा स्यादित्याहुः। एतद्धयस्यै रूपतममिवेति। रोहिणी हत्वेवोपध्वस्ता स्यात्। एतद्धैवास्यै रूपतममिव। वाग् वा एषा निदानेन यत् साहस्त्री। अयातयाम्नी वा इयं वाक्"-इति।।

(श० ४ । ४ । ९ (१) ।। अथ या सहस्रतम्यासीत् तस्यामिन्द्रश्च विष्णुश्च व्यायच्छेताम् । स इन्द्रोऽमन्यत– न वा इदं विष्णुः सहस्रं प्राथ्र्यते इति तस्यामकल्पेताम् । द्विभाग इन्द्रः । तृतीयो विष्णुः ।तदेवैषाऽभ्यनूच्यते–''उभा जिग्यथुर्न पराजयेथे न पराजिग्ये कतरश्चनैनोः ।इन्द्रश्च विष्णो यदपस्पृधेथां त्रेधा सहस्रं वितदैरयेथाम् ।।'' इति च तैत्तिरीयश्रुतिर्भवति ।।

(१०) पृष्ठ्याहोरात्रस्तोमाः

अथैतस्मिन् सहस्रे विभागान्तराणि चोपपद्यन्ते– त्रिवृत्, पञ्चदशः, सप्तदशः, एकविंशः, सप्तविंशः, त्रयस्त्रिंशः ।।पञ्चविंशः, ऊनविंशः, चतुस्त्रिंशः, षट्त्रिंशः । चर्तुविंशः । चतुश्चत्वारिंशः।अष्टाचत्वारिंशः– इति । तान्येतान्येषामहाणां पृष्ठान्युच्यन्ते । पृष्ठ्या ह्येते विभागः स्युः । तत्र त्रयस्त्रिंशदहर्गणे षट्स्तोमाः स्युः । अह्नां समूहक्लृप्तिः स्तोमः । त्रिभ्य उपरिष्टात् षड्भिः षड्भिरहोभिःपञ्चस्तोमाःसिध्यन्ति । त्रिवृत् ।पञ्चदशः एकविंशः । त्रिणवः । त्रयत्रिंशश्चेति । अथैतस्य त्रयस्त्रिंशदहर्गणास्यार्द्धेन सप्तदशः स्तोमः कल्प्यते । इत्थं षट्स्तोमा वषट्कारः ।। अकारो मनः । प्राण उकारः । ताभ्यां गर्भिता वागियं वौक् । तस्याः षड्भक्तिकरणं वौक् षट्कारः । संहितायां कलोपः ।। अथवा उकारा कारौ प्राणमनसी वकारः । अकारोकारौ मनःप्राणा वोकारः प्रध्यारब्धो नभ्यो वकारः । नभ्यारब्धः प्रधिरोकारः । ताभ्यां संस्था लक्ष्यते । तस्याः स्तोमप्रकारः षट्कारो वौषट्कारः स वषट्कारः । तत्र त्रिवृत् पृष्ठः पृथिव्यग्निः ।। पञ्चदशपृष्टोऽन्तरिक्ष्याग्निः । एकविंशपृष्ठः सूर्य्याग्निः त्रिणवपृष्ठो भास्वरसोमः । त्रयस्त्रिंशपृष्ठो दिक् सोमः । इत्थमेते त्रयस्त्रिंशदहर्गणा दैवतस्तोमा भवन्ति ।।

अथ यश्चतुस्त्रिंशः स्तोमः सोऽयं चतुस्त्रिंशद्व्याहृतिकः प्रजापतिः । स नाक इति ताण्ड्यम् ।। यस्वन्तरतः पञ्चविंशः स्तोमस्तन्महात्रतम् स इन्द्रो विद्युत् । स कामप्रो लोकः । अथ सप्तदशमारभ्य पञ्चविंशं यावदयं त्रिवृदग्निस्त्रिणाचिकेतो नाम स्वर्ग्याग्निः । तत्र त्रयोनाचिकेता नामाग्नयो भवन्ति– सप्तदशः संवत्सरो नाम । एकविंशो व्रध्नो नाम । पञ्चविंशोऽयं विद्युन्नामेति ।। अथ षट्त्रिंशस्तोमो गोसवो देवनिर्म्मितो भवति । अष्टाचत्वारिंशदहर्गणास्तु छन्दोमाः स्तोमा इष्यन्ते । चर्तुविंशो गायत्रः । चतुश्चत्वारिंशस्त्रैष्टुभः अष्टाचत्वारिंशो जागत इति भेदात् । ''तम इव वा एतान्यहानि यच्छन्दोमाः'' । इति ताण्ड्यम् ।१४ ।१२ ।।

ते चैते स्तोमा अभिप्लवभेदात् त्रेधा भिद्यन्ते – ज्योतिष्टोमो गोष्टोमः आयुष्टोम इति ।। ज्योतिषामह्नां समूहक्लृप्तिर्ज्योतिष्टोमः गवां गोष्टोमः । आयुषामायुष्टोमः । तत्रैतानि ज्योंतीषि देवानां गावो भूतानामायूष्यात्मनां योनयो विज्ञायन्ते ।

तत्राऽयं ज्योतिष्टोमश्चतुष्टोमः संपद्यते सप्तस्तोमो वा । अग्निष्टोमः । उक्थस्तोमः । अप्रतिरात्रस्तोमः । षोडशीस्तोमः– इति चत्वार एव प्रधानताः स्तोमा इष्यन्ते ।। तत्र वागुपनिषत्कोऽग्निरेवाहानि । यावदग्निस्तदहः । अह्नामेव षण्णां षण्णां स्तोमोऽग्निष्टोमः । तानि चैतानि त्रयस्त्रिंशदहानि वितायन्ते ।। तेषामह्नां विभक्तयो रात्रयः । अह्नश्चोभयतो रात्रिर्भवति । तत्रोत्तराहसहिता पूर्वरात्रिरतिरात्रम् । रात्रिमतीत्य परदिनपर्यन्तं वर्तते इत्ययं क्रतुरतिरात्रः–इत्याह भाष्यकारः ।। षण्णां षण्णां रात्रीणां स्तोमोऽतिरात्रस्तोमः । योऽतिरात्रः सा रात्रिः । अथ नाहो न रात्रिः । किंतु येऽहोरात्राणां सन्धयस्तेषां षण्णां षण्णां स्तोम उक्थस्तोमः । तत्र या रात्रि : स सोमः । यत्र

सन्धिः स विष्णुः।-"अग्निर्वा अहः। सोमो रात्रिः । अथ यदन्तरेण तद् विष्णः । एतद्वै परिप्लवमानं संवत्सरं करोतीतिश्रुतेः।" (श० ३ । ३ । ५ ।१५) न चायं विष्णुरिन्द्रेण विनाकृतो दृश्यते । तथा च - "विष्णोः कर्म्माणि पश्यत यतो व्रतानि पस्पशे । इन्द्रस्य युज्यः सखा" इति मन्त्रश्रुतेरिन्द्रविष्णू सयुजौ सन्धी भवतः। तत्र पञ्चदशस्तोत्राण्युक्थस्तोमो वैष्णवः सन्धिः। षोडशिस्तोमः। स ऐन्द्रः सन्धिरिति विद्यात् ।। अपि च श्रूयते - "अग्निर्वा अग्निष्टोमः । ऐन्द्राग्नानि वा उक्थानि ।। इन्द्रो वै षोडशि। सारस्वतं रात्रे रूपं क्रियते इति ।। वैष्णवएवायं सन्धिरैन्द्राग्नोऽपीष्यते। यै व सौम्या रात्रिस्तामिदानीं सारस्वतीमाह ।।

अथ ये पुनरेष्वहःसु बार्हस्पत्या भागा वाजसोमा अन्ननिर्विष्टाः प्रतिपद्यन्ते तेषां स्तोमो विधीयमानो वाजपेयस्तोमः।बृहस्पतिश्चायं पुनर्वसुपुष्यनक्षत्रस्थः। वाजपेयं मारुतं प्राजापत्यं चेत्यपि प्राहुः।। ये पुनराप्तोर्यामास्तेषां स्तोमा विधीयमाना आप्तोर्यास्तोमः। अपि चाग्निष्टोममेवानुक्रियतेऽत्यग्निष्टोमः। तदित्थ मेभिरतिरिक्तै स्त्रिभिः स्तोमैः सप्तसंस्थोऽयं ज्योतिष्टोप्तः संपद्यते ।। तेऽमी आभिल्पविकाश्चत्वारः स्तोमाः आख्याताः।। चत्वारोऽप्येकविंशस्तोमा एव क्रियन्ते न तूर्ध्वं वितायन्ते। तथा च त्रिवृत् पञ्चदशः सप्तदश एकविंश इत्येतैश्चतुर्भिरेव पृष्ठ्यस्तोमैः संपन्नत्वाश्चतुष्टोमा एवैते चत्वारोऽपि स्तोमाः संपद्यन्ते इत्यवधेयम्।।

अह्नां स्तोमेऽप्यहःशब्दो न निवार्य्यते। यवराशौ यवशब्दवत्। तेनैते स्तोमा अप्यहानि व्यपदिश्यन्ते इति बोध्यम्।। सूर्य्ये तावदियं स्तोमक्लृप्तिराख्याता। एवं पृथिव्यामन्यत्रान्यत्र च विज्ञातव्येति दिक्।।

(११) स्तोमबन्धुता

त्रिवृदादिस्तोमानां लोकनुबन्धितया क्रमिकत्वेऽपि ताण्ड्यश्रुतिरेषां धर्मानुबन्धित्वमाख्याय मतान्तरेणा क्रमिकत्वं प्रत्याचष्टे। तथा हि--"अग्निना पृथिव्यौषधिभिस्तेनायं लोकस्त्रिवृत्।। वायुनाऽन्तरिक्षेण वयोभिस्तेनैष लोकस्त्रिवृत्--योऽयमन्तरा।। आदित्येन दिवा नक्षत्रैस्तेनासौ लोकस्त्रिवृत्।। एतदेव त्रिवृत आयतनम्, एषाऽस्य बन्धुता।। तमु प्रतिष्ठेत्याहुः। त्रिवृद्ध्येवैषु लोकेषु प्रतिष्ठितः।। १ ।।

अर्द्ध मास एव पञ्चदशस्यायतनम् । एषाऽस्य बन्धुता।। तम्वोजो बलमित्याहुः।। अर्द्ध मासशो हि प्रजाः पशवः ओजो बलं पुष्यन्ति।। २ ।।

संवत्सर एव सप्तदशस्यायतनम्।-द्वादशमासाः पञ्चर्तवः। एतदेव सप्तदशस्यायतनम्। एषाऽस्य बन्धुता ।। तमु प्रजापतिरित्याहुः। संवत्सरं हि प्रजाः पशवोऽनुप्रजायन्ते।। ३ ।।

आदित्य एवैकविंशस्यायतनम्।-द्वादशमासाः, पञ्चर्तवः, त्रय इमे लोकाः। असवादित्य एकविंशः।। एतदवैकविंशस्यायतनम्। एषाऽस्य बन्धुता।। ७।। तमु देवतल्प इत्याहुः।। ८ ।। त्रिवृदेव त्रणावस्यतनम्। एषाऽस्य बन्धुता।। ९।। तमु पुष्टित्याहुः। त्रिवृद्ध्येवैष पुष्टः।।१०।। देवता एव त्रयस्त्रिंशस्यायतनम्। त्रयस्त्रिंशद्देवताः। प्रजापतिश्चतुस्त्रिंशः। एतदेव त्रयस्त्रिंशस्यायतनम्। एषाऽस्य बन्धुता।। ११ ।। तमु नाक इत्याहुः। नहि प्रजापतिः कस्मै च नाकम्।।१२ ।। छन्दास्येव छन्दोमानामायतनम्। एषैषां बन्धुता।। १३ ।। तानु पुष्टिरित्याहुः। पशवो हि च्छन्दोमाः।। १४।। (तां० १० ।१ ।खं)

(१२) सामक्लृप्तिः

उद्गीथदसावलम्बी वागध्यूढः प्राणाः साम ।। १ ।। वाक्प्राणामनोभिरारब्धं खल्विदमेकैकं सकलं सत्त्वम् ।। तत्रेयं वाग् मा-प्रमा-प्रतिमाप्रभृतिच्छन्दःप्रभेदानां मध्यतः केनचिच्छन्दसा छन्दिता सती ऋगित्युच्यते । ऋच्यध्यूढः प्राणा एवायं वितायमानः सामाख्यां लभते ।। तयोश्च ऋक्सामयोरारम्भणं प्रणवः प्रतिष्ठा च प्रणवः ।। अथ साम्नस्तु ऋगध्यूढस्य मध्यमा भक्तिरुद्गीथः । वाक्प्राणावृक्सामे उद्गीथेऽस्मिन्नक्षरे संसृज्येते ।। २ ।।

सर्वत्रैव तु ते ऋक्सामे अन्योन्यमविनाभूते भवतः । तद्यथा-इयं पृथ्वी ऋक्-तत्राद्यूढोऽयमग्निः साम । अन्तरिक्षमृक्-वायुः साम । द्यौर्ऋक्- आदित्यः साम । नक्षत्राणि ऋक्-चन्द्रमाः साम । ऋच्यध्यूढं साम गीयते ।। आदित्यस्य शुक्ला भा ऋक्। तत्र नीलं परः कृष्णं साम । या चेयमक्ष्णः शुक्ला भाः सा ऋक् -अथ यन्नीलं परः कृष्णं तत्साम । ऋच्यध्यूढं साम गीयते ।।३ ।।

ऋचमनु सामेदं शश्वत् साध्वेवानुवर्त्तते न त्वेव जात्वेतामृचमात्मानमतिपातयति । तस्मात् साधुनि साधुत्वे च सामशब्दः, असाधुनि चासाधुत्वे च तद्वदसामशब्दोऽभिनिर्वर्त्तते । अपि चेदमृचि साम्येन सामानुवर्तते । यावतीयमृक् तावदेवेदं सामापि तत्राभिव्याप्नोति तस्मात् साम नाम ।। अथ ऋगायतनापेक्षया वितायमानत्वात् बृहदायतनमपीदं सामसंमितमृचांशैर्भवति तस्मात् साम नाम । ''ऋचा समं मेने'' इति नैदाना इत्याह यास्को निरुक्ते (दै० ७। १२ । ४) ।। तिसृभिर्ऋग्भिः समं सामेत्याहुः । विष्कम्भत्रयसमं हि तत्पृष्ठं भवतीति तृचं सामोपपद्यते ।।४ ।।

साम देवानामन्नमिति ताण्ड्यम् । ६ । ४ । १३ ।। अथ लोके सौन्दर्य्यं द्विविधं भवति भगः सामेति । यत्रेतरानपेक्षं प्रतिस्विकं सौन्दर्यं तद्भगनिबन्धनं सौभगं नाम । अथ यत्र तु शिल्पादावितरेणरनुरूप्यं प्रातिरूप्यं वा तद्धेतुस्तत्रेदं सामैव मनो हरतीति विद्यात् ।। ५ ।।

तस्यैतस्य साम्नः पञ्चभक्तयो भवन्ति - हिंकारः ।।प्रस्तावः । उद्गीथः।प्रतीहारः । निधनम्-इति । संतानारम्भणं वितानोपक्रमणं वा हिंकारः ।। उद्ग्राभनिग्राभयोरभिक्रान्ताक्रान्तयोरुत्थानपतनयोर्व्यवच्छेदकं मध्यमं पदमुद्गीथम् । यत्रोपसंहारोऽवसायस्तन्निधनम् । हिंकारं चोद्गीतं चान्तरा भक्तिः प्रस्तावः। उद्गितं च निधनं चान्तरा भक्तिः प्रतिहारः । केचित्तु हिंकारोद्गीथयोर्गर्भे प्रस्ताव आदिरिति द्वे उद्गीथनिधनयोर्गर्भे प्रतिहार उपद्रव इति द्वे- इत्थं सप्तभक्तिकं सामाचक्षते । तत्रैतयोर्न विशेषः । विवक्षाधीनत्वाद् भक्ती नाम् ।। ६ ।।

प्रत्यर्थं चैतत् साम प्रतिपद्यते । तद्यथा - रथन्तरं वैरूपं शक्वर्य्य इति पृथिव्याः सामानि । बृहद्वैराजं रेवत्य इति दिवः सामानि ।। अभिमन्थनं धूमः प्रज्वलनमङ्गारा उपशमः इत्यग्नौ प्रोतं रथन्तरम् । अभ्रसंप्लवो मेघो वर्षा विद्योतते उद्गृह्णातीति पर्जन्ये प्रोतं वैरूपम् । पृथिव्यन्तरिक्षं द्यौर्दिशः समुद्र इति लोकेषु प्रोताः शक्वर्य्यः उद्यन्नुदितो मध्यन्दिनोऽपरह्णोऽस्तं यन्निति बृहदादित्ये प्रोतम् । पञ्चर्तवो वैराजमृतुषु प्रोतम् ।। अजा अवयो गावोऽश्वाः पुरुषः - इति पशवो रेवत्यः ।। पशवो बृहद्रथन्तरे ।अपि चाहुः । ऐरं बृहत् -ऐडं रथन्तरम् ।। १ ।। मनो बृहत् -वाग् रथन्तरम् ।।२ ।। साम बृहत् - ऋग् रथन्तरम् ।।३ ।। प्राणो बृहत् अपानो रथन्तरम् ।।४ ।। असौ लोको बृहत् -अयं रथन्तरम् ।।५ ।। अपृष्ठ वै वामदेव्यमनिधनं तदनायतनम् ।। अथ राजनं चन्द्रमसः साम । अग्निर्वायुरादित्यो नक्षत्राणि चन्द्रमा इति राजनं देवतासु प्रोतमित्याहुः ।। वारवन्तीयं श्रायन्तीयं

यज्ञायज्ञियमिति सामानि भवन्ति ।। अश्रयन् वाव श्रायन्तीयेन । अवारयन्त वारवन्तीयेन ।। इन्द्रियस्य वा एषा वीर्य्यस्य परिगृहीतिरिति ताण्ड्यम् ।।१८। ११ । १। (मै०४ । ४। ९) सर्वाङ्गान्येकं रूपं यज्ञायज्ञीयम् । ऋक्सामयजुषां रसो (मै०४।४।९) यज्ञायज्ञीयम् एकविंशान्तं वारवन्तीयं वैष्णवम् । चतुर्त्रिंशान्तं श्रायन्तीयं ब्राह्मम् ।त्रयस्त्रिंशान्तं यज्ञायज्ञीयमीन्द्रमिति भावयेत् । बहूनि चान्यानि सामानि यज्ञमधुसूदने यज्ञविटपाध्याये द्रष्टव्यानि ।।

इति षष्ठः पाठः ।।६।।

ऋतवः

ऋतं च सत्यं चेति द्वे भूते । ऋतमशरीरं सशरीरं सत्यम् आपो वायुः सोम इति ऋतानि । अग्नियमादित्याः सत्यानि । अग्निरपि धर्म्मं ऋतम् । ऋतयोरग्निषोमयोः संसृष्टितारतम्यात् सिद्धानि जगदुत्पत्तिप्रयोजकानि रूपाणि ऋतवः । प्रत्यर्थभिन्नाः ऋतवः ।

उत्तरायणदक्षिणायने अग्नोषोमौ संवत्सरः । संवत्सरविभागा ऋतवः । अहोरात्रे अग्निषोमौ वासरः । वासरविभागा ऋतवः ।।१ ।। अग्निर्ऋतुः । सूर्य्य ऋतुः । चन्द्रमा ऋतुः :- इति तैत्तिरीयाः ।।(तै० ब्रा० ३ । १० ।१) ।। शीतोष्णवर्षा चातुर्म्मास्यानि त्रय ऋतवः ।। २ ।। वर्षाशरच्छीतवसन्तग्रीष्मकाला द्वासप्ततिर्वासराः पञ्चर्तवः। ते च दक्षिणायणदिवसारब्धाः षोडशचत्वारिंशत् षोडशवासरैस्त्रिसवनविभक्ताः स्युः ।। ३ ।। वसन्तग्रीष्मवर्षाशरद्धेमन्तशिशिराः षष्ठिवासराः षड् ऋतवः । ते च वसन्तसंपातप्राक्तनत्रिंशत्तम दिवसारब्धाः स्युः ।।४ ।।

छन्दांसि

छन्दनं छन्दः । येन वाच्छन्द्यते तच्छन्दः । यथेच्छाचारित्वप्रतिबन्दीधर्म्मश्छदनम् ।।

वाक् छन्दः । प्राणश्छन्दः वाचा प्राणः प्राणेन च वाक् छन्द्यतेऽवच्छिद्यते तस्माच्छन्दः । मा प्रमा प्रतिमाऽस्त्रीवयश्चेति चत्वारि प्राणमयानि, वर्णमात्रागणभेदात् त्रीणि वाङ्मयानीति सप्तैतानि छन्दांसि ।। व्यक्तिभावप्रधाने दिग्देशकालसंवित्संख्यारूपऽवच्छेदे पृथिवीलोके माशब्दः । आकृतिभावप्रधानेऽणुत्व - महत्त्वह्रस्वत्वदीर्घत्वनियमकसंनिवेशरूपेऽवच्छेदेऽन्तरिक्षलोके प्रमाशब्दः ।। जातिभावप्रधाने समानद्रव्यगणकर्म्मरूपेऽवच्छेदे द्युलोके प्रतिमाशब्दः ।। अन्नरूपेऽवच्छेदेदिक्ष्वस्त्रीविशब्दः ।। तान्येतानि देवछन्दसानि चत्वारि ।। अशीत्यक्षरव्यूहेसिन्धुशब्दः । सेयं मा छन्दसि संविद्वा संख्या वा । समुद्रश्छन्द इत्यादीनि तु यजुर्वेदोक्तानि प्रमाछन्दांसि द्रष्टव्यानि आकृतिप्राधान्यात् ।। अथ शिल्पं छन्दः । यदपूर्वं यच्च प्रतिरूपं तच्छिल्पम् ।। आत्मसस्कृतिः शिल्पमत ।। ब्राह्मादिवर्णाधर्मप्रयोजकाः संस्कारश्छन्दांसि ।। संवेश उपवेशश्छन्दांसि ।। दिग्देशमात्रावच्छेदे वयोनाधाः । तानि छन्दांसि ।। अथ द्रविणं वीर्य्यं तच्छन्दः । तेजो वै ब्रह्मवर्चसं गायत्री ब्रह्मगायत्री ।। ओजो वा इन्द्रियं वीर्य्यं त्रिष्टुप् । क्षत्रं त्रिष्टुप् । जागताः पशवः । इषमूर्जं रयिः

पुष्टिर्जगती – इत्येवमादीनि द्रविणानि छन्दांसि ।। अथ रहो रुचिरभिलाषावश्यता स्वैराचारो निष्प्रतिबन्धः प्रतिपत्तिरित्येतानि सप्तनिरूढछन्दांसि ।। एषां सप्तविधानां छन्दोविशेषाणां चतुर्षु देवछन्दसेष्वेवान्तर्भावो द्रष्टव्यः।।

परिमिता वर्णा वर्णछन्दः ।। परिमिता मात्रा मात्राछन्दः ।। परिमिता गणा गणछन्दः ।।

वेदे वर्णछन्दांस्येव प्रायेणोपयुज्यन्ते ।।१।। चतुर्विंशत्यक्षरा गायत्री । ततश्चुरक्षरवृद्धिक्रमादुष्णिगनुष्टुब् बृहतिपंक्तित्रिष्टुब्जगत्यते भवन्ति । ता आर्ष्यः ।।२।। आर्षीविकाराच्छन्दसां सप्तकानि सप्तविधानि ।। दैव्यासुरीप्राजापत्येत्यतास्तिस्त्रो विधाः ।। आर्चि साम्नी याजुषी ब्राह्मीत्येताश्चतस्त्रो विधाः ।। तत्रार्ष्यः षोडशभिरक्षरैर्हीनाश्चेत् प्राजापत्याः स्युः ।। षोडशसु चैकद्वित्रिचतुः पञ्चषट्सप्ताक्षराः क्रमेण दैव्याऽवशिष्ठाः क्रमेणासुर्य्यः । दैव्यासुरीप्राजापत्यानां समष्ट्या ता आर्ष्यः ।। आर्षीणामेकपादहानावार्च्यो द्वि पादहानौ साम्न्यस्त्रिपातहानौ याजुष्यः स्युः । आर्ची साम्नी याजुषी समष्ट्या ता ब्राह्म्यः ।।

		दैवी	आसुरी	प्राजापत्या	आर्षी	आर्ची	साम्नी	याजुषी	ब्राह्मी	प्रभेदाः
गायत्री		१	१५	८	१४	१८	१२	६	३६	९
उष्णिग्		२	१४	१२	२८	२१	१४	७	४२	८
अनुष्टुप्		३	१३	१६	३२	२४	१६	८	४८	७
बृहती		४	१२	२०	३६	२७	१८	९	५४	९
पङ्क्तिः		५	११	२४	४०	३०	२०	१०	६०	८
त्रिष्टुप्		६	१०	२८	४४	३३	२२	११	६६	१०
जगती		७	९	३२	४८	३६	२४	१२	७२	३

ये त्वेषां सप्तानां छन्दसां पादव्यवस्थाभेदात् प्रत्येकमनेकभेदा भवन्ति ते छन्दः – समीक्षायां द्रष्टव्याः ।।

देवपादाः

वायुरेकपात् । तस्याकाशः पादः।।१।। चन्द्रमा द्विपात् । तस्य पूर्वपक्षापरपक्षौ पादौ ।।२।। आदित्यस्त्रिपात् । तस्येमे त्रयो लोकस्त्रयः पादाः ।।३।। अग्निःषट्पादः तस्य पृथिव्यान्तरिक्षं द्यौराप ओषधिवनस्पतयः – इमानि भूतानि पादाः ।। गो० २ । १।।

मनोताः

वाग् , गौः, द्यौः – इत्येतास्तिस्त्रः पूर्ववेदीयाज्यानां देवानां मनोताः तत्र द्यौरित्यग्निर्वसवः ।। अथ ज्योतिः । गौः । आयुः –इत्येतास्तिस्त्रः उत्तरवेदीयाज्यानां देवानां मनोताः । अग्निः सर्वा मनोताः । अग्नौ मनोताः संगच्छन्ते ।।

आप:

अम्भः । मरीचिः । मरः । श्रद्धा – इत्येश्चतुर्विधा आपः ।। तास्वदोऽम्भः परेण दिवं द्यौः प्रतिष्ठा ।। सूर्य्यरश्मयोऽम्बुमया मरीचयः ।। पृथ्वीरूपेण परिणता आपो मरः । चन्द्ररश्मिमयाः सौम्या आपः श्रद्धाः ।। मनसि ताः प्रत्यक्षं भाव्यन्ते ।।१।।

दिव्या आन्तरिक्ष्याः पार्थिव्या इत्यापस्त्रेधा ।।२ ।।

अथ राजसूयेभिषेचनीयाः संभरणीया आपः सप्तदशधा ।। – सारस्वत्याः ।।१।। प्राङ्ुदर्द्यः प्रत्याङ्ुदर्द्यश्चोम्मर्यः ।।२ ।। स्यन्दमानाः ।।३ ।। प्रतिपस्यन्दिन्यः ।।४ ।। अपयत्यः ।।५ ।। नदीपतिः ।।६ ।। निवेष्याः ।।७ ।। स्थवरोह्नदः ।।८।। आतपवर्ष्याः ।।९ ।। वैशन्त्यः ।।१० ।। कूप्याः ।।११ ।। प्रश्वाः ।।१२ ।। मधून्योषधिरसाः ।।१३ ।। गवोल्ब्याः ।।१४ ।। पयांसि ।।१५ ।। घृतानि ।।१६ ।। मरीचयः ।।१७ ।। इति ।।

पशवः (८)

पुरुषः, अश्वः, गौः, अविः, अजः– इति पञ्च मेध्याः पशवः ।। ते ग्राम्याः ।। किं पुरुषः, गौरः, गवयः, उष्ट्रः, शरभः– इत्येते पञ्चामेध्याः पशवः । तेऽमी आरण्याः ।।

अन्येत्वाहुः –पुरुषः, अश्वः, गौः, अविः, अजः,रासभः,अश्वतरः– इति सप्त ग्राम्याः पशवः ।। गोमायुः, गोमृगः, उष्ट्रः, शरभः, हस्ती, मर्कटः– इत्यारण्याः सप्तपशवः ।।

ओषधयः (९)

अग्नेर्वा एषा तनूर्यदोषधयः ।। तै० ब्रा० ३ । २ । ५ ।।

इति सप्तमः पाठः ।।७ ।।

(१) त्रेताग्निविद्या

पृथिव्यग्निरन्नमादित्य इति चतुष्पाद् गार्हपत्याग्निः । योऽयमादित्ये पुरूषः । सोन्नं भूत्वा पृथिव्या भुक्तोऽग्निर्भवति । अग्नेः पुरीषं पृथिवी इति संचरक्रमः । प्रतिसंचरे पृथिव्या अग्निरन्नं भूत्वा तमादित्यमनुगतो भवति । सूर्य्य आद्यः पृथिव्यत्री । पृथिव्याद्या सूर्य्यस्तदत्तेत्यहरहर्यज्ञः प्रवर्त्तते ।।१ ।। एवमापो दिशो नक्षत्राणि चन्द्रमा इति चतुष्पाच्छूपणीयाग्निः । य एष चन्द्रमसि पुरूषः सोऽस्य प्रभवः स गतिः ।।२ ।। अथ प्राण आकाशो द्यौः विद्युदिति चतुष्पादाहवनीयाग्निः । य एष विद्युति पुरुषः सोऽस्य प्रभवः स गतिः ।।३ ।। सैषाग्निविद्या चात्मविद्या च ।।

(२) जीवात्मनि परमात्मसंस्रव:

१ अग्निर्मे वाचि श्रितो वाग् हृदये ।।१।।
२ वायुर्मे प्राण श्रित:, प्राणो् हृदये ।।२।।
३ सूर्य्यो मे चक्षुषि श्रित:,मनो हृदये ।।३।।
४ चन्द्रमा मे मनसि श्रितो, मनो हृदये ।।४।।
५ दिशो मे श्रोत्रे श्रिता:, श्रोत्रं हृदये ।।५।।
६ आपो मे रेतसि श्रिता:, रेतो हृदये ।।६।।
७ पृथिवी मे शरीरे श्रिता, शरीरं हृदये ।।७।।
८ ओषधिवनस्पतये मे लोमसु श्रिता: लोमानि हृदये ।।८।।
९ इन्द्रो मे बले श्रित:, बलं हृदये ।।९।।
१० पर्जन्यो मे मूर्द्धनि श्रित:, मूर्धा हृदये ।।१०।।
११ इशानो मे मन्यौ श्रित:,मन्युर्हृदये ।।११।।
१२ आत्मा मे आत्मनि श्रित:, आत्म हृदये ।।१२।।
+हृदयं मयि । अहममृते । अमृतं ब्रह्मणि ।।

(३) दशात्मबन्धव:

यज्ञ: प्रजापति: स आत्म । तस्य प्रभव: - योनि: - प्रतिष्ठा - आशय: - गुहा - इति पञ्च पुरोबन्धव: । पाप्मा - प्रजा: - पशव: - वीर्य्यं - द्रविणम् - इति पञ्चोत्तरबन्धव: । तेऽमी दशात्मबन्धवो भाव्या: ।। यस्यात्मनोंऽशानुपादाय किञ्चिदपूर्वं प्राणि जायते स रेत: सिक् प्रभव:। यत्र रेत: सिच्यते गर्भ आधीयते चितिश्चीयते यत्प्रवेशद्वारं यच्चाविर्भावद्वारं स योनि: ।। यत्सत्वे तत्सत्वं यदभावे तदभाव: । यस्मिन् प्रतिष्ठिते तत् प्रतितिष्ठति यस्मिन् वोत्क्रान्ते तदुत्क्रमते सा तस्य स्थितिहेतु: प्रतिष्ठा ।। यत्र विभवति यत्र व्याप्रियते कर्म्माणि कुरुते स आशय: ।। अथ पिण्डगर्भे क्वचिदात्मन: संस्थानाय योऽवकाशो भवति स आकाशो गुहा ।। अणोरणीयान् महतो महीयानात्माऽस्य जन्तोर्निहितो गुहायामित्याहु: ।।

तद्यथा-विज्ञानात्मा महानात्मा भूतात्मा इत्येवमात्मानस्त्रयोऽस्मिन् शरीरे विभवन्ति।। तेषां क्रमेण सूर्य्यश्चन्द्र: पृथिवीति प्रभवा: ।। एषामेव त्रयाणां रेत:सिचां ते ते रसा: शरीरे प्रविष्टा: हृद्ग्रन्थित: सूत्रात्मनाऽनुबद्धा: शरीराभिमानमागता अमी आत्मान उच्यन्ते ।। तेषामत्र शरीरे क्रमेण ब्रह्मरन्ध्रमन्नं प्रपदं चेति योनय: प्रथमचिति भूमयो भवन्ति ।। यत्र शीर्ष्णि केशान्तस्तद् ब्रह्मरन्ध्रम्। इयं सुषुम्णा यया प्रविष्ट: सर्वानाडीाभिव्याप्यायं हिरण्मय: सूर्य्यरस: शरीरी भवति। अथान्तं भुक्तं रसादिक्रमेण शुक्रं भूत्वा चान्द्ररसं शरीरिणं कुरुते । पार्थिवश्च रसो हिरण्मय: प्रपदेन प्रपद्य क्रमादूरू उदरमुर: शिर: पर्य्यन्तमभिक्रमते स भूतात्मा भवति ।। अथैषां प्रज्ञात्मा शुक्रमन्नं चेति प्रतिष्ठा: । प्रज्ञानात्मना संपरिष्वक्तो ह्यविनाभूतोऽयं विज्ञानात्मा भवति सह ह्येतावस्मिन् शरीरे वसत:

सहोत्तिष्ठत: । आदर्शे जलाशये वा सूर्य्यप्रतिबिम्बवदस्मिन् प्रज्ञात्मन्येवायं चिदाभासो विज्ञानात्मा ।। अथास्मिन् शुक्रेऽहरहश्चान्द्रं सहोनुवर्त्तते स महानात्मा शुक्रे प्रतिष्ठिते प्रतितिष्ठति तदुत्क्रमेण चोत्क्रमते । एवमन्नं भूतात्मन: प्रतिष्ठा । अन्नेन हि प्राणा: संभवन्त उच्छवास निश्वासौ जनयन्ति प्राणधारणं चेदमस्य जीवनं भवति ।। अथ स्नायुनाड्यो भ्रूणादि कृमयो रुधिरप्रवाहश्चैषामाशया: स्यु: । उदरगुहा उरोगुहा शिरोगुहा चेत्येतेषांगुहा: स्यु: । अथवा सर्वा एवैता: अन्योन्यानुषक्तानां सर्वेषामेषामात्मनां प्रतिष्ठा अवधेया: ।। एषामेकस्याप्युत्सादे सर्वेषामेवात्मनामुत्क्रान्तिदर्शनात् ।।

अथोत्तरबन्धून् वक्ष्याम: । ग्रन्थिबन्धनहेतुरविद्या पाप्मा ।। असङ्गेऽप्यात्मनि बुद्बुदवायूपरिजलावरणवदावरणभूतायामविद्यायां सर्वेऽप्येते प्रजापशुवोर्य्यवित्तान्यासज्जन्ते । अनिर्वचनीया हीयमविद्या तमोरूपा विद्यामयमात्मानं परित: स्वयमावृणुते । "अन्तरं मृत्योरमृतं मृत्यावमृतमाहितम्--" इति श्रुते: ।। तत: कामस्तप: श्रमा: सृष्टिहेतवो जायन्ते तत एव च तस्मिन् प्रजा: पशवो वीर्य्याणि वितानि हृद्ग्रन्थिबद्धानि भवन्ति ।।

देवा: पितरो मनुष्या: पशवोऽसुरा इति पञ्चभूतानि प्रजा: । यज्ञत: प्रजायमाना आत्मनानुगृहीता इतरे यज्ञा: प्रजा: । पुरीषं करीषं चेति पशव: । लोहकिट्टवद् आत्मत: प्रजायमानमात्मना परित्यक्तमनात्मकं पुरीषम् । मलिनवस्त्रे मलवद् -अन्यात्मत: संगृहीतमनात्मकं शमलं करीषम् ।। ब्रह्मक्षत्रं विड्बलमित्यन्तरङ्गाणि वोर्य्याणि । यानि तु बहिर्धा वीर्य्याणि शस्त्रं क्षेत्रं स्वापतेयमित्यादीनि तानि द्रविणानि ।। द्रविणं वित्तम् ।। यावन्नभ्यं यावद्वित्तं तावदयमेक आत्मा ।।

जीवात्मप्रभेदा:

आत्मा पञ्चविध:--अखण्ड: परात्पर: षोडशीपुरुषो यज्ञपुरुषो विराट्पुरुषश्च ।। तत्र योऽयमंतर्बहिरप्रदेशो निष्कलो निरवद्यो निरञ्जनो निर्धर्यको रसमात्र: सोऽखण्ड: ।। अत्र पञ्चाव्ययकला: पञ्चाक्षरकला: पञ्चक्षरकला: प्रजापति: सा षोडशी कलेत्येवं य: षोडशकल: स षोडशीपुरुष: ।। अथैतस्य षोडशिन: पुरुषस्य त्रयो महिमान आत्मपोषा भवन्ति--प्रजा पशुर्वित्तमिति । एतैरात्मपोषै: संहितोऽयमात्मा यज्ञपुरुष: संपद्यते ।। तस्यैतस्य यज्ञस्य नभ्य आत्मा प्रधिर्वित्तमिति रूपं भवति । ते चैते यज्ञा अनेकविधा: संभवन्ति । तेषां पञ्चदशानां विभिन्नरूपाणां यत्रैकस्मिन् षोडशिनिश्छंदनादुपसंग्रहणं स्यात् स विराट् पुरुष: । अन्नं वै विराट् । वैराजो वै पुरुष:--इति तित्तिरिश्रुते: (तै० ब्रा० ३ । ९ । ८) ।। स चेश्वरजीवभेदाद् द्विविध: । तत्रैतस्मिन् जीवपुरुषे तानेतान् पञ्चदश यज्ञपुरुषानाख्यास्याम: ।।

आत्मानं द्विविधं विद्यात् सखण्डाखडभेदत: ।।
अखण्डात्मा निर्विशोष: सखण्डात्मा तु षोडशी ।। १ ।।
सन्ति पञ्चदशात्मनो भिन्ना: षोडशिनोऽन्विता: ।।
यत्रैकत्र स जीवोऽयं विराडात्मा निगद्यते ।।२ ।।

अंतर्य्यामी च सूत्रात्मा वेदात्मा चिन्मयोऽपि च ।।
इति चत्वार आत्मान: स्वंयभुव इहातता: ।।३ ।।
एक एव तु यज्ञात्मा परमेष्ठित आतत: ।।
विज्ञानात्मा च दैवात्मा द्वौ सूर्य्यादाततताविह ।।४ ।।
यज्ञातिशयजो नूत्नो दैव आत्मोपजायते ।।
तेनाकृष्ट: प्राज्ञ आत्मा स्वर्गं याति बलादिव ।।५ ।।
त्रिणाचिकेत: स्वर्ग्याग्नि: स्तोमे सप्तदशे: स्थित: ।।
स एवाहवनीयोऽयं स्वर्ग: संवत्सराभिध: ।।६ ।।
दैवात्मा तस्य नोदेति यो न यज्ञेन वर्तते ।।
यज्ञेन जन्यते दैव आत्मा कर्मात्मनि ध्रुवम् ।।७ ।।
आकृति: प्रकृतिश्चाहं कृतिरात्मा त्रिधा महान् ।।
इहाततश्चन्द्रमस: शरीरत्रययोनिभृत् ।।८ ।।
बाह्यात्मा चान्तरात्मा च भूतात्मा द्विविधो भुव: ।।
बाह्यात्मैष शरीरात्मा भूतभौतिकसंचय: ।।९ ।।
अंतरात्मा द्विधा हंस: कर्मात्मा च स भूतभृत् ।।
कर्म्मात्मा कर्म्मभोक्तात्मा स लोकानुपर्सपति ।।१० ।।
वैश्वानरस्तैजसात्मा प्रज्ञानात्मेति च त्रिधा ।।
स कर्म्मात्मा कर्म्मभोक्ता सोऽग्निवाय्विन्द्रसंहिता: ।।११ ।।
इत्थं पृथ्वीरसा: पृथ्व्या उत्थाय चितयोऽभवन् ।।
भूतात्मानस्तत: पञ्चविधा इत्यात्मसंग्रह: ।।१२ ।।

स्वयंभू: ४	परमेष्ठि: १	सूर्य्य: २	चन्द्र: ३	पृथ्वी ५
१ अंतर्य्यामी २ सूत्रात्मा ३ वेदात्मा ४ चिदात्मा	१ यज्ञात्मा	१ विज्ञानात्मा २ दैवात्मा	१ आकृतिमहान् २ प्रकृति महान् ३ अहंकृति महान्	१ बाह्यात्मा=शरीरात्मा ० अंतरात्मा २ हंसात्मा ० कर्म्मात्मा ३ वैश्वानर:=अग्नि: ४ तैजस:=वायु: ५ प्राज्ञ:=इन्द्र:

(४) आत्ममर्त्यप्रजासृष्टिक्रमपर्वाणि

आत्मा तमोऽमृतं ब्रह्म शुक्रं सत्वमिति क्रमात् ।।
आत्ममर्त्यप्रजासृष्टेः षट् पर्वाणि भवन्ति हि ।।१ ।।
क्षर आत्मैष रेतस्त्वं पाप्मना यात्यविद्यया ।।
कर्म्मभेदादिदं रेतश्चतुर्धा प्रतिपद्यते ।।२ ।।
अमृतं ब्रह्म शुक्रं च सत्वं चेति क्रमाद् भवेत् ।।
नातोऽन्यद् वर्तते किञ्चिद् यदिदं दृश्यते जगत् ।।३ ।।
अमृतं मौलिकं द्रव्यमेकद्रव्यमयौगिकम् ।।
अमृतान्येव संसृष्टिमुपेत्यायान्ति मर्त्यताम् ।।४ ।।
अमृतानां मिथो मूलग्रन्थितो ब्रह्म जायते ।।
ब्रह्मग्रन्थिवशाच्छुक्रं जायते ब्रह्मणां मिथः ।।५ ।।
शुक्राणां हृदयग्रंथिवशात् सत्वं प्रजायते ।।
ग्रंथिभिः संचरोऽथैषामुद्ग्रन्थिः प्रतिसंचरः ।।६ ।।
सत्वेषु शुक्रं, शुक्रेषु ब्रह्म, ब्रह्मसु चामृतम् ।।
सत्यमाख्यातमात्मत्वात् सत्यं सत्यस्य चामृतम् ।।७ ।
सत्वं विराट्, शक्रमन्नं, ब्रह्मासङ्गमथामृतम् ।।
दिग्देशाद्यनवच्छिन्नं, तदेकैकमनेकधा ।।८ ।।

(५) आत्मगतिविद्या

(१) योनिर्गतिः कर्म्मगतिर्द्वे गती नापरा गतिः ।।
यत्र कर्म्मगतिर्नास्ति तत्र योनिगतिः स्वतः ।।१ ।।
सूर्य्यस्तदनुकूलास्तत्प्रतिकूलाः सहस्रशः ।।
लोका महिमाभिस्तेषां प्रजायन्ते प्रजा भुवि ।।२ ।।
आत्मा सूर्य्यरसः प्राज्ञस्तत्र लोकरसाश्रिताः ।।
विरुद्धा अविरुद्धा वा कर्म्मभिस्ता हि वासनाः ।।३ ।।
यल्लोकवासना यत्र तारतम्येन विद्यते ।।
सा वासना तमात्मानं तं लोकं नयते बलात् ।।४ ।।
अन्याहितबलाकृष्टं लोष्टमूर्ध्वमधस्तिरः ।।
प्रयाति पारतन्त्र्येण प्राज्ञो लोकांस्तथैति तान् ।।५ ।।

क्रियाहितबलं कर्मवासना क्षीयते यदि ।।
भोगात्तदात्मा स प्रत्यावर्तते पृथिवी धृता: ।।६ ।।
कामो हि वासनाहेतुर्निष्कामस्य न वासना ।।
निर्लेप: सूर्य्यमभ्येति विद्ययोर्ध्वं प्रयात्यत: ।।७ ।।
(२) आत्मभेदात् कर्म्मभेदात् पृथक्कर्मत्मनामित: ।।
गतय: सांपरायिक्य: संपद्यन्ते विलक्षणा: ।।१ ।।
कैवल्ये मुक्तिरपरा स्वर्गौ दैवतपैतृकौ ।।
दुर्गत्यगतिपश्चत्वान्यात्मनोऽष्टविधा गति: ।।२ ।।
ये योनिभ्यो विभिन्नेभ्य: पृथिव्यामिह संचिता: ।।
आत्मनस्ते ततो मुक्ता: क्रमन्ते स्वस्वयोनिषु ।।३ ।।
इहैव तस्य लीयन्ते प्राणा: कैवल्यमस्ति तत् ।।
निवृत्तकर्मा निष्कामकर्म्मा नोत्क्रमते क्वचित् ।।४ ।।
अनुत्क्रान्तिरियं मुक्ति: क्षीणोदर्काऽणिमानुगा ।।
भूमोदर्का परा मुक्ति: सर्वमात्मैव तस्य हि ।।५ ।।
यस्य हृद्ग्रन्थय: सर्वेऽप्युद्भिन्ना आत्मविद्यया ।।
तस्य कर्म्माणि लुप्यन्ते सर्वमात्मैव सिध्यति ।।६ ।।
"विद्यया तदारोहन्ति यत्र कामा: पराहता: ।।
न तत्र दक्षिणा यन्ति नाविद्वांसस्तपस्विन:" ।।७ ।।
कामप्रमपुनर्मारमशोकमहिमं च यत् ।।
तदारोहति सालोक्यसामीप्यादिसमृद्धिभाक् ।।८ ।।
यस्तु यज्ञतपोदानैर्विद्यासंस्कृतकर्मभि: ।।
प्रयात्ति देवलोकान् स स्वर्गान् सप्ताधिरोहति ।।९ ।।
इष्टापूर्तानुदत्तानि कर्माणि सुकृतानि य: ।।
चरत्येष पितृस्वर्गांस्त्रिविधानधिरोहति ।।१० ।।
"उदन्वती द्यौरवमा पीलुमतीति मध्यमा ।।
तृतीया ह प्रद्यौरिति यस्यां पितर आसते" ।।११।।
यस्तु दुष्कृतकर्मस्थो दुर्गतिं स हि गच्छति ।।
सूर्य्यस्य प्रति दिग्भागे यमलोकान् स धावति ।।१२ ।।
"असूर्य्या नाम ये लोका अन्धेन तमसा वृता: ।।
तांस्ते प्रेत्याभिगच्छन्ति ये के चात्महनो जना:" ।।१३ ।।

अनस्थिकास्तु ये जीवास्तेषामुत्क्रमणं न हि ।।
जायन्ते च म्रियन्ते च भूमावेवागतिर्हि सा ।।१४ ।।
इत्थं कर्मात्मनामेता गतयः सप्तधोदिताः ।।
हंसात्मनोऽपि न गतिश्चन्द्रादर्वाक् स वर्तते ।।१५ ।।
बाह्यात्मा तु शरीरात्मा पञ्चभूतानि कायजः ।।
स पञ्चत्वं गतः पञ्चभूतेष्वेषु विलीयते ।।१६ ।।
इत्थं भूतात्मनामेता भवन्ति गतयोऽष्टधा ।।
पञ्च देवाश्च पञ्चत्वमायान्ति प्रकृर्ति गताः ।।१७ ।।
अथाकृतिमहान्तस्तु भूतानां मूर्तयः पृथक् ।।
चतुराशीतिलक्षाणि योनयः कर्म्मबन्धनाः ।।१८ ।।
मिथस्ताः परिवर्तन्ते योनयः कर्म्मबन्धनाः ।।
ब्रह्मादिस्तम्बपयकर्यन्ताः संसारगतिरस्ति सा ।।१९ ।।
अहंकृतिर्म्महान्निस्यः स चन्द्रमनुधावति ।।
शरीरबनान्मुक्तं चन्द्रेणैकी भवेन्मनः ।।२० ।।
''अशरीरं शरीरेषु अनवस्थेष्ववस्थितम् ।।
महान्तं विभुमात्मनं मत्वा धीरो न शोचति'' ।।२१ ।।
दैव आत्मा कर्मजन्यो भोगक्षीणेन कर्मणा ।।
महैव रूपतः क्षीणः कर्पूत इव लुप्यते ।।२२ ।।
प्रज्ञानात्मग्रन्थिमुक्तो विज्ञानात्मा क्षणादिव ।।
चाक्षूषः पुरुषोऽसङ्गः सूर्य्येणैकीभवत्ययम् ।।२३ ।।
यज्ञश्चिदात्मा वेदात्मा सूत्रात्मा सत्यमित्यपि ।।
सद्यः समवलीयन्ते नोत्क्रमन्ते पदान्तरम् ।।२४ ।।

पन्थानः

(१) देहत्यागानन्तरमात्मानां लोकान्तरसंचरणं गतिः । गतिहेतुर्नियतो देशः पन्थाः ।। पितृयाणो देवयानश्चेति द्वौ पन्थानौ ।दक्षिणमार्गः । धूममार्गः । कृष्णमार्गः । पितृमार्ग इत्यभिन्नोऽर्थः । उत्तरमार्गः । अर्चिर्मार्गः । शुल्कमार्गः । देवमार्ग इत्यभिन्नोऽर्थः । पितृयाणस्य द्वे शाखे--यमपथः, पितृपथश्चेति । देवयानस्य द्वे शाखे--देवपथो ब्रह्मपथश्चेति । तेनैते चत्वारः पन्थानः ।। अत एवैता गतयोऽपि चतस्रो भवन्ति--परमागतिः । उत्तमागतिः । सद्गतिर्दुर्गतश्चेति ।। ब्रह्मपथे संचारः परमागतिः । देवपथे गतिरुत्तमा । पितृपथे सद्गतिः । यमपथे दुर्गतिरिति भाव्यम् ।।

(२) तयोश्च पितृयानदेवयानयोः षड्रूपोपपादका भवन्ति कर्म्माणि । नाड्यः ।आकाशः। छन्दांसि देवाः आतिवाहिकाश्चेति । तत्र कर्म्माण्येवैतयोः प्रतिपत् ।। तथा हि--विद्यानिरपेक्षकर्म्ममयः पितृयाणाः। तत्राकर्म्मविकर्म्माणि यमपथः। सुकृतानि तु कर्म्माणीष्टापूर्तदत्तानि पितृपथः।। विद्याप्रधानो देवयानः। तत्र विद्यासमुच्चितानि प्रवृत्तिपक्ष्याणि सकामकर्म्माणि यज्ञतपोदानानि देवपथः। एतान्येवाकामकृतानि निवृत्तिपक्ष्याणि विद्यामात्राणि ब्रह्मपथः।। "विद्यया तदारोहन्ति यत्र कामाः पराहताः। न तत्र दक्षिणा यन्ति नाविद्वांसस्तपस्विनः"।। परेत्वाहुः निष्कामकारिणां न प्राणा उत्क्रमन्ति इहैव समवलीयन्ते। नारोहन्ति न तेषामपेक्ष्यते पन्थाः। येषां तु हृदयग्रन्थय उद्भिद्यन्ते तेषां कर्म्माणि क्षीयन्ते। तेनैषामुद्रिक्तविद्यानामेष ब्रह्मपथो द्रष्टव्यः। तदुक्तम्-"यदा सर्वे प्रमुच्यन्ते कामा येऽस्य हृदिस्थिताः। अथ मर्त्योऽमृतो भवति अत्र ब्रह्म समश्नुते" ।।१ ।। यदा सर्वे प्रभिद्यन्ते हृदयस्येह ग्रन्थयः। अथ मर्त्योऽमृतो भवति एतावदनुशासनम् ।। इति ।। ग्रन्थिः कर्मणां मर्त्यानामुत्पत्तौ हेतुः। ग्रन्थिविमोके मर्त्यान्यमृतानि भवन्ति ।। अतएवामृतमयेऽस्मिन्नपुनमरि कामप्रलोकेऽशोकमहिमलोके च गतानामात्मनां सर्वे कामाः परागता भवन्ति--इति विद्यात् ।।

(३) अथ नाड्यः। शरीरस्य हृदयादधोगामिन्यो नाड्यः पितृयाणः। हृदयादुर्ध्वगामिन्यो देवयानः। मूलाधारगतानाडी यमपथः। अधस्ताद् विषूचीना नाड्यः पितृपथः। ऊर्ध्वास्तु विषूचीना नाड्यो देवपथः। मूर्धानमभिनिःसृता त्वेका नाडी ब्रह्मपथः। तत आदित्यं ततो विरजसं समेति। ब्रह्मविद् ब्रह्मैव भवति ।। शतं चैका च हृदयस्य नाड्यास्तासां मूर्धानमभिनिः - सृतैका। तयोर्ध्वमायन्नमृतत्वमेति विष्वङ्ङन्या उत्क्रमणे भवन्ति। "अणुः पन्थाविततः पुराणो मां स्पृष्टोऽनुवित्तो मयैव तेन धीरा अपियन्ति ब्रह्मविदः स्वर्गलोकमित ऊर्ध्वं विमुक्ताः ।।२ ।। तस्मिंछुल्कमुत नीलमाहुः पिङ्गलं हरितं लोहितं च ।। एष पन्था ब्रह्मणा हातु वितस्तेनैति ब्रह्मवित् पुण्यकृत् तैजसश्च" ।।३ ।। इति वाजिश्रुतेः। "अनन्ता रश्मयस्तस्य दीपवद् यः स्थितो हृदि। सितासिताः कद्रु नीलाः कपिलामृदुलोहिताः ।।१ ।। ऊर्ध्वमेकः स्थितस्तेषां यो भित्वा सूर्य्यमण्डलम्। ब्रह्मलोकमतिक्रम्य तेन याति परां गतिम् ।।२ ।। यदस्यान्यद् रश्मिशतमूर्ध्वमेव व्यवस्थितम् ।। तेन देवनिकायानां स्वधामानि प्रपद्यते ।।३ ।। तेनैकरूपाश्चाधस्त्द् रश्मयोऽस्यमृदुप्रभाः। इह कर्मोपभोगाय तैः संसरति सोऽवशः" ।।४ ।। इति मैत्रिश्रुतेश्च ।।

(४) अथाकाशः। तत्रागस्त्यादुत्तरतोऽजवीथ्याश्च दक्षिणतो द्वाचत्वारिंशदंशाः पितृपथः पितृयाणः। तताऽधस्ताद्यमपथः। एवं सपर्षिभ्यो दक्षिणातो नागवीथ्यास्तूत्तदरो द्वाचत्वारिंशदंशा देवपथो देवयानः। तत ऊर्ध्वं ब्रह्मपथो देवयानः। इत्थं कर्म्मविशेषाः। गात्रविशेषाः। व्योमविशेषाश्चेतिः त्रय एवामी देवयानाः पन्थानः स्युः।। 'त्रियो वै देवयानाः पन्थानः" - इत्युत्तरगोपथश्रुतेः।।गो० उ०। १ । १ ।।

(५) अथ च्छन्दांसि। छन्दिताः प्राणाश्छन्दिता वाचश्च च्छनदांसि। तत्र वाचः पितृयाणः पन्थाः। प्रणास्तु देवयानः पन्थाः। यथाह तित्तितिसंहितायाम्--"छन्दांसि वै देवयानः पन्थाः। गामत्री त्रिष्टुब् जगती। ज्योतिर्वै गायत्री। गौस्त्रिष्टुप्। आयुर्जगती। यदेते स्तोमा भवन्ति देवयानेनैव तत् पथा यन्ति" ।। ७।। ५।। १ ।।

अथ देवाः। अग्निर्देवयानः सोमः पितृयाणः। "त्वं तन्तुरुत सेतुरग्रे त्वं पन्था भवसि देवयानः। त्वयाग्ने पृष्ठं वयमारुहेम यत्र देवैः सधमादं मदेम" ।। १ ।। इति मैत्रिश्रुतेः (२ । १३ । २२) ।।

(६) अथातिवाहिका: । धूमो रात्रि: । कृष्णपक्ष: । दक्षिणायनमासा: । सौम्यसंवत्सराख्य: पितृलोक: । आकाश: । चन्द्रमा: । इति पितृयाणा: । अर्चि: अह: । शुल्कपक्ष: उत्तरायणमासा: । सौरसंवत्सरो देवलोक: । इत्येतावानग्निलोक: । ततो वायुलोक: । तत: आदित्यलोक: । ततश्चन्द्रमा: वैद्युत: । ब्रह्मलोका: । इति देवयान: । बृ० आ० ६ । २ ।। छां० ४ । १५ ।। छां० ५ । १० ।। चन्द्रमा: स्वर्गस्य द्वारम् । ततो याति यमपथं वा पितृपथं वा । तत एव याति देवपथं वा ब्रह्मपथं वा । अथ क्षीणे पुण्ये मर्त्यलोकं विशन्ति क्षीणे पापे मर्त्यलोकं विशन्ति । तेषाममुत्र भुक्तभोगानां पितृलोपद्वा देवलोकद्वाऽवरोहणे मनुष्यलोकप्राप्तौ द्वादशतिवाहिका भवन्ति । चन्द्र: । आकाश: । वायु: । धूम: । अभ्रम् । मेघ: । वृष्टि: । पृथिवी । अन्नम् । रेत: । पुरुष: । स्त्रीति । एतैरेवातिवाहिता: पञ्चमायामाहुतौ खल्वाप: पुरुषवचसो भवन्तीति दिक् ।। तथा च पितृयाणकर्म्मा भूतात्मा कितृयाणडीभिरेवोत्क्रान्त: पितृयाणेनैवाकाशमार्गेण प्रस्थित: पितृयाणैरेवातिवाहिकैरतिवाहित: क्रमेण स्वगन्तव्यं लोकमभ्येति । एवं देवयानकर्म्मापीति विद्यात् ।।

(७) दिव: श्येनयोऽपाद्याश्चानुवित्तय:

आशाकामो ब्रह्मयज्ञ आपोऽग्निर्बलिमाँस्तु य: ।।
अनुवित्तिश्च सप्तैता द्वार: स्वर्लोकसंपदे ।।१ ।।
दिव: श्येनय इत्युक्ता आप्येता अनुवित्तय: ।।
एताभिरनुविन्दन्ति स्वर्गं सप्तभिरिष्टिभि: ।। २ ।। तै० ब्रा० ३ । १२ । २ ।।
तप: श्रद्धासत्यमनश्चरणानीति पञ्च वा ।।
द्वार: स्वर्गस्य लोकस्य अपाद्या अनुवित्तय: ।।३ ।।

(८) लोकविद्या

एको लोक आत्मा ।।१ ।। द्वौ लोकौ रोदसी ।।२ ।। त्रयो लोकास्त्रीणि भुवनानि पृथिव्यन्तरिक्षं द्यौ: ।।३ ।। चत्वारो लोक:--पृथिव्यन्ततिक्षं द्यौराप इति । पञ्च लोका:--पृथिव्यन्तरिक्षं द्यौ: दिगाप इति ।। त्रयो लोकास्त्रीणि रजांसि भूर्भुव: स्व: ।।४ ।। सप्तलोका: सप्तरजांसि भू: । भुव: । स्व: । मह: । जन: । तप: । सत्यमिति ।।५ ।। देवलोक:पितृलोको जीवलोक:-इत्येते त्रयो लोका: ।। इन्द्रो वै देवलोक: । यम: पितृलोक: । मनुष्यलोको जीवलोक: । पुत्रेण मनुष्यलोक:, कर्म्मणा पितृलोको, विद्यया देवलोको जय्य: ।।६ ।। श्रग्निलोको वायुलोको वरुणलोक: इन्द्रलोक: प्रजापतिलोको ब्रह्मलोक:--इत्येते देवयानलोका: षट् कौषीतकीयानाम् ।। अग्निलोक: । वायुलोक: । आदित्यलोक: । चन्द्रलोक: । अशोकमहिमलोक:--इत्येते देवयानलोका वाजसनेयिनाम् ।। अग्नि: । वायु: । इन्द्र: । वरुण: । चन्द्र: प्रजापति: ब्रह्म--इति सप्तैते देवयानलोका अन्येषाम् ।। देवलोको देवस्वर्गलोक: स्वर्गलोक इति तुल्योऽर्थ: सप्तैते देुलोका भवन्ति सप्तस्वर्गा:--

अग्नेरपोदको वायोर्कूर्तधामाऽपराजित: ।।
इन्द्रस्याऽथैकविंशोऽन्तर्नाको ब्रध्नस्य विष्टपम् ।।१ ।।

सूर्य्यगर्भोऽत्र च स्कम्भो नाकस्तस्य शिरोऽपर: ।।
अधिद्यौर्वारुण: प्रद्यौर्मृत्योर्ब्राह्मस्तु रोचन: ।।२ ।।
प्रजापतेर्विभान्नाम लोक इत्याह तित्तिरि: ।।
प्रथमे संहिताकाण्डे सप्तमस्य च पञ्चमे ।।३ ।। १ ।६ ।५ ।।
स स्वर्गमेव तल्लोकं रूढ्वा ब्रध्नस्य विष्टपम् ।।
अभ्यतिक्रामतीत्युक्तं ताण्ड्यस्य जयसप्तमे ।।(१८ । ७) ।।
सन्धीयेते यत्र चैतौ त्रयस्त्रिंशौ तु मध्यत: ।।
ताण्ड्ये धूपे नये प्रोक्तमेष ब्रध्नस्य विष्टप: । ता० १९ । १० ।
त्रिणाचिकेत: स्वर्ग्याग्निरादौ सप्ततश: स्तुत: ।।
कामप्रो वैद्युत: पञ्चविंश ऐन्द्रोऽस्ति सोऽन्तत: ।।४ ।।
अग्नेरूर्ध्वमधस्त्विन्द्रादैन्द्राग्नोऽग्निस्त्रिवृत् कृत: ।।
स यज्ञस्तद्गता देवलोका: स्वर्गास्तु सप्त ते ।।५ ।। (तां० १८ । २ ।)
आद्य: स्वर्ग: सप्तदशो द्वितीयस्त्वेकविंशक: ।।
तृतीय: पञ्चविंशोऽयं त्रय: स्वर्गा विशषत: ।।६ ।।
ब्रह्मविष्टपमेष्वाद्यं मध्यमं विष्णुविष्टपम् ।।
वैद्युतं विष्टपं त्वैन्द्रं स्वर्गमाहुस्त्रिविष्टपम् ।।७ ।।
स्वर्ग: संवत्सरो यस्तन्मध्य आहवनीयक: ।।
श्रूयते तं विजानीयादाद्यं सप्तदशं स्तुतम् ।।८ ।।
हिरण्मयं यत्परं भास्तपत्येष प्रजापति: ।।
स स्वर्ग इति यं प्रहुस्तं विद्यादेकविंशकम् ।।९ ।।
एतदूर्ध्वं समादोहन् देवाश्चित्वा विराट् चितम् ।।
स्वर्गं लोकं नाकमेति पश्यन्तस्तमुपादधु: ।।१० ।।
स्वर्गो लोक: स नाकोऽयं स्तोमभागाहि या: स्तुता: ।।
तिस्रस्तिस्रस्त्रयो लोका दिशश्चेत्येकविंशति: ।।११ ।।
एकविंश्यां प्रतिष्ठायां स्तोमभागाष्टकं परम् ।।
प्रतिष्ठितं ब्रह्म विराट् स नाक इति भाव्यताम् ।।१२ ।।
ऊनत्रिंशत् स्तोमभागाश्छन्दस्यान्नस्य ते रसा: ।।
त इन्द्रलोकास्तैरिन्द्रं प्रपन्नोऽसौ प्रजापति: ।।१३ ।।
सर्वे देवास्त्रयस्त्रिंशदहानि विभवन्त्यमी ।।
प्रजापतिश्चतुस्त्रिंशोऽतिशेते नाक एव स: ।।१४ ।।

न हि प्रजापतिः कस्मैचिदकं नाक एव सः ।।
इत्याह ताण्ड्यदशम--प्रथम --द्वादशीश्रुतिः । (१० । १ । १२) ।। १५ ।।

।। इति देवलोकाः ।।१ ।।

उदन्वती द्यौरवमा पीलुमतीति मध्यमा ।।
तृतीया ह प्रद्यौरिति यस्यां पितर आसते ।। १० ।। अ० सं० १८ । २ ।४८ ।।
उदन्वती जलप्राया पीलुमत्यटवीमयी ।।
प्रद्यौर्ज्योतिष्मती भूमिः सौम्याः स्वर्गा इमे त्रिधा ।।

सप्त यामाया लोकाः । तेषामेकैकस्य चत्वाश्चत्वारो भेदा इत्यष्टाविंशतिर्यमलोकाः । तेषामप्येकैकस्य यस्त्रयोऽवान्तरभेदा इति चतुरशीतिर्यमलोकाः पौराणिकैरादिश्यन्ते ।। एषां नामानि पुराणतोऽवसेयानि ।।

।। इति पितृलोकाः ।।२ ।।

अष्टौ सत्वविशलास्तमो विशालास्तु पश्चाधः ।।
मध्ये रजोविशालो मानुष एकः प्रवर्तते सर्गः ।।१ ।।
ब्रह्मादिस्तम्बपर्य्यन्ता याश्चतुर्दशयोनयः ।।
ते चतुर्दशलोकास्तानन्वात्मा विचरत्ययम् ।।२ ।।
ते जीवलोकाः संसारलोकाः कर्मनिबन्धनाः ।।
उच्चावचाः सुखं दुःखं तेषु चात्मा भुनक्ति हि ।।३ ।।

।। इति जीवलोकाः ।।३ ।।

तिस्रो दिवस्तिस्रः पृथिवीस्त्रीण्यन्तरिक्षाणि चतुरः समुद्रान् ।।
त्रिवृतं स्तोमं त्रिवृत आप आहुस्तास्त्वारक्षन्तु त्रिवृता त्रिवृद्धिः ।। अथ० १९ । ४ ।३ ।।
त्रीन्नाकांस्त्रीन् समुद्रांस्त्रीन् ब्रध्नांस्त्रीन् वैष्टपान् ।
त्रीन्मातरिश्वनस्त्रोन् सूर्य्यान् गोप्तॄन् कल्पयामि ते ।।४ ।।

(८) दिक्प्रपत्तिः

षड् दिशो भवन्ति--प्राची देवानाम् । दक्षिणा पितॄणाम् । प्रतीची असुताणाम्। उदीची मनुष्याणाम् । उर्ध्वा ब्रह्मणः । अधरा विष्णोरनन्तस्येति ।।१ ।। प्राची दिगग्निर्देवता । दक्षिणा दिगिन्द्रो देवता । प्रतीची दिक् सोमो देवता । उदीची दिग् मित्रावरुणौ देवता । ऊर्ध्वा दिग् बृहस्पतिर्देवता । इयं दिगदितिर्देवता । पुरुषो दिक् ।। तै० ब्रा० ३ ।११ ।५ ।।

अपि वा दश दिशो भवन्ति। पूर्वा तावदिन्द्रस्य, पूर्वदक्षिणा त्वग्नेः। दक्षिणा यमस्य दक्षिणापश्चिमा निर्ऋतेः। पच्चिमा वरुणस्य। पश्चिमोत्तरा वायोः। उत्तरा सोमस्य। उत्तर पूर्वा--ईशानस्य। ऊर्ध्वा ब्रह्मणः। अधरा अनन्तस्येति ॥२॥ अथ पञ्चस्थानदिशः प्राहुः समित्। उग्रा। विराट्। उदीची। ऊर्ध्वा चेति ॥३॥

प्राची दिक् प्राची। सेयमूर्क्। सासौ द्यौः॥ दक्षिणा दिग् दाक्षिण्यं स लोकस्तदन्तरिक्षम्। प्रतीची दिगाशा। सेयं श्रीः। सेयं पृथिवी। उदीची दिगापः। सोऽयं धर्म्मः सा दिक्॥ इति श्रूयते। अयं भावः। प्राची संमुखता सापेक्षता तत ऊर्ग् बलं प्रवर्तते। शरीरे प्राणे मनसि च बलाधानमूर्ग् भावः॥ एवम् दाक्षिण्यमुदारभावः। ततोऽयं पुरुषो लोको भवति। शरण्य अश्रणीयः प्रतिष्ठालोकः। एवम्--आशा आशंसनम्। निश्चितस्य लाभस्य प्रतीक्षणमाशा। अनिश्चितस्यापेक्षाकामः इति सायणः॥ तै० ब्रा० ३।१२।२॥ अपि वा अनेन कर्म्मणाऽमुष्माद्वा पुरुषान्मम कामः सेत्स्यतीति धारणैवाशा॥ ततः श्रियं विन्दते उन्नतिं लभते। अथ आप एव प्रत्यर्थमन्तर्गता धर्म्मा भवन्ति। यदेमं लोकमाप आगच्छन्ति सर्वमेवेदं यथाधर्म्मं भवतीति। आप एवैते वस्तु धर्म्मा भवन्ति। इति विद्यात्॥

इत्यष्टमः पाठः॥८॥

(१) यज्ञप्रतिपत्तिः

प्रजापतेर्विस्रंसमानस्य-अन्नाधानद्वारा भैषज्यादविस्रंसनं यज्ञः। एको यज्ञः संवत्सराग्नेर्वा वैश्वानराग्नेर्वा संस्कारः॥१॥ द्वौ यज्ञौ--स्वयंभूयज्ञः कृत्रिमयज्ञश्च। देवैर्भाव्यमानाः परमे व्योम्नि संपद्यमानाःपृथ्वीचन्द्रसूयकर्यादयो यज्ञाः स्वयंभुवो दृश्यन्ते। ये तु मनुष्यैः पारत्रिकानैहिकान् वा कामानुद्दिश्य क्रियन्ते ते कृत्रिमाः स्युः॥ २॥ अपि वा यज्ञस्त्रेधा -इष्टयःपशवः सोमाश्चेति। पशुविकलायामाज्याहुताविष्टिशब्दः॥ वपामांसप्रदाने पशुशब्दः। ग्रहयागे सोमशब्दः॥३॥ अपि वा यज्ञः पञ्चधा--हवनं निर्वपणं सवन सादनं चयनं चेति। अग्नावाज्योपधानं हवनम्। अग्नौ वपामांसोपधानं निर्वपणम्॥ अग्नौ ग्रहसुत्या सवनम्। दुर्बलात्मनः प्रवलात्मनानुबन्धनं तदायत्तीकरणं संसादनम्। अग्नावग्निचित्या चयनमिति विद्यात्॥४॥

अन्नं सत्त्रं चितिश्चेति यज्ञस्त्रेधा। इष्टयः पशवः सोमा इति त्रयोऽन्नयज्ञाः। बलवत्यबलाधानं सत्त्रम्। समबलयोः संसृष्टिश्चितिः॥ अपि वा यज्ञः पञ्चधा-पाकयज्ञः हविर्यज्ञः महायज्ञः अतियज्ञः शिरोयज्ञश्चेति॥

पाकयज्ञः

यावानेकाग्नौ यज्ञो यावान् वाऽनग्नौ यज्ञः स पाकयज्ञः। स हि चरुपाकत्वात् पाकः। स्वल्पकायत्वाद्वा पाकः। हिंसादिदोषराहित्याच्च पाकः। सोऽयमेकान्यः स एकबर्हिः स एकस्विष्टकृदिति कृत्वैकविधः पाकयज्ञः॥१॥ स्थालीपाकः पाशुपाकश्चेति द्विविधः पाकयज्ञो लाट्यायनादीनाम्॥२॥ व्रतचर्य्याः शान्तिकर्म्माणीति द्विविधः पाकयज्ञो मानवादीनाम्॥३॥ इष्टमापूर्तं दत्तं चेति त्रिविधः पाकयज्ञ एकेषाम्॥

हुतः प्रहुतो ब्रह्माणि हुत इति त्रिविधः पाकयज्ञ आश्वलायनादीनाम् ।। हुता अग्नौ हूयमानाः, अनग्नौ प्रहुताः, ब्रह्मणाभोजनं ब्रह्मणि हुताः ।।४ ।। हुतः अहुतः प्रहुतः प्राशित इति चतुर्विधः पाकयज्ञः पारस्करादीनाम् । यत्र होममात्रं स हुतः । होमो बलिहरणं चेति प्रहुतः । यत्र भोजनं स प्राशितः । अन्यदेभ्यश्चेत् सोऽहुतः ।।५ ।। व्रतं वृद्धिः पित्र्यं पशुः स्थालीपाकः-इति पञ्चविधः पाकयज्ञः ।।६ ।। सायं प्रातर्नित्यहोमौ स्थालीपाको नवश्च यः ।। बलिश्च पितृयज्ञश्च अष्टकाः सप्तमः पशुः । इत्येते पाकयज्ञाः स्युरिति गोपथश्रुतिः ।।७ ।। अष्टकान्वष्टकाः पार्वणश्राद्धं श्रावण्याग्रहायणी चैत्र्याश्वयुजीति सप्तपाकयज्ञसंस्था सुमन्तुगौतमादीनाम् ।।८ ।। हुतः प्रहुतः श्रूलगवः बलिहरणं प्रत्यवरोहणमष्ठका होम इति सप्त पाकयज्ञसंस्था वौधायनादीनाम् ।।९ ।। औपासनहोमो वैश्वदेवं पार्वणमष्टका, मासिकश्राद्धं सर्पबलिरीशानबलिरिति सप्तपाकयज्ञसंस्था आपस्तम्बानुयायिनाम् ।।१० ।। व्रतपाकाः वृद्धिपाकाः, पित्र्यपाका, पशुपाकाः स्थालीपाकाः उपयाचिकाः, काम्यपाकाः, पूर्तं दत्तं चेति नवधा पाकयज्ञा अन्येषाम् ।।११ ।। प्रतिपत्तिभेदमात्रं न वस्तुभेदः ।। अपि चाहुः । हुतं प्रहुतं ब्रह्माणि हुतमित्युक्तम् । तत्र हुतपाकयज्ञस्त्रेधा स्थालीपाकः पशुः श्राद्धं च । स्थालीपाकः सप्तधा-आवसथ्याधानम् । औपासनम् । पार्वणस्थालीपाकः । नभ्यकर्म्माणि आग्रयणम् । गृह्यस्थालीपाकाः । काम्यपाकाश्चेति । एषामप्युत्तरे भेदा यज्ञमधुसूदने व्याख्याता द्रष्टव्याः ।।

हविर्य्यज्ञः

हविर्यज्ञस्त्रिविधः-इष्टिः पशुः पित्र्यं च । तत्रेष्टिः सप्तधा-अग्न्याधेयम् । अग्निहोत्रम् । दर्शपूर्णमासम् । चातुर्मास्यम् । आग्रयणम् । इष्ट्ययनानि । काम्येष्टयश्चेति । अपूर्वाधानम् । अन्वाधानम् । पुनराधानम् । तृतीयाधानम् । विच्छिन्नाग्न्याधानं चेति पञ्चविधान्यग्न्याधेयानि ।। अहोरात्रपर्वद्वययागोऽग्निहोत्रम् । मासपर्वद्वययागो याविहोत्रम् । ऋतुमुखपर्वत्रययागश्चातुर्म्मास्यम् । नवसस्योष्टिराग्रयणम् तत्र श्यामाकाग्रयणकालो वर्षाः । व्रीह्याग्रयणकालः शरत् । अथ यवाग्रयणकालो वसन्त इति तत् त्रेधा ।। इष्टिविकृतिरूपा अयनयागा इष्ट्ययनानि । अनुनिर्वाप्याः अदीक्षितायनानि प्रायश्चित्तीयाः क्रत्वर्थीया इति चतुर्विधानीष्ट्ययनानि । अष्टापञ्चाशद्वा ततोऽप्यधिका वा काम्येष्टयः ।।

पशुरिति पशुबन्धो नाम । स चतुर्धा-निरूढपशुबंधः । अग्नीषोमीय पशुबन्धः । सौत्रामणी पशुबन्धः । चयनीयपशुबंधश्चेति । अपि वा द्विविधः पशुबन्धः-हविर्यज्ञविधोऽन्यः । सवयज्ञविधोऽन्यः ।।

अथ पित्र्यं पिण्डपितृयज्ञाख्यं पितृकर्मद्विविधम् । पुरुषार्थं क्रत्वथं च ।। चातुर्मास्यादियज्ञान्तराङ्गभूतं क्रत्वर्थम् । एतच्च पित्र्येष्टिः पितृयज्ञो महापितृयज्ञ इत्यप्युच्यते ।। इत्युक्तो हर्वियज्ञः ।।

महायज्ञः

अथ महायज्ञो द्वे धा-सोमः सुरा च । सोमः पञ्चधा-एकाहः, अहीनः, रात्रिसत्त्रम्, अयनसत्त्रम्, महासत्त्रं चेति । एकेनाह्ना साध्यः एकाहः । द्विरात्रादयो दशरात्रान्ता अनेकाहसाध्या अहीनाः । छन्दोमदशाहस्त्रिककुब्दशाहश्चेति दशाहो द्विविधः । एकादशरात्रमारभ्य शतरात्रान्तानि बहुरात्रसाध्यानि

रात्रसत्राणि शतरात्रादूर्ध्वं सहस्त्ररात्रिपर्य्यन्तमयनसत्राणि। तदित्थमेकदशशतसहस्रभेदाच्चतुर्धा सोमा इत्येकं मतम्।।

द्विरात्रमारभ्य द्वादशरात्रपर्यन्तमहीनाः। एकादशरात्रमारभ्य संवत्सरादर्वाग् रात्रिसत्राणि। एकसंवत्सरसाध्यमारभ्य सहस्रसंवत्सरपर्य्यन्तमयनसत्राणि तथा चैकादशाहो द्वादशाहश्च द्वेधा भवतः। अहीनभूतःसत्रभूतश्च। तत्रापि द्वादशाहो द्विविधः-व्यूढद्वादशाहो भरतद्वादशाहश्च। तदित्थमेकाहद्वादशाहैकसंवत्सर सहस्रसंवत्सरभेदाच्चतुर्धा सोमा इत्यपरं मतम्।। सहस्रसंवत्सरस्त्वयं यज्ञः प्रतिनिधिभिः पञ्चभिरञ्जःसवैरुपपादनीयः। तापश्चितः संवत्सरो द्वादशाहः पृष्ठ्यषडहो विश्वजिच्चेति पञ्चाञ्जःसवा यज्ञाः। सहस्रसंवत्सरस्थाने तापश्चितं नाम त्रैसांवत्सरं सत्रं कुर्य्यात्। तत्स्थाने वा संवत्सरसत्रं सत्स्थाने वा द्वादशाहं तत्स्थाने वा पृष्ठ्यं षडहं, तत्स्थाने वा सर्वपृष्ठमेकाहं विश्वजितमेव कुर्य्यादित्यनुकल्पाः स्युः।।

अग्निष्टोमोऽत्यग्निष्टोम उक्थ्यः षोडशी अतिरात्रो वाजपेय आप्तोर्याम इति सप्त संस्थो ज्योतिष्टोमएकाहः।।१।। गोष्टोमायुष्टोमौ। सौमिकचातुर्मास्यानि गर्गत्रिरात्रं वैदित्रिरात्रम्। अश्वमेध इत्यादयोऽहीनाः।।

सप्तसंस्थो जायोतिष्टोमः, वैकारिकास्त्वष्टापञ्चशत्। इत्थमेकाहाः पञ्चषष्टिः।। द्व्यहाः पञ्च। त्र्यहाः पञ्चदशः। पञ्चाहाश्चत्वारः। चतुरहषडहदशाहद्वादशाहानां द्वौ द्वौ। सप्तहाष्टहनवाहैकादशाहा एकैका इत्थमहिना षट्त्रिंशत्।। रात्रिसत्राणि द्वात्रिंशत्।। ।। मुख्यानि ज्योतिषामयनानि दश।। गौणानि चत्वारि वैकारिकाणि गवामयनानि त्रीणि वैशेषिकाणि त्रीणि तापश्चितानि त्रीणि, बहुसांवत्सरिकाण्यष्टौ। सारस्वतानि त्रीणि। दार्षद्वतं चैकम्। इत्थमयनसत्राणि पञ्चत्रिंशत्। तत्र गवामयनम्। आदित्यानामयनम्। अङ्गिरसामयनम् - इति त्रीणि प्रधानानि।। अथ भूतयज्ञो मनुष्ययज्ञो देवयज्ञः पितृयज्ञो ब्रह्मयज्ञः इति पञ्चमहायज्ञः महासत्राणि।।५।। अथ कौकिली चरका चेति द्विविधा सौत्रामणी। तत्र सुराप्रचारः।। तदित्यं पञ्चसप्ततं शतं महायज्ञा आख्याताः।।१७।।

(२) अतियज्ञ-शिरोयज्ञौ

अश्वमेधः। राजसूयः। वाजपेयः। अग्निचित्या-इति चत्वारोऽतियज्ञाः। अथ शिरोयज्ञो घर्म्मयागः प्रवर्ग्ययागः। महावीरोपासना चेत्यनकोऽर्थः।।

यज्ञपरिशेषः

परे त्वाहुः औपासनहोमादयो नित्यहोमस्थालीपाकादयो वा सप्तपाकयज्ञसंस्थाः।। अग्निहोत्रं दर्शपूर्णमासम् आग्रयणं चातुर्मास्यानि निरूढपशुबन्धः सौत्रामणी पिण्डपितृयज्ञचतुर्होतृहोमादयो हविर्होमा इति सप्तहविर्यज्ञसंस्थाः। अग्निष्टोमादयः सप्तसोमसंस्थाः। इत्येवमेकविंशतिसंस्थः सर्वो यज्ञः। सप्तसुत्याः सप्त च पाकयज्ञा हविर्यज्ञाः सप्त तथैकविंशतिः। सर्वे ते यज्ञा अङ्गिरसोऽपि यन्ति नूतना यानृषयः सृजन्ति ये च सृष्टाः पुराणौः इति गोपथश्रुतेः। इत्थमेतावानेन सर्वो यज्ञः प्रतिपत्तव्यः।। ०।।

(१) यज्ञक्रमाः

अग्न्याधेयम् । पूर्णाहुतिः । अग्निहोत्रम् । दर्शपूर्णमासौ । आग्रयणम् । चातुर्मास्यानि । पशुबन्धः । अग्निष्टोमः । राजसूयः । अश्वमेधः । पुरुषमेधः । सर्वमेधः दक्षिणावन्तः । अदक्षिणाः । सहस्रदक्षिणाः । तं वा एते यज्ञक्रमाः ।। गो० पू० ५ ।।

(२) संवत्सराहर्विभागाः

संवत्सरस्य वै दशाहानि । दशाक्षरा विराट् । वैराजो यज्ञः ।।१।। नवाहानि । नव वै प्राणाः । प्राणैर्यज्ञस्तायते ।।२।। अष्टाहानि । अष्टाक्षरा गायत्री । गायत्रो यज्ञः ।। ३ ।। सप्तहानि । सप्तछन्दांसि । छन्दोभिर्यज्ञस्तायते ।। ४ ।। षडहानि । षड्वा ऋतवः ।। ५ ।। पञ्चाहानि । पञ्चपदा पंक्तिः । पाङ्क्तो यज्ञः ।। ६ ।। चत्वार्य्यहानि । चत्वारो वै वेदाः । वेदैर्यज्ञस्तायते ।। ७ ।। त्रीण्यहानि । त्रिषवणो वै यज्ञः । सवनैर्यज्ञस्तायते ।। ।। द्वे अहनी द्विपाद्वै पुरुषः । द्विप्रतिष्ठः पुरुषः । पुरुषो वै यज्ञः ।। ।। एकमहः । अहरहरित्येकमेव सर्वं संवत्सरं पश्यामः ।। तां० ४ । २४ ।।

(३) सहस्रसंवत्सरप्रतिमाः

सहस्रसंवत्सरो यज्ञो दीक्षोपसत् सुत्याभिस्त्रिसहस्रसंवत्सरो भवति ।। १ ।। तदनुकल्पः सांवत्सरस्तापश्चितस्त्रैवार्षिको भवति ।। २ ।। तदनु कल्पश्चातुर्मासिकस्तापश्चितो वार्षिको भवति ।। ३ ।। तदनुकल्पो द्वादशाहः षट्त्रिंशताहोभिः संपद्यते ।। ४ ।। तदनुकल्पः पृष्ठ्यः षडहोऽष्टादशभिः ।। ५ ।। तदनुकल्पो विश्वजिदेकाहस्त्रिभिरहोभिः । ता एताः सहस्रसंवत्सरप्रतिमा उपज्ञायन्ते ।। गो० ५ । १० ।।

इति नवमः पाठः ।।८ ।।

यज्ञोपपत्तिः

उक्थम्--अर्कः--अशितिः--इत्येतत् त्रितयमन्योन्यानुषक्तं यज्ञोपपत्तिः ।। तत्रेदमुक्थमग्न्यायतनं कुण्डवत् । तत्रायमर्कः समिद्धोऽग्निः । तत्राहितिराहुतिरेवाशितिः ।। तद्यथा--परमः प्रजापतिर्य्यज्ञपुरुषः । सोऽव्ययः सोऽक्षरः स क्षरः । तत्रायं क्षरपुरुषो महानुक्थः । सर्वे प्राणा देवा अर्कः । सर्वाणि भूतान्यन्नमशितिः । इत्यधिदैवतम् । अथाध्यात्मम् । अयमहं पुरुष एवोक्थमयमेव महान् प्रजापतिः । अध्यात्मं प्राणोऽर्कः । पृथ्वीजलतेजोवाय्वाकाशा बलज्ञाने चेति सप्तविधमन्नमशितिः ।। अपि चान्तर्यज्ञे तानि त्रीणि क्रमेण विद्यात् । तद्यथा--

पृथिवी	अग्निः	अन्नम्
अन्तरिक्षम्	वायुः	अन्नम्
द्यौः	आदित्यः	अन्नम्
मुखम्	वाक्	अन्नम्
नासिके	प्राणाः	अन्नम्
ललाटम्	चक्षुः	अन्नम्

तानीमानि पृथिव्यादीन्याद्यानि च भवन्त्यत्रीणि च । यद्ध किञ्चेयं प्रेर्त्ते--तदसौ सर्वमत्ति । यदु किञ्चात: प्रैति तदियं सर्वमत्ति ।। (ऐ० आ० १ । १ । ०।) ।।

(१) यज्ञयोनय:

दशहोता, चतुर्होता, पञ्चहोता, षड्ढोता, सप्तहोता--इति पञ्चैते चतुर्होतारो यज्ञयोनय: ।।

अग्निहोत्रं दशहोता । दर्शपूर्णमासौ चतुर्होता ।। चातुर्मास्यानि पञ्चहोता । पशुबन्ध: षड्ढोता । सौम्योऽध्वर: सप्तहोता ।। इत्येतानि वै चतुर्होतॄणां निदानानि ।। तै० ब्रा० २ । २ ।।

प्रजापतिर्दशहोता । सोमश्चतुर्होता । अग्नि: पञ्चहोता । धाता षड्ढोता । अर्य्यमास इन्द्रो वा सप्तहोता । इत्येते वै देवा: क्रमेण चतुर्होतॄणां गृहपतय: । एत एव वै देवाश्तुर्होतॄणां होतार: ।। (तै० ब्रा० ।)

वाचस्पतिर्होता दशहोतॄणाम् । पृथिवी होता चतुहोतॄणाम् । अग्निर्होता पञ्चहोतॄणां वाग्घोता षड्ढोतॄणां । महाहर्विहोता सप्तहोतॄणां । इति चाहु: ।। तदित्थमेषां चतुर्होतॄणां बन्धुक्लृप्तिमायतनं प्रतिष्ठां चारुणऔपवेशिर्विदांचकार ।। (तै० ब्रा० ३ । १२ । ५ ।।)

(२) ऋत्विज:

अग्निहोत्रस्यैक ऋत्विक् । दर्शपूर्णमासयोश्चत्वार: । चातुर्म्मास्यानां पञ्चर्त्विज: । पशुबन्धस्य षट् । सप्तहोत्रा:-सौम्यस्याध्वरस्य ।। १ ।। ऋत्विजो द्विविधा:-देवा मनुष्याश्च । तत्र--अग्निर्होता । वायुरध्वर्यु: । आदित्य उद्गाता । चन्द्रमा ब्रह्मा--इत्येते सूर्य्ययज्ञसम्बन्धिनश्चत्वारो देवा ऋत्विज: । तत्प्रतिकृत्या क्लृप्ता दक्षिणाक्रीतास्तथा चत्वारो मनुष्या ऋत्विज: ।। हौत्रविद्धोता । ऋग्वेदविद्धोता । अग्निर्होता । पृथिवी ऋचामायतनम् । अग्निर्देवता गायत्री छन्द: । भूरिति शुक्रम् ।। १ ।। आध्वर्य्यवविदध्वर्य्यु: । यजुर्वेदविदध्वर्य्यु: । वायुरध्वर्य्यु: । अन्तरिक्षं यजुषामायतनम् । वायुर्देवता । त्रैष्टुभं छन्द: । भुव इति शुक्रम् ।। २ ।। औद्गात्रविदुद्गाता । सामवेदविदुद्गाता । आदित्य उद्गाता । द्यौ: साम्नामायतनम् । आदित्यो देवता । जागतं छन्द: स्वरिति शुक्रम् ।। ३ ।।

ब्रह्मत्वविद् ब्रह्मा ।। अथर्वाङ्गिरोविद् ब्रह्मा । चन्द्रमा ब्रह्मा ।। आपोभृग्वङ्गिरसामायतनम् । चन्द्रमा देवता । वैद्युतश्च देवता । उष्णिक्काकुभे छन्दसी । ओम्-इत्यथर्वणां शुक्रम् । जनदित्यङ्गिरसाम् ।। ४ ।। एतद्वै भूयिष्ठं ब्रह्म । यद् भृग्वङ्गिरस: । येङ्गिरसो येङ्गिरस: स रस: । येऽथर्वाणो येऽथर्वाणस्तद् भेषजम् ।। यद् भेषजं तदमृतं यदमृतं तद्ब्रह्म ।। ५ ।।

चतुर्णामृत्विजामेकैकस्य त्रयस्त्रय: सहकारिणो होत्रका नामोच्यन्ते । यथा-

१	होता	अध्वर्य्यु:	उद्गाता	ब्रह्मा	इति प्रथमा:
२	प्रशास्ता	प्रतिप्रस्थाता	प्रस्तोता	ब्राह्मणाच्छंसी	इत्यर्धिन:
३	अच्छावाक:	नेष्टा	प्रतिहर्ता	अग्निध्र:	इति तृतीयिन:
४	ग्रावस्तोता	उन्नेता	सुब्रह्मण्य:	पोता	इति पादिन:

तदित्थमृत्विजः षोडशधा । प्रशस्तैवायं मैत्रमवरुणाः ।। ग्रावस्तोतैव ग्रावस्तुत् ।अग्निध्र एवायमग्नीध्रः, आग्नीध्रः, अग्नीदिति चाख्यायते ।। यजमानः । १ । यजमानपत्नी । २ । गृहपतिः । ३ । सदस्यः । ४। आचार्य्यः । ५। सोमप्रवाकः । ६। पुरोधाः । ७। दश चान्ये चमसाध्वर्य्यवः इति सप्तदशैतेऽनृत्विजः पुरुषाः । एषां कस्यचिद् ऋत्विक्त्वव्यपदेश आहार्य्यारोपाद् गौणः । ब्रह्मायं द्रष्टा सदस्यस्तूपद्रष्टा कर्म्मणां भवति ।। द्विविधा देवा इष्यन्ते । ईडेन्या अन्ये सर्पयेण्या अन्ये । अग्निः, वायुः, आदित्यः, चन्द्रमा इति चतुष्टयानुबान्धनस्त्रयस्त्रिंशद्देवा ईडेन्याः ।। ये ब्राह्मणाः शुश्रुवांसोऽनूचानास्त एवामी ऋत्विजोऽनृत्विजो वा यज्ञसंबद्धाः सर्पयेण्यास्त्रयस्त्रिंशत् ।। आहुतिभिर्दिव्या देवा इज्यन्ते दक्षिणाभिर्मनुष्यदेवाः ।।

(३) हविष्पंक्तिः

आज्यं धानाः, करम्भः, परिवापः, अपूपः, पुरोडाशः, पयस्येति । एष वै यज्ञो हविष्पंक्तिः ।।ऐ० ९ ।।

(४) सोमविशेषाः

(आक्षिजन) (अजोन)

हरिः पवित्रं पवमानपावकौ शुचिः समुद्राऽरुषबभ्रवोऽरुणः ।।
विचक्षणश्चेति दश प्रधानतः श्रुतौ प्रविध्यन्ति च सोमजातयः ।।१ ।।
अद्भ्योंऽशवः प्रजायन्ते ततः सोमः प्रजायते ।।
इति ऋक्संहिताभाष्ये धामारे दर्शिता श्रुतिः ।।२ ।।(८ । ५ । २)

१ महान् हरिः वृषाहरिः १५	२ पवित्रम् २२	३ पवमानः ३०	४ पावकः	५ शुचिः	
९ । २ । ४	९ । २ । ५	९ । ३ । २	९ । २४ । ६-७	९ । २४ । ६-७	
९ । २ । ६	९ । ४ । ९	९ । ४ । १			
९ । ४ । ९	९ । ६ । ३	९ । ४ । ९			
९ । ५ । ४	९ । १२ । ५	९ । ५ । १-११			
९ । ५ । ९	९ । १६ । ३	९ । ९ । ९			
९ । ८ । ६	९ । १६ । ४	९ । ११ । १			

हरिः	पवित्रम्	पवमानः		
९।९।३	९।१६।७	९।११।९		
९।१९।३	९।१७।३	९।१२।९		
९।२७।६	९।१७।४	९।१३।२		
९।३२।२	९।१८।१	९।१३।९		
९।३३।४	९।२०।७	९।१९।६		
९।३४।४	९।२४।५	९।२१।४		
९।३७।२	९।२७।१	९।२३।३		
९।३८।६।	९।२७।२	९।२४।१		
९।४२।१	९।२८।२	९।२४।३		
०	९।३०।१	९।२५।२		
०	९।३६।१	९।२६।३		
०	९।३७।१	९।२७।४		
०	९।३७।२	९।२७।५		
०	९।३९।३	९।२८।५		
०	९।४२।४	९।३०।४		
०	९।४३।५	९।३१।१		
०		९।३५।१		
०		९।३६।३		
०		९।३७।३		
०		९।३७।४		
०		९।४०।४		
०		९।४१।३		
		९।४३।४		
		(अजोन)		

६ समुद्रः ३	७ अरुषः २	८ बभ्रुः २	९ अरुणः २	१० विचक्षणः ३
९।२।५	९।८।६	९।११।४	९।११।४	९।१२।४
९।१२।६	९।२५।५	९।३३।२	९।४०।२	९।३७।२
९।२९।३				९।३९।३

(५) सोमचतुष्टयम्

सोमश्चतुर्धा विज्ञेयो राजा वागो ग्रहो हविः ।।
राजसूये वाजपेये ग्रहयागे हविः क्रतौ ।।१ ।।

राजा

ओषधिभिरिष्टयः पअक् सौमिकाः । ग्रहैः सौम्योऽध्वरो ग्रहसुत्या यागः । वाजेन वाजपेयसवयागः । राज्ञा राजसूयः सवयागः । धर्मपालो राजा । धर्म्मं विधरणं प्राणलक्षणम् । ध्रुवं धत्रं धरुणामिति धर्माणि । अष्टविधायां पृथिव्यां तारतम्येन काठिन्यापादकं धर्मं ध्रुवम् । अप्सु धर्त्रम् । तेजोवाय्वाकाशेषु तारतम्येन धरुणम् । त एतेऽग्नौ सूयमाना राजानः सोमा द्रष्टव्याः। एषामेव सोमानां तारतमायान्निविडानि तरलानि विरलानि च भूतानि दृश्यन्ते । अद्रौ हि सोमः । अश्मा हि सोमरूपम् ।।१ ।।

(वाजः)

समाने त्वस्मिन् विधरणधर्मे वैशेष्यापादको वाजः । उत्साहो वाजः । व्रीहिशालियवगोधूमतिलादीनां रूपाणि समानेऽपि ध्रुवधर्मे वाजाद् भिद्यन्ते । घृततैलवसासुरादयः समानेऽपि धर्त्रे यतो भिद्यन्ते स वाजः । आसञ्जनमन्नं वाजः । रसवीर्य्यविपाकादयो वस्तुधर्म्मा वाजाः ।।२ ।। ''वागृधि वाजस्य प्रसवः । सा वै वाक् सृष्टा चतुर्धा व्यभवत् । या प्रथिव्यां साग्नौ सा रथन्तरे ।।१ ।। यान्तरिक्षे सा वाते सा वामदेव्ये ।।२ ।। या दिवि सा बृहति सा स्तनयित्नौ । या बृहद्रथन्तरयोः- यज्ञोदेनं तया गच्छति । अथ पशुषु तया ऋते यज्ञम् ।। मै० सं० १ । ११ । ५ ।।

ग्रहः

अथ ग्रहाः सोमपात्राणि । ग्रहेषु सोमानि गृह्यन्ते । ग्रहाश्चत्वारिंशदेवेदानी यावन्महर्षिभिर्दृष्टाः । बहवस्त्वन्येपि संभाव्यन्ते ।।३ ।।

हविः

हवींष्योषधयः । सोमेन गृहीता अग्निविशेषा ओषधयः । पशवस्तेऽग्निविशेषा अग्नौ हूयमाना अग्नयो भवन्ति ।। सौम्या हि ओषधिस्थाः । वनस्पतिषु त्वग्नयः सौराः इति भेदः ।।

(६) सोमांशवः

अथ सोमांशवो दशोच्यन्ते ताण्ड्ये--प्रत्नोंऽशुर्यमभिषुण्वन्ति । तृप्नोंऽशुरापः । रसोंऽशुर्व्रीहिः ।। वृषोंऽशुर्यवः । शुक्रोंऽशुः पयः । जीवोंशुः पशुः । अमृतोंऽशुर्हिरण्यम् । ऋगंशुः । यजुरंशुः सामांशुः । इति । यदा वा एते सर्वे संगच्छन्ते तर्हि स सोमः स सुतः ।।

(७) ग्रहा:

सोमस्य ग्रहाश्चत्वारिंशद् भवन्ति ।

उपांशुसवन: । उपांशु: । अन्तर्य्याम:--इति त्रय: । ऐन्द्रवायव: । मैत्रावरुणा:आश्विन:-इति त्रय: । शुक्र: । मन्थीति द्वौ । आग्रयण: । उक्थ: । ध्रुव: । इति त्रय: । पूतभृत् । आधवनीय:-इति द्वौ । ऋतुग्रहा द्वादश । ऐन्द्राग्न: । वैश्वदेव:-इति द्वौ ।। इति सप्तविंशति: प्रात:सवनीया: स्यु: ।।

मरुत्वतीयास्त्रय: । माहेन्द्र एक: । शुक्रामन्थिनौ । आग्रयणीक्थ्यौ । चेति माध्यन्दिनीया प्रष्ठौ ।।

आदित्य: सावित्र: इति द्वौ । वैश्वदेव: । पात्नीवत: । हारियोजन: । इति पञ्च सायं सवनीया: । इत्थं चत्वारिंशदग्निष्टोमीया: ग्रहा: स्यु: ।।

अंशु: । अदाभ्य: इति द्वौ ।दधिग्रह: । षोडशी-इति द्वौ । तेऽमी चत्वारोऽत्यग्निष्टामीया: । इत्थं चतुश्चत्वारिंशत् । शुक्रामन्थिनोराग्रयणोक्थयो: पुनरुक्तत्वाच्चत्वारिंशदिति निष्कर्ष: । तथा च श्रूयते-

"षट् त्रिंशाश्च चतुर: कल्पयन्तश्छन्दांसि च दधत आद्वादशम् ।। यज्ञं विमाय कवयो मनीषा ऋक्सामाभ्यां प्ररथं वर्तयन्ति" ।। १ ।। ऋ० सं० ।

धारा: । सवा: । पवित्रम् । अमृतं चेति चतुर्धैते ग्रहा: सर्वे भाव्या: ।।

(८) सृष्टिबन्धव:

रेतोधा: । रेत: । तेज: । योनि: । गर्भ: । ऋतु:-इत्येता: षट् सृष्टिबन्धव: । रेतोधा रेतो योनौ सिञ्चति । तेजस्तत्र वीर्य्यं दधाति योनिनिहितं रेतस्तत्र ऋतौ आर्तवेन गृहीतो गर्भ: संपद्यते । रेतोधा: सोम: । रेत: सोम: रेतोधसो रेत: सेकप्रयोजकमात्रावदग्निरेवायमृतु: । दोहदश्च ऋतु: ।। दोहदपुष्टो गर्भ: प्रजायते ।। एषां षण्णां धर्माणां मिथोऽनुकूलबन्धनं संसृष्टि: सा सृष्टि: ।।

(९) रेतस: सृष्टि:

अथातो रेतस: सृष्टि: । प्रजापते रेतो देवा: । देवानां वर्षम् वर्षस्यौषधय: । ओषधीनामन्नम् । अन्नस्य रेत: । रेतस: प्रजा: । प्रजानां हृदयम् । हृदस्य मन: । मनसो वाक् । वाच: कर्म । तदिदं कर्मकृतमयं पुरुषो ब्रह्मणो लोक: ।। स इरामय: । तस्माद्धिरण्मय: (ऐ० आ० १ । १ ।) ।। एष एव कर्म्मात्मा पुरुषस्तांस्तान् लोकाननुसंचदति ।।१ ।।

(१०) सहचराणि

नाभानेदिष्ठं । वालखिल्या: । वृषाकपि: । एवया मरुत् । इति सहचराणणि चत्वारि । तान्येतानि-रेत:, प्राणा:, आत्मा, प्रतिष्ठा- इत्येतानि विद्यात् ।। ऐ ०।। वाक् प्राणश्चक्ष: श्रोत्रं मन आत्मेति प्राणा: ।। यत्र वृषा योषायां रेत: सिञ्चति तत्रैतस्मिन् पञ्चभूतमये रेतसि भृगवोऽङ्गिरसश्च प्राणा: अधितिष्ठन्तस्तान्येतानि पञ्चभूतानि

सह सञ्चारयन्ति । अथ वागादिपञ्चदेवतालम्बनेन्द्रश्चायमात्मा प्राणानामन्तरतस्तिष्ठन् प्राणान् समिन्धे । आत्मनि चेदं ब्रह्म प्रतिष्ठा प्रतिष्ठापयति तेनेदं रेतो न श्च्योतति न पूयते । तथा चैषां चतुर्णां सहचाराद् योनौ प्रतितिष्टदिदं रेत: प्राणौ: प्राणेन चात्मना भाव्यमान: पुरुषरूपेण परिणामते विजायते । तेषामेषां चतुर्णां सहचराणां याज्ञिकान्येतानि नामधेयानि क्लृप्तानि ।।

(११) सप्त पोषा:

अग्नि: साहस्रमपुष्यत् । पृथिवी औषधिभिर्वनस्पतिभिरपुष्यत् । वायुर्मरीचिभि: । अन्तरिक्षं वयोभि: । आदित्यो रश्मिभि: । द्यौर्नक्षत्रै: । चन्द्रमा अहोरात्रैरर्द्धमासैर्मासैऋतुभि: संवत्सरेणापुष्यत् । इत्यमी सप्त पोषा: ।। तै० ब्रा० २ । ३ । ३ ।।

इति दशम: पीठ: ।।१०।।

(१) दीक्षा दीक्षिता:

तत्कर्मयोग्यस्य तत्कर्मविशेषेऽधिकारतनयुक्तिर्दीक्षा ।

१ पृथिवी दीक्षा । तयाऽग्निर्दीक्षित: ।।

२ अंतरिक्षं दीक्षा । तया वायुर्दीक्षित: ।।

३ द्यौर्दीक्षा । तयाऽऽदित्यो दीक्षित: ।।

४ दिशो दीक्षा । तया चंद्रमा दीक्षित: ।।

५ आपो दीक्षा । तया वरुणो राजा दीक्षित: ।।

६ ओषधयो दीक्षा । तया सोमो दीक्षित:।।

७ वाग् दीक्षा । तया प्राणो दीक्षित: ।।

(२) पुरोहितपुरोधातार:

अग्नि: पुरोहित:-पृथिवी पुरोधाता । वायु: पुरोहित: । अंतरिक्षं पुरोधाता । आदित्य: पुरोहित:-द्यौ: पुरोधाता । स पुरोहितो य एवं वेद । स तिरोहितो य एवं न वेद ।।

(३) सवित्रो सावितार:

१ मन: सविता--वाक् सावित्री ।

२ प्राण: सविता--अन्नं सावित्री ।

३ वेदा: सविता-- छंदांसि सावित्री।

४ यज्ञ: सविता--दक्षिणा सावित्री।

५ अग्निः सविता--पृथिवी सावित्री।
६ वायुः सविता--अंतरिक्षं सावित्री।
७ आदित्यःसविता--द्यौ सावित्री।
८ चंद्रमाः सविता--नक्षत्राणि सावित्री।
९ अहरेव सविता--रात्रिः सावित्री।
१० उष्णं सविता--शीतं सावित्री।
११ अभ्रं सविता--वर्षं सावित्री।
१२ विद्युत् सविता--स्तनयित्नुः सावित्री।

इति भृग्वङ्गिरश्चक्षुषं द्वादशमिथुनां चतुर्विंशतियोनिमिमां सावित्री गायत्री ग्लावाय मैत्रेयाय भगवान् मौद्गल्य ऋषिः प्रोवाच। यत्रैव सविता तत्र सावित्री यत्रैव वा सावित्रो तत्र सविता नूनमविनाभावेनोपतिष्ठते। इति सत्यं विद्यात्।।

स सविता सावित्र्या ब्रह्मणां सृष्ट्वा तत्र सावित्रीं पर्य्यदधात्।। तेनैवं विदुषा ब्राह्मणेन ब्रह्ममभिपन्नं ग्रसितं परामृष्टम्। ब्रह्मणाऽऽकाशम्। आकाशेन वायुः वायुना ज्योतिः। ज्योतिषा आपः। अद्भिर्भूमिः। भूम्या अन्नम्। अन्नेन प्राणः। प्रणेन मनः। मनसा वाक्। वाचा वेदाः। वेदैर्यज्ञोऽभिपन्नो ग्रासतः परामृष्टः। तानि वा एतानि द्वादश महाभूतानि एवंविधिप्रतिष्ठितानि।। तेषां यज्ञ एव परार्द्ध्यः।। गो० १। ३८।।

सोऽयं यज्ञो वेदेषु प्रतिष्ठितः। वेदा वाचि। वाङ् मनसि मनः। प्राणे। प्राणोऽन्ने। अन्नं भूमौ। भूमिरप्सु। आपो ज्योतिषि। ज्योतिर्वायौ। वायुराकाशे। आकाशं ब्रह्मणि। ब्रह्म ब्राह्मणे ब्रह्मविदि प्रतिष्ठितम्। यो ह वा ब्राह्मणो ब्रह्मवित् स पुण्यां कीर्तिं लभते सुरभीन् गन्धान्। सोऽपहतपाप्मा आनन्त्यश्रियमश्नुते।।

(४) बार्हस्पत्याः स्तोमभागाः

रश्मिः क्षयं प्रेतिर्धर्म्मं जिन्वति। अन्वतिः सन्धिः प्रतिधिः-दिवमन्तरिक्षं पृथ्वीं जिन्वति। विष्टम्भो वृष्टिम्। प्राचोऽहरन्वा रात्रिम्। उशिक् प्रकेतः सुदीतिरोज इति वसुरुद्रादित्यपितॄन्। तन्तुः प्रजां रेवदोषधीः, पृतनाषाट् पशून्, अभिजिदिन्द्रं जिन्वति। अधिपतिधरुणौ प्रणापनौ। संसर्पवयोधसौ। चक्षुः श्रोत्रे। त्रिवृत्-सवृत्-प्रवृदनुवृतो, निरोहसंरोहप्ररोहानुरोहाः, वसुक्र-वस्पष्टिवेषश्रियः, आक्रम-संक्रमेत्क्रमोत्क्रान्तयश्चेति।। त एते बार्हस्पत्याः स्तोमभागास्त्रयस्त्रिंशत्। तत्राग्निष्टोमे द्वादश उक्थे पञ्चदश षोडशिनि षोडश। वाजपेये सप्तदश।। अतिरात्रे एकोनत्रिंशत्।। आप्तोर्य्याम्नि त्रयस्त्रिंशत्।।

(५) सतां सत्रस्य सद्भावः

यद् यत्र सीदति तस्य तत् सत्। यो वै सत्त्रस्य सद्वेद स सद्भवति। वामदेव्यं वै साम्नां सत्। अग्निर्देवतानाम्। विराट् छन्दसाम्। त्रयस्त्रिंशः स्तोमानाम्। तान्येव तदेकधा संभृत्योत्तिष्ठन्ति।। तां० ४। ८। १०।। सति यत् सीदति प्रतितिष्ठति तत् सत्यम्।।

(६) द्वादशमहाभूतानि (गो० २ । ३८)

ब्रह्म । आकाशम् । वायुः । ज्योतिः । आपः । भूमिः । अन्नम् । प्राणः । मनः । वाक् । वेदाः । यज्ञः । इत्येतानि द्वादशमहाभूतानि ।। यज्ञो वेदेषु ते वाचि, सा मनसि,तत् प्राणे सोऽन्ने तद् भूमौ भूमिरप्सु । आपो ज्योतिषि । ज्योतिर्वायौ । वायुराकाशे । आकाशो ब्रह्माणि । ब्रह्म तु ब्राह्मणे ब्रह्मविदि प्रतितिष्ठति । नानानाम्नां नदीनां समुद्रमभिपद्यमानानां छिद्यन्ते नामरूपाणि समुद्र इत्येवाख्यायते । एवं सर्वेषां वेदानां यज्ञमभिपद्यमानानां छिद्यन्ते नामरूपाणि यज्ञ इत्येवाचक्षते ।। (गो० २ । ९) ।।

(७) षट् प्रतिष्ठाः

द्यौरन्तरिक्षे प्रतिष्ठिता । अन्तरिक्षं पृथिव्याम् । पृथिव्यप्सु । आपः सत्ये । सत्यं ब्रह्माणि । ब्रह्म तपसि । इत्येताः षट् प्रतिष्ठाः प्रतितिष्ठन्तीरिदं सर्वमनुप्रतितिष्ठति ।। ऐ० ११ ।।गो० उ० ३ । २ ।।

(८) अक्षिताक्षय्यप्रतिष्ठाः

लोकः ।। १ ।। तपः ।तेजः ।। २ ।। समुद्रः । आपः ।। ३ ।। पृथिवी । अग्निः ।। ४ ।। अन्तरिक्षम् । वायुः ।। ५ ।। द्यौः । आदित्यः ।। ६ ।। चन्द्रमा । नक्षत्राणि ।। ७ ।। संवत्सरः । ऋतवः । मासाः । अर्द्धमासाः । अहोरात्रे पौर्णमास्यष्टकामावस्याः ।।८ ।। राट् श्रीः । ओजः सहोबलं भ्राजः ।।९ ।। देवास्त्रयस्त्रिंशाः ।।१० ।। इत्यक्षिताक्षय्यानि द्वाविंशतिः । एषामुत्तरमुत्तरं पूर्वस्मिन्नाश्रितं विद्यात् । पूर्वं पूर्वं चोत्तरेषां प्रतिष्ठा भवति ।। तै० ब्रा० ३ ।११। २ ।।

(९) द्वादश जयाः

आकूतमाकूतिर्द्वौ । चित्तं चित्तिर्द्वौ । आधीतमाधीतिर्द्वौ । विज्ञातं विज्ञातिर्द्वौ । भगः क्रतुर्द्वौ । दर्शः पूर्णमासो द्वौ । इत्येते द्वादश जयाः स्युः ।। यज्ञदक्षिणे, मनोवाचे, प्रजापशवः, ऋक्सामे; प्रजापतियज्ञौ, दर्शपूर्णमासे इत्येतेषां निदानानि ।।

(१०) ब्रह्मसत्रम्

ऋतं – सत्यम् – ऋतं – सत्यम् – ऋतम् – इति पांक्त ब्रह्मसत्रम् । अहृदयमशरीरमृतम् । सहृदयं सशरीरं सत्यम् । यदिदं किञ्चिद् दृश्यते तदखिलं परस्परेणानुषक्तनन्तरितमेकं पूर्णं भवति । तदसीमं तदशरीरं तदहृदयं तस्मात् ऋतं नाम तच्चेदमृतं ब्रह्म सत्यैरेभिरनन्तैः सूर्य्यचन्द्रपृथिवीप्रभृतिभिर्मूर्तब्रह्मभिरारब्धं विज्ञायते । तानि च सत्यानि पुनरनन्तैर्ऋतैरेव तैस्तैर्ब्रह्मभिः कृतरूपाणि संभवन्ति ।। तानि पुनः सत्यानि परमाणूनि येन यावता ब्रह्मणा कृतशरीरं भवति तदृतमनुभावयामः ।। ऋते सत्यं सीदति सत्ये चापामृतं सीदति । तदीदं ब्रह्मणः सत्रम् । तदीत्थमन्तरतो योऽन्तस्तत् परमं स्थानं तत्रास्तीति परमेष्ठीदमृतम् । बहिर्द्धा योऽन्तस्तत् परमं स्थानं तत्रास्तीति परमेष्ठीदमृतम् ।। उभयत एवेदमृताभ्यां परिगृहीतं सर्वं सत्यम् ।। तथा च श्रूयते –

"ऋतमेव परमेष्ठि ऋतं नान्येति किश्चन ।।
ऋते समुद्र आहित: ऋते भूमिरियं श्रिता" ।। इति ।।

ऋतेन च गर्भितं सत्यम् । अतश्चेदं यत् सत्यं यदृतं तत्सत्यम् । सर्वं सत्यं सर्वमृतम् ।। यन्न ऋतं तदनृतम् ।। ऋतेन सर्वं पूर्णं । तथा च श्रूयते –

पूर्णमद: पूर्णमिदं पूर्णात् पूर्णमुदच्यते ।।
पूर्णस्य पूर्णमादाय पूर्णमेवावशिष्यते ।।१ ।।

इत्येकादश: पाठ: ।। ११ ।।

जयपुरनरपतिमाधवसरस्वतीभवनभावनाध्यक्ष: ।।
श्रीमधुसूदनविबुधो दैवीं निविदं व्यधादेताम् ।।१ ।।
वेदार्थप्रतिपित्सूनां बालानामुपकारिणी ।।
सैषा दैवीनिविद् भायात् तुष्ट्यै वेदानुभाविनाम् ।।२ ।।
देवानामिदवो महत् तदावृणीमहे वयम् । वृष्णामस्मभ्यमूतये ।।१ ।।

इति मधुसूदनविद्यावाचस्पतिप्रणीता ब्रह्मविज्ञानान्तर्गता

दैवी निवित् संपूर्णा ।।

।। इति ।।